The tenth book is the characteristic part of this Purana, and the portion upon which its popularity is founded. It is appropriated entirely to the history of Krishna, which it narrates much in the same manner as the Vishnu, but in more detail; holding a middle place, however, between it and the extravagant prolixity with which the Harivamsa repeats the story. It is not necessary to particularize it further. It has been translated into, perhaps, all the languages in India, and is a favourite work with all descriptions of people.

The eleventh book describes the destruction of the Yâdavas and the death of Krishna. Previous to the latter event, Krishna instructs Uddhava in the performance of Yoga, a subject consigned by the Vishnu, to the concluding passages. The narrative is much the same, but something more summary than that of the Vishnu. The twelfth book continues the lines of the kings of the Kali age prophetically, to a similar period as Vishnu, and gives a like account of the deterioration of all things and their final dissolution.

Consistently with the subject of the Purana, the serpent Takshaka bites Paríkshit, and he expires and the work should terminate; or the close might be extended to the subsequent sacrifice of Janamajaya, for the destruction of the whole serpent race. There is a rather awkwardly introduced description, however, of the arrangement of the Vedas and Puranas by Vyasa, and the legend of Markandaya's interview with the infant Krishna, during a period of wordly dissolution. We then come to the end of the Bhagavata in a series of encomiastic commendations of its own sanctity and efficacy to salvation.

Mr. Colebrooke observes of the Bhagavata Purana: "I am myself inclined to adopt an opinion supported by many learned Hindus, who consider the celebrated Sri Bhagavata as the work of a grammarian Bopadeva supposed to have lived about six

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

hundred years ago." Colonel Vans Kennedy considers this an incautious admission, because "It is unquestionable that the number of the Puranas has been always held to be eighteen; but in most of the Puranas the names of the eighteen are enumerated, amongst which the Bhagavata is invariably included; and consequently, if it were composed only six hundred years ago, the others must be of an equally modern date."

Some of them are no doubt, more recent; but as already remarked no weight can be attached to the specification of eighteen names; for they are always complete; each Purana enumerates all. Which is the last? which had the opportunity of naming its seventeen predecessors, and adding itself? The argument proves too much. There can be little doubt that the list has been inserted, upon the authority of tradition either by some improving transcriber, or by the compiler of a work more recent than the eighteen genuine Puranas. The objection is also refuted by the assertion, that there was another Purana to which the name applies, and which is still to be met with, the Devi Bhagavata.

For the authenticity of the Bhagavata is one of the few questions, affecting their sacred literature, which Hindu writers have ventured to discuss. The occasion is furnished by the text itself. In the fourth chapter of the first book, it is said that Vyasa arranged the Vedas, and divided them into four, and that he then compiled the Itihasa and Puranas, as a fifth Veda. The Vedas he gave to Paila and the rest; the Itihasa and Puranas to Somaharshana, the father of Sûta. Then, reflecting that these works may not be accessible to women, Sudras, and mixed castes, he composed the Bhârata, for the purpose of placing religious knowledge within their reach. Still, he felt dissatisfied, and wandered in much perplexity, along the banks of the Sarasvati, where his hermitage was situated while Narada paid him a visit. When Vyasa confided to him his secret and seemingly causeless dissatisfaction, Narada suggested that it arose from his not having sufficiently dwelt, in the works he had finished, upon the merit of worshipping Vasudeva. Vyasa at once admitted its truth and found a remedy for his uneasiness in the composition of Bhagavata, which he taught to S'uka, his son. There, therefore, is the most positive assertion that the Bhagavata was composed subsequently to the Puranas and given to a different pupil, and was not, therefore, one of the eighteen of which Somaharshana the father of Suta, was, according to all concurrent testimonies, the depositary. Still the Bhagavata is



named amongst the eighteen Puranas, by the inspired authorities and how can these incongruities be reconciled?

The principal point in dispute seems to have been started by an expression of S'rîdhara Svâmin, a commentator on the Bhâgavata, who somewhat incautiously made the remark, that there was no reason to suspect that by the term Bhâgavata, any other work than the subject of his labours was meant. This was therefore, an admission that some suspicions had been entertained of the correctness of the nomenclature, and that an opinion had been expressed, that the term belonged, not to the Sri Bhâgavata, but to the Devi Bhâgavata; to a S'aiva, not a Vaishnava composition. With whom doubts prevailed prior to S'ridhara Swamin, or by whom they were urged, does not appear; for as far as we are aware, no works anterior to his date, in which they are advanced, had been written on the subject. There are three works in the library of the East India Company, the *Durjana Mukha Chapetika*, 'A slap of the face for the vile,' by Ramas'rama; the *Durjana Mukha Maha Chapetika* 'A great slap of the face for the wicked,' by Kasinath Bhatta; and the *Durjana Mukha Padma Pâduka*. 'A slipper for the same part of the same persons,' by a nameless disputant. The first maintains the authenticity of the Bhagavata; the second asserts that Devi Bhagavata is the genuine Purana; and the third replied to the arguments of the first. There is, also, a work by Purushothama, entitled, 'Thirteen arguments for dispelling all doubts of the character of the Bhagavata' (*Bhagavata Sârarupa Vishaya S'ânkâ Nirâsa Trayôdasa*); whilst Balam Bhatta, a commentator on the Mitakshara, indulging in a dissertation on the meaning of the word Purâna, adduces reason for questioning the inspired origin of the Purâna.

The insertion of a Bhâgavata amongst the eighteen Puranas is acknowledged; but this, it is said, can be the Devi Bhagavata alone, for the circumstances apply more correctly to it than to Vaishnava-Bhagavata. Thus, a text is quoted by Kasinatha, from a Purana—he does not state which,—that says, of the Bhagavata, that it contains eighteen thousand verses, twelve books, and three hundred and thirty-two chapters. Kasinatha asserts that the chapters of the Sri Bhagavata are three hundred and thirty-five, and that the numbers apply, throughout, only to the Devi Bhagavata. It is also said that the Bhagavata contains an account of the acquirement of holy knowledge by Hayagriva, the particulars of the Sàrasvata kalpa, a dialogue between Ambarisha and S'uka; and that it commences with the

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

Gâyatri, or at least a citation of it. These all apply to the Devi Bhagavata alone, except the last; but it also is more true of the Saiva than of the Vaishnava work; for the latter has only one word of the Gayatri, *dhimahi*, 'we meditate,' whilst the former adds to *dhimahi*, *'yonah prachodayat,'* who may enlighten us. To the third argument it is in the first place objected that the citation of the Bhagavata by modern writers is no test of its authenticity; and, with regard to the more ancient commentary of Sankara Acharya, it is said, "Where is it?" Those who advocate the sanctity of the Bhagavata reply: "It was written in difficult style, and became obsolete, and is lost." "A very unsatisfactory plea," retort their opponents; "for we still have the works of Sankara, several of which are quite as difficult as any in the Sanskrit language." The existence of this comment too rests upon the authority of Madhva or Madhava, who, in a commentary of his own, asserts that he has consulted eight others. Now, amongst these is one by the monkey Hanumat; and although a Hindu disputant may believe in the reality of such a composition, yet we may receive its citation as a proof that Madhva was not very scrupulous in the verification of authorities.

There are other topics urged, in this controversy, on both sides, some of which are simple enough, some are ingenious; but the statement of the next is, of itself, sufficient to show that according to the received opinion, of all the authorities, of the priority of the eighteen Puranas to the Bharata, it is possible that the Sri Bhagavata, which is subsequent to the Bharata, should be of the number; and the evidence of style, the superiority of which to that of the Puranas in general is admitted by the disputants, is also a proof that it is the work of a different hand.

Whether the Devi Bhagavata has a better title to be considered as an original composition of Vyasa, is equally questioned; but it cannot be doubted that the Sri Bhagavata is the product of uninspired erudition. There does not seem to be any other ground than tradition for ascribing it to Bopadeva the grammarian: but there is no reason to call the tradition in question. Bopadeva flourished at the court of Hemadri, Raja of Devagiri, Deogur or Dowlatabad, and must, consequently, have lived prior to the conquest of that principality by the Mahomadans in the fourteenth century. The date of twelfth century, commonly assigned to him, is probably correct, and is that of the Bhagavat Purana.

---

## MUDRARAKSHASA.

It must certainly be understood that a houseless Brahman like Chanakya had no weapon of offence against the rich and mighty Nandas, but his *kusa* grass and his wit as sharp. How then had he accomplished his vow of revenge on the Nandas? He had done it with the aid of a barbarian king of the west frontier, named Parvateswara, whom he had won over to his project by the promise of half of the kingdom to be conquered. Now that he had gained his end, he wished—his political conscience must have been very elastic—to throw his barbarian ally overboard and secure the kingdom entire for his protege Chandragupta. Here again the means he employed are characteristic of his genius.

Indus'arman, a student friend of Chanakya, had disguised himself as a Buddhist *Jivasiddhi,* gone about under the assumed name *Bhadanta* and wormed himself in to the friendship of Rakshasa. He it was who had helped in the destruction of the Nandas by his treachery to the deluded Rakshasa. But still the unsuspecting Rakshasa beleived in him and asked him to bring into existence by his magical powers, a maiden of rare charms, whose very touch, however, was mortal. This 'Pandora' was sent as a present to Chandragupta. Chanakya who was in the secret sent the compliment on to his ally Parvateswara, who succumbed to her charms and her deadly contact. Thus had Chanakya quietly rid himself of his burthensome ally and fastened the odium of his murder on his rival Rakshasa.

One more impediment had to be disposed of—Malayaketu the son of the ill-fated barbarian chieftain. This task, Chanakya entrusted to a servant of his, Bhâgurâyana by name, who going over to Malayaketu as a deserter managed to gain his confidence and acquire a great influence over his mind. He made the inexperienced Malayaketu believe that Chanakya was planning to take his life and his only safety was in flying back to his kingdom. By this means not only was Malayaketu induced to fly from the city but a faithful betrayer, Bhâgurâyana, became the unsuspected confidant of the young *mlechha* king. Rakshasa, as Chanakya had expected, now joined Malayaketu and became his prime-minister undertaking to secure for him the throne of the Nandas.

Chanakya now instructed certain of his officers in the army to pretend discontent and join Malayaketu and get appointed to places of trust in his army. These had done so and were biding their time for action.

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

The secrecy of Chanakya was perhaps the most noteworthy feature of his subtle policy. He had a 'genius for authority'—प्रभुशक्ति as it is termed in Sanskrit. Galvanised by his overpowering will, his servants worked just like so many machines. They never thought of knowing either more or less than Chanakya willed. So it often happened that one spy of Chanakya mistook another for a Rakshasa's man. Thus, by the way, the author shows how Nipunaka, a spy of Chanakya, took Indusarman to be a real Jivasiddhi and friend of Rakshasa.

From this Nipunaka Chanakya receives information of two friends of Rakshasa living in Patalipura. Rakshasa, when he left the capital of the Nandas to take up the ministership under Malayaketu, thought it wise to leave his family at Patalipura, in secret charge of one of his two friends—Chandanadasa a merchant. Nipunaka took this information to Chanakya and with it a seal-ring of Rakshasa which had been inadvertently dropped at Chandanadasa's door. The other faithful friend of Rakshasa was Sakatadasa a professional copyist. Chanakya, who had come in possession of Rakshasa's signet, availed himself of this chance that luck had thrown in his way. He endited an anonymous letter naming no names and saying nothing precisely, which could, however, say much when other tallying circumstances should spring up. This letter he got copied by Sakatadasa and sealed with the signet of Rakshasa, which had come into his hands, and gave the letter to the keeping of Siddharthaka, an agent of his. Chanakya now issued a fictitious order for the execution of Sakatadasa as a conspirator against Chandragupta's life and instructed this same Siddharthaka to effect a make-believe rescue of Sakatadasa. Chanakya now arrested Chandanadasa as having afforded shelter to the family of a conspirator, demanded of him the surrender of the family of Rakshasa, and on his refusal had him lodged in the jail.

Chanakya's aim was now to create division between Malayaketu and Rakshasas, to bring the latter to the very verge of despair, to make him give up all hope of revenging the death of his masters. But even though defeated, yea, captured, the proud spirit of Rakshasa would never consent to serve the usurper, the destroyer of his departed patron. Fear, mere personal fear, or hope of favours could never influence him; danger to a friend was the only thing that could induce him to swerve from his purpose, if he could thereby save his friend. This Chanakya knew very well and this is why he found means to send Rakshasa's friend Chandanadasa to prison.

## वाणिज्यकला ॥

पूर्वप्रकाशितात्परम् ।

पादस्तावदितस्ततस्संचरणक्लेशमावहति । हस्तस्तत्र तत्र विद्यमानान् पदार्थान् संचिनोति । घ्राणरसने द्रव्यस्योत्कर्षापकर्षे परीक्षेते । उदरञ्च सर्वेष्वप्यवयवेष्वन्नरसं विभज्य बलं संवर्द्धयति । अतएव हि देहो धार्यते । एवमेव सर्वत्राप्यूहनीयं । तस्मात् कर्मविभाग आवश्यकइति सिद्धम् ॥ कर्मविभागेनैव एकेन दुस्साधानि कार्याणि कार्यन्ते । तेनैव सर्वस्यापि जनस्य तत्र तत्र कर्मणि कौशलं वर्धते । यः कश्चिद्बालः कुत्रचित् कर्मणि नियुक्तः तत्रैव पूर्णोद्यमत्वात् समग्रां मतिं निवेश्य कालेन सम्यक्करणकौशलमधिगच्छति । तथाहि—अस्माकमुपयुक्ताः पटाः संघशः ऐरोपीयदेशादिमं जनपदमानीयन्ते । सेयं पटसंततिः कथं संपादिता? कैः आनीता? इति चिन्त्यमाने, तत्रानेकेषां कर्मकराणां समवायो दृश्यते । तत्कथमितिचेत्, कार्पासाभावे पटाभावः तस्मात् कस्मिंश्चित् क्षेत्रे केचित्कार्पासबीजानि वपन्ति । यथा च सम्यक् रोहन्ति तथा प्रयतन्ते । कालेन च तानेकत्र संगृह्य कार्पासं सञ्चिन्वन्ति । संघश एकत्र संमिलितं कार्पासभारं केचन वणिजः महता धनव्ययेन क्रीत्वा शकटानारोप्य महानगरमानयन्ति । तेभ्यश्च पोतवणिजः कार्पासद्रव्याणि क्रीत्वा नावमारोप्य, महान्तं श्रममविगणय्य, सुदीर्घमध्वानं विलंघ्य, सुचिरं समुद्रयात्रां कृत्वा, ऐरोपीयदेशानासाद्य किञ्चित्प्रतीक्षन्ते । तावदेव कार्पासद्रव्याभावान्नितरां ताम्यन्तः यन्त्रवणिजः अहमहमिकया प्रधाव्य, तेभ्यः यथोचितं यथाभिलषितं च मूल्यं दत्वा कार्पासद्रव्याणि क्षणेन स्वायत्तीकुर्वन्ति । नयन्ति च [16]लिवर्पूल्, मान्चेस्टर इत्यादि विख्यातनगराणि । यत्र स्थापिताः कार्पासयन्त्राः चित्रतमा भासन्ते । एतेभ्यो यन्त्रेभ्यः क्षणेनैकेनासंख्येयाः पटा निस्सरन्ति । तथाहि पा[illegible]यन्त्रालयस्य कुत्रचित्कोणे संघशो निक्षिप्तः कार्पासः यन्त्रजन्यवातैराकृष्टः

(16) The great manufacturing towns like Liverpool and Manchester.

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

महत्या नाळिकया[17] अन्यत्र नीयते । तावत्तत्र स्थापितो यन्त्रः तं कार्पासं निर्मलीकरोति । निर्मलीकृतश्चान्यत्र नीयते । तत्र चातिसूक्ष्मतन्तुरूपेण परिणम्यते । इमे तन्तवः अन्यस्मिन्यन्त्रे यथाभिलषितप्रमाणं प्रसारिताः तुरीवेमादिकरणयुतैः तैरेवान्यादृशैः यन्त्रविशेषैः क्रियमाणानामसंख्येयानां पटानां कारणानि भवन्ति । एवं यन्त्रनिर्मिताः पटाः कौलिकानां परिश्रमेण क्रियमाणेभ्यः पटेभ्योऽपि समीचीनतराः श्रेष्ठाः अल्पमूल्याश्च दृश्यन्ते । तस्मात् पटकरणयन्त्रस्थापनानन्तरं बहवः कौलिकाः विकलवृत्तयो बभूवुः । तथा च यन्त्रनिर्मिताः पटाः पोतवणिग्भिर्यन्त्रालयेभ्यः क्रीताः इमं देशमानीयन्ते । एवमसंख्येयाः कर्मकराः पटकरणे घटका भवन्ति । तथैव सर्वस्मिन्नपि विषये बहूनां समवायो दृश्यते । तस्मात्कर्मविभागे बहवो गुणाः सन्ति । प्रथमतस्तत्तत्कर्मणि नैपुण्यं वर्धते । अनायासेनाल्पायासेन वा महत्कर्म कर्तुं यन्त्रनिर्माणशक्तिसंधुक्षणं भवति । अनेककर्मणां साधने कालविलंबश्चापचीयते । किञ्च, कर्मविभागक्रमश्च बहुधा निर्वर्णितः । तद्विषयकज्ञानाभावे राज्यतन्त्रक्रम अशक्य एव । तत्तत्कार्यकरणे कर्मकराः मतिमद्भिः सम्यक् नियोक्तव्याः । तथा हि यदि लेखवाहक एकः कुत्रचिद्गच्छन् मध्येमार्गं स्थितानामन्येषामपि पुरुषाणां लेखान् वहति । तर्हि तेनानतिपरिश्रमेण तत्र तत्र पृथक्त्वेन गच्छतां सुबहूनां सन्देशहराणां कार्याणि निर्वर्तितानि भवन्ति । एवमेव राज्यतन्त्रनिपुणैराङ्गलभौमदेशीयैरत्र नगरेनगरे ग्रामेग्रामे च स्थापिताः लेखालयाः[18] सर्वेषामपि जनानामधिकार्थव्ययमन्तरा महत्कार्यं साधयन्ति । यदि हिमालयोपान्तवर्ती कश्चित्पुरुषः सेतुनिकटस्थस्य कस्यचित् सन्देशं प्रेषयितुमिच्छति, सेयमिच्छा लेखालयाभावेऽनेकशतरूप्यव्ययेनापि अल्पेनैव कालेन साधयितुं न शक्यते । अद्य तु नितरामल्पमूल्येन काचेन पत्रमेकं[19] क्रीत्वा लिखित्वा च तत्र स्वाभिलषितं सन्देशं, लेखालयं गत्वा पत्रिकापेटिकायां[20] निक्षिप्य स्वपिति । पञ्चषान्दिवसानतीत्य लेखालयसेवकः[21] कश्चित् तस्य गृहको-

(17) Through a great tube. (18) Post-offices.
(19) Purchasing a Post-card. (20) The Letter-box.
(21) Postman.



णमागत्य बहिः गृहस्वामिनामाङ्कितं[22] लेखं ददाति । सोयं लेखः सेतुस्थपुरुषेणास्मै प्रेषितं प्रतिसन्देशम्[23] आवहति । विस्मयोत्फुल्लनयनश्चासौ लेखालयमाहिमानं बहुधा स्तवीति । केचन व्यवहारानभिज्ञाः मन्दमतयो ग्रामीणाः[24] लेखालये देवतात्वमारोप्य तस्मै नमस्कुर्वन्ति । प्रार्थयन्ति च पेटिकायां लेखं निक्षिप्य,

"लेखालय महादेव त्वरितं गम्यतामितः ।
दूरस्थं मे सुतं ब्रूहि सुखं जीवति ते पिता ॥ इति ॥

न ते मूढाः लेखालयस्वरूपं जानते । बहुभिरेकत्र निक्षिप्ताः पत्रिकाः लेखालयस्थापकानां धनव्ययमन्तरा महान्तं लाभं जनयन्ति ।

"गणाद्बृहन्नहीयेत गणस्यापि न किञ्चन ।" इति न्यायानुसारेण एकैकस्मात् जनात् अत्यन्तमल्पं द्रविणं गृहीत्वा 'काकादेकम्बकादेकमि' ति शिक्षामनुसृत्य प्रभूतं द्रविणमार्जयन्ति राष्ट्रतन्त्रज्ञाः । तत्तत्कार्यसाधने कांश्चित्कर्मकरान् नियोज्य स्वमेधया कर्मविभागं सन्दिश्याल्पव्ययेन पुरुषशतदुस्साधान्यपि कर्माणि कतिपयैरेव सेवकैरनायासेन साधयितुं शक्नुवन्ति । अनेनैव प्रकारेण एकस्मिन्नेव कर्मणि अवान्तरभेदकर्तॄणां समवायः[25] सर्वेषां कर्मकराणां सुखमुत्साहञ्च वर्द्धयति । परन्तु कर्मविभागे नराणां प्रत्येकमेककर्मनैपुण्यात् न सर्वतोमुखी प्रतिभा[26] । ततश्च दैवादनावृष्ट्याद्युपद्रवे सस्यसंपादनैककर्मव्यग्राणां महान् जीवितसंशय अनिष्टो जायते । सस्यसंपादनादितरकर्मकरणाज्ञानात् कथं तेन जीवितुं शक्यते । सत्यं कर्मविभागादिमान्यसुखानि सम्भवन्त्येव[27] परमेतानि मतिमद्भिर्देशकालानुगुणं निवारणीयानीत्यलमतिविस्तरेण ।

द्रविणसंपादने त्रीणि मुख्यत्वेन परिगणितानि । क्षेत्रं, कर्म, मूलधनञ्चेति[28] । व्रीह्यादिद्रव्याणि क्षेत्रेभ्य उत्पद्यन्ते । तदुत्पादनेच महान् कृ-

(22) Bearing the address of the owner of the house.
(23) Reply. (24) Illiterate villagers. (25) Co-operation of labour. (26) Division of labour tends to make a man's power narrow and restricted. (27) These disadvantages arise from the Division of Labour. (28) Three requisites in the production of wealth—Sand, Labour and Capital.

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

षीवलानां प्रयत्नः (कर्म) । क्षेत्रस्वामीच कृषीवलादिकर्मकराणां तत्तत्कर्मानुरूपं भृतिं दातुं मूलधनमपेक्षते । अथवाऽजस्रमुद्योगिभिः कृषीवलैर्यदन्नं भुज्यते तदिदं मूलधनमेव । यतः तदेव तेषां श्रमं मुहुर्मुहुरपनीय तेषां बलदायकतया व्रीहिद्रविणासादने मुख्यं कारणं इत्यत्र न कोपि संशयः । एष किल सर्वत्र द्रव्याधिगमप्रकारः । यस्मात्स्थलात् जलात् खनेर्वा द्रविणमासाद्यते तानीमानि क्षेत्रत्वेन व्यवह्रियन्ते । स्थलात् सस्यादि, जलाल्लवणादि खनिभ्यः[29] कनकरजतादि इति असंख्येयानि द्रविणान्यधिगम्यन्ते । द्रविणाधिगमोद्यमश्च मतिमद्भिः देशकालानुगुणं यथा विफलो नस्यात् तथा कार्यः । तथाहि । कृषिकालश्च तत्र तत्र देशभेदेन भिद्यते । सोयङ्कालस्तत्रतत्र निवासिभिः कृषिजीविभिः कर्मकरैश्च सम्यक् ज्ञातएव । एवं तत्तत्कर्म कर्तुं फलमासादितुं च कालं प्रतीक्षमाणैः कर्मकरैः आत्मानं सुखेन वर्तयितुं मूलद्रविणमपेक्षितं । अन्यथा कथमयं जीवेत्कर्मफलाधिगमकालपर्यन्तम् । कथञ्च नैकविधकर्माणि कर्तव्यानीत्यादि पूर्वमेव विस्तरेण वर्णितमासीत् । इदानीं मूलधनस्वरूपादिकं निर्वर्ण्यते । यच्च द्रविणमधिकद्रविणसंपादने कारणं तदेव कारणद्रव्यं अथवा मूलधनमित्युच्यते । तस्माद्[30]यद्यन्मूलधनं तद्द्रविणमेव । परं यद्यद्द्रविणं तन्मूलधनमिति वक्तुं न शक्यते । तथाहि । अन्नवान् धनी वा कश्चित्पुरुषः निरुद्योगी सुखेन भुञ्जन् वृथा कालं नयति । तस्य द्रविणं मूलधनत्वेन परिगणयितुं न शक्यते । यतः एषः अधिकद्रव्यसंपादनं नकिञ्चिदपि कुरुते । यदाचासौ मूल्यवतामत्यन्तोपयुक्तानां च गृहारामकूपादीनां निर्माणे द्रविणव्ययं करोति तदा तावत् द्रविणं मूलधनं भवितुमर्हति । उपर्युपर्यधिकद्रविणसंपादने महान् किल मूलधनस्योपयोगः । तदिदं मूलधनं मतिमद्भिः व्यवहारतन्त्रज्ञैः सम्यगालोच्य उपयुक्तं सत् कर्मकराणां महान्तं श्रममपनोद्यानल्पद्रविणासादने कारणं भवति । तथाहि । पानीयकामः निर्धनः कश्चिज्जनः कूपात् सरसोवा उदकमुदञ्चन् महता प्रयासेन उदकुंभं गृहं नयति ।

(29) Mines. (30) All capital is Wealth but all wealth is not necessarily capital.

(क्रमशः)

## मूषिकोपाख्यानम् ।

एकामतिर्यदि भवेद्विशदा जनानां
सैवात्र सर्वविपदुत्तरणक्षमा स्यात् ।
आखुस्त्वया धिषणयैव रिपून् विजित्य
कृच्छ्रेप्यसुख्यत यथा वटमूलवासी ॥

कस्मिंश्चिन्नानामृगगणचटुलविहरणकरालदर्शने विपिने लताजालपरिच्छिन्नः द्विजगणनिषेवणमनोहरश्शीतच्छायः पथिकजनहृदयहरणबद्धादरः सुमहान् न्यग्रोधतरुरासीत् । तस्य च मूलप्रदेशमाश्रित्य मतिमान् पलितो नाम मूषिकश्शतमुखं बिलं विरचय्य शतमखादप्यधिकम्मन्यस्तत्रैव सुखमानशे । तस्यैवोन्नते विटपे पतत्रिनिकरामित्रो रोमशो नाम मार्जारो वसतिमापेदे । तत्र चानुसंध्यं रूक्षः कश्चन व्याधापशदस्स्नायुमयं जालं विस्तार्य गृहं गत्वा सुप्त्वा च निर्विशंकं प्रातर्भगवति गभस्तिमति चरमगिरिशिखरमधिरूढे सति निद्रापुनरुक्तनयनशोणिमा समुपेयाद्वृक्षमूलम् । पश्येच्च नक्तं बद्धान् निश्चेष्टान् नानाविधान् मृगगणान् । हृष्यत्पुलकश्च तुष्येत् । इत्थं तस्य दुर्मेधसः आचारः । अथ कदाचिद्यथाचारमाकीर्य जालं निर्गते तस्मिन् अप्रमत्तः प्राज्ञोऽपि मार्जारस्तत्र समबध्यत । बद्धं तु लोमशमुद्वीक्ष्य रिपुर्निगाळित इति निर्भयं विचचार मूषिकः । आहारकांक्षिणा च तेन यथेच्छमारुह्य वृक्षोपरिस्थं मार्जारसंचितमामिषमभक्ष्यत । भुंजानेन च तेन शरपुष्पसंकाशः मूषिकगंधेन समागतो भूमावूर्ध्वमुखः हरितो नाम नकुलस्समालोक्यत । तद्दर्शनेन भृशं संभ्रान्तस्य तस्य पलितस्यान्योऽपि द्रुमकोटरवर्ती तदर्थी चन्द्रको नाम तीक्ष्णतुण्ड उलूको लोचनविषयतामाजगाम । एवं शत्रुत्रयमध्यवर्ती व्यचिन्तयत्—

"आपद्यस्यां सुकष्टायां मरणे समुपस्थिते ।
समन्ताद्भय उत्पन्ने कथं कार्यं हितैषिणा ॥
गतं मां सहसा भूमिं नकुलो भक्षयिष्यति ।

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

उलूकश्चेह तिष्ठन्तं मार्जारः पाशसंक्षयात् ॥
न हि बुध्यान्वितः कृच्छ्रे दारुणेऽप्यवसीदति ।
तज्जीवाम्यहमाश्रित्य मार्जारं युक्तिपूर्वकम् ॥
पाशबद्धस्य तस्यापि महत्कार्यं मयास्ति हि ।
कदाचिद्व्यसनं प्राप्य संधिं कुर्यान्मया सह ॥
बलिना सन्निकृष्टस्य शत्रोरपि परिग्रहः ।
कार्य इत्याहुराचार्या विषमे जीवितार्थिना ॥"

इति बहुधा विचिन्त्य सन्धिविग्रहकालज्ञः सान्त्वपूर्वकं मार्जारमब्रवीत् । भो मार्जारसार्वभौम धीर धिषणावधीरितविबुधाचार्य विचार्य कार्यसाहित्यसौहार्देन भाषमाणं मां जातितश्शत्रुमपि कार्यतस्सुहृदं मत्वा त्यक्त्वा च क्रूरतां शीतलया दृशा सिञ्च । अपि जीवसि । जीवितं हि तव मां तोषयेत् । धैर्यं नभवता विमुच्यताम् । मां न यदि जिघांससि तदा तीक्ष्णत्रोटिरहं खण्डयामि तव बन्धनम् । यथासुखं विचरिष्यसि । भीतिं स्वप्नेऽपि मा भज । मम च तवेवोपस्थितामापदं पश्य । नकुलो मद्भक्षणार्थी मूलमावृत्य तिष्ठति । नगशाखाग्रगश्चपलनेत्रः कौशिको मां क्रूरमाहारकांक्षी समीक्षते । उभयतश्च भृशमुद्विजे मैत्रस्याभाषणपूर्वकत्वात् पण्डितो मे भवान् मित्रमासीत् । न च शक्नोषि मया विना पाशान् छेत्तुम् । विदितमेव भवता चिरादावयोस्सामानाधिकरण्यम् । यदुपाश्रितौ मूलावच्छेदेनाहमग्रावच्छेदेन भवांश्चामुमेव द्रुमवरम् । परस्परबद्धवैरौ शक्तिमन्तौ उद्विग्नमानसौ समानाधिकरणावुभौ न हि पण्डिताः प्रशंसन्ति । यत्तयोस्सन्धिर्भूयांसमप्यर्थमविश्रमेण साधयति । तस्मादावयोरनन्यसुलभा प्रीतिर्विवर्धताम् । नित्यं च सङ्गत्य क्रीडावः । बहुमन्यतामास्माकीनं वचः । उभयोर्भूयाद्भूयसी श्रेयस्सन्ततिः । अन्योन्यजीवनार्हो भविष्यत्यावयोस्संयोगः । स च स्मारयति परस्परतरणार्हं नाविकनौसम्बन्धम् । तस्मात् त्वामहं जीवयिष्यामि । पोषयिष्यति च मां भवान् । इत्थं स मूषिको हृदयंगमं ग्रहणीयार्थं परस्परश्रेयस्साधनं व्यवहृत्य विरराम । अथ तच्छ्रुत्वा बुद्धिमान् मार्जारस्स्वामवस्थां सम्यगालोच्य मन्दस्मितमीक्ष्य मूषिकं सामपुरस्सरां वाचमवोचत । सौम्य तुष्यामि । भद्रमस्तु तव यो मां जीवयिष्यसि । अहमतिविपन्नः त्वं चापि विपन्नतरः यद्यापदुत्तरणं समर्थयसे । क्रियतां माचिरम् । तव च काले प्रत्युपकुर्याम् । न च मया भवत्कृतं ममोत्तरणं विस्मर्येत । क्रियतां भवता मय्यात्मीयबुद्धिः । शरणागतं मां रक्षणीयं विद्धि । भवन्निदेशवर्ती विचारयेयमजस्रभितो भवतो हितं इति । ततो मार्जारं व्याजहारार्थवदास्वादनीयं वचनं फलिताभिमतः पलितः ।



न हि वैचित्रीमावहति प्राज्ञस्य तवैतादृशी परिपाटी । अहं त्वां प्रवेक्ष्यामि । अवमामवमम्यप्यवमाननामविगणय्य । बिभेमि किल नकुलादुलूकाच्च । शरणार्थिनो भीतस्यावनमेव श्रेयोनिदानमामनन्ति हि मनीषिणः ।

"दीनं भीतमनाथमापदुदधौ मग्नं विधेः क्रौर्यतः
रक्ष त्वं करुणाम्बुधे न हि गतिस्त्वत्तो ममेतीरणाम् ।
दीनां संरचयन्तमत्र मनुजस्तद्रक्षणे शक्तिमान्
गर्वान्मुञ्चति यस्सलोकपतिना मन्दोदयो मुच्यते ॥" इति ॥

तन्मां मावधीः । शरणागतरक्षणसम्भवं यशस्सञ्चीयताम् । ध्रुवं छेत्स्यामि तव बन्धनम् । अन्यथा शापितोऽसि आवयोस्सौहार्देन । इति ।

अथ तद्वचनं निशम्य रम्यं मधुरं वीक्ष्य च मूषिकं बिडालः ।
पलितं मुदितान्तरस्स वाक्यं ललितं स्वागतपूर्वकं बभाषे ॥

शीघ्रमागच्छ भद्रं ते त्वं मे प्राणसमस्सखा ।
तव प्राज्ञ प्रसादाद्धि प्रायः प्राप्स्यामि जीवितम् ॥
यद्यदेवं गतेनाथ शक्यं कर्तुं मया तव ।
कर्तास्मि सर्वकार्याणि प्रियाणि च हितानि च ॥
प्रत्युपकुर्वन् बह्वपि न हि भवति पूर्वोपकारिणा तुल्यम् ।
एकः करोति हि कृते निष्कारणमेव कुरुतेऽन्यः ॥ इति ॥

अथ मुदितः पलितो मार्जारस्य क्रोडमलीयत । मातरीवार्भको विस्रम्भं च महान्तमियाय ।

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

बलिनोर्विदुषोस्तयोस्तु सन्धिं दृढमुद्वीक्ष्य सुविस्मितान्तरौ तौ ।
नकुलस्सच कौशिको निराशौ निलयं स्वं स्वमवापतु स्त्रपार्तौ ॥
अथ विलोक्य गतौ स्वरिपू उभौ नकुलरात्रिचरौ स तु मूषिकम् ।
शितरदश्शनकैश्शनकैर्मुदा रचयितुं समुपारभत च्छिदाम् ॥

अब्रवीच्च बिडालो मूषिकं ।

किं त्वं मामवमन्यसे कृतकृतिः किं पाशसंछेदने
नो यत्नं कुरुषे रयादहमिह क्लिश्नामि बद्धो दृढः ।
तस्मान्मूषिक विद्वदुत्तम सुहृत्कार्ये त्वया त्वर्यतां
जाने तावकविक्रमं कथमिदं मान्द्यं त्वया नाट्यते ॥ इति ।

तच्चाकर्ण्य मूषिको व्याजहार मार्जारम् । मित्र जोषमास्व किमियान् संभ्रमः । किमर्थं वा त्वरसे ।

"वयमेवात्र कालज्ञा नकालः परिहास्यते ।
अकाले कृत्यमारब्धं कर्तुं नार्थाय कल्पते ॥
तदेव काल आरब्धं महतेऽर्थाय कल्पते ।
अकाले विप्रमुक्तस्य तवचापि भयं भवेत् ॥
तस्मात् कालं प्रतीक्षस्व किमिति त्वरसे सखे ।
यदा पश्यामि तं व्याधमायांतं शस्त्रपाणिनम् ॥
ततच्छेत्स्यामि ते पाशान् प्राप्ते साधारणे भये ।
तस्मिन्काले प्रमुक्तस्त्वं तरुमेवाधिरोक्ष्यसि ॥"

तस्मात् सर्वमुचिते काले समाचरितं चेत् फलमधिकं दोग्धि । तदा मोचितस्त्वमन्यत्किमप्यविगणय्य जीवितमेव बहुमन्यमानस्तद्रक्षणार्थं दृष्टमात्रे व्याधे तरुमधिरोक्ष्यसि । अहं चारूढशाखं त्वां वीक्ष्य गतभयो बिलं प्रविशेयं इति ।

मार्जार उवाच—हा प्राज्ञ मूषिक कथमीदृशी तव मतिरुपस्थिता । त्वरमाणेनैव हि मया त्वं संवीक्षितः । कथं भवान् पूर्ववैरमनुस्मरन् मद्रक्षणे कालं जिहीर्षति । दुष्टचरिता मूषिका इति व्यक्तमेतेन । कथमापन्नानवनोद्भवमजिनं न गण्यते । तथासत्यायुः किल संक्षीयेत । अज्ञानान्मया रचितपूर्वमप्यागः क्षम्यताम् । प्रसीद इति ॥



मूषिक उवाच—श्रुतं स्वकार्यपरस्य भवतो वचः मामप्यात्मवत् पश्य ।

"यन्मित्रं भीतवत्साध्यं यन्मित्रं भयसंहितम् ।
संरक्षितव्यं तत्कार्यं पाणिस्सर्पमुखादिव ॥
कृत्वा बलवता संधिमात्मानं यो न रक्षति ।
अपथ्यमिव तद्भुक्तं तस्यानर्थाय कल्पते ॥
न क्वचित् कस्यचिन्मित्रं न कश्चित् कस्यचित् रिपुः ।
अर्थतस्तु निबध्यन्ते मित्राणि रिपवस्तथा ॥
अर्थैरर्थानि बाध्यन्ते गजैर्वनगजा इव ।
न हि कश्चित्कृते कार्ये कर्तारं समवेक्षते ॥
तस्मात् सर्वाणि कार्याणि सावशेषाणि कारयेत् ।

छिन्नभूयिष्ठ एष ते पाशसंचयः परन्त्वेकमवशिष्यते । तमपि छेत्स्यामि निर्वृतिमास्स्व इति ।

इति वदतोश्च तयोः क्षणादिव व्यतीयाय विभावरी । उदियाय च त्रयीमयं ज्योतिः । जहर्ष च कमलिनी । ववौ च शीतलस्पर्शो वातपोतः । आगमच्च वटस्य नातिदूरे व्याधापशदः ॥ य एवं ।

घोरश्शस्त्रधरश्श्वभिः परिवृतस्तीक्ष्णैर्नियुद्धोत्सुकैः
नीलस्थूलवपुः कराळवदनो लम्बश्रवा निष्कृपः ।
वृन्तोन्निद्रवमत्स्फुलिङ्गनयनो हिंसारुचिर्दुर्मतिः
कल्पान्तस्थकृतान्तभृत्यसदृशः कक्षे दधौ वागुराम् ॥

दर्शनमात्रेण तस्य महत् भयमाविवेश मार्जारहृदयम् । त्रस्तचेतनस्स मूषिकं प्रोवाचाद्य किंवा चिकीर्षसीति । मूषिकस्तु धर्ममनुस्मरन् चिच्छेदावशिष्टं च पाशं । छिन्नबन्धश्च स मार्जारो द्रुततरमारुरोह तरुवरम् । एवं स मूषिकस्स्वबुद्धिवैशद्येन ।

जित्वा शत्रुत्रितयं मुक्त्वा घोरं भयं च दुर्मोचम् ।
तीर्त्वा विपदं महतीमाप्त्वाऽसुरुयत् बिलं तु तत् नैजम् ॥
स्तावं स्तावं जगतामीशं सोयं सुरेशमुखविनुतम् ।
ध्यात्वा च गुरोश्चरणौ गोपालार्यश्चकार कृतिमेताम् ॥

---

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

॥ श्रीरामो विजयतेतराम् ॥

# ॥ देवालयस्थभगवदर्चाविधानसंक्षेपः ॥

अखंडमपरिच्छिन्नमप्रमेयमखिलजगत्कारणमव्यक्तं च सच्चिदानंदस्वरूपं विभु नित्यं प्रभु सर्वमयं ज्ञानैकगम्यं भक्तिभाव्यमपारं परात्परतरं परिपूर्णमवाङ्मनसगोचरं तेजिष्ठं महिष्ठमणिष्ठमनादिमध्यानिधनमखिलहेयप्रत्यनीककल्याणगुणैकतानं सर्वज्ञं सर्वशक्ति सर्वोपास्यं वस्तु जागर्तितमामविरतं ब्रह्मशब्दवाच्यम् ।

"ज्ञानेन हीनः पशुभिः समानः" इति तस्य ब्रह्मणो ज्ञानेन विना सर्वोऽपि पशुप्राय एव । तच्च ज्ञानं तदुपासनारूपम् । उपासनं च निष्कलं सकलं चेति द्वेधा । तत्र "क्षीरे सर्पिः तिले तैलं पुष्पे गन्धः फले रसः काष्ठेऽग्निरिवान्तर्बहिश्च तत्सर्वं व्याप्याकाशोपमं 'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः" इति विष्वग्व्याप्नुवानं सर्वेशानं सर्वप्राप्यमत एव नारायणपदाभिधेयं परंब्रह्म हृदयकमलान्तराकाशोपलब्धवह्निशिखायां यदुपास्यते तन्निष्कलं इदन्तु योगिनामपि प्रायशः दुस्साधं सकलोपासनमेव नियतानामपि प्रयतमानानां सुकरोपायः स उपायस्त्वालंबनं विना नैव सुकरः । आलम्बनं चार्चास्वेव सुगमं भवति । एतदेव समूर्तार्चनं जगदुज्जीवनाय मरीच्यादिभिरनुजगृहे । इदं विधानं पञ्चमवेदाभिधाने भारते स्पष्टं समुपवर्ण्यते यथा—

"सुरूपां प्रतिमां विष्णोः प्रसन्नवदनेक्षणाम् ।
कृत्वात्मनः प्रीतिकरीं सुवर्णरजतादिभिः ॥
तामर्चयेत्तां प्रणमेत्तां जपेत्तां विचिन्तयेत् ।
विशत्यपास्तदोषस्तु तामेव ब्रह्मरूपिणीम् ॥"



भगवतापि गीयते ।—

"महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥" इति ।

अत्र ज्ञात्वेति ज्ञानमुक्तं भवति, अनन्यमनस इति तदेकपरतारूपभक्तिरुक्ता अतो भजनमर्चनमित्यवगम्यते इत्यलं । अतः सर्वथा सर्वसमाराध्यार्चार्चनविधां संग्रहेण ब्रूमहे । अर्चको निर्वर्तितनित्यकर्मा धृतोज्वलद्वादशोर्ध्वपुण्ड्रस्सन्धृतपद्माक्षपवित्रसूत्रतुलसीदामा कट्यां संवेष्टितमूत्तरीयः सुप्रक्षालितपाणिपादः स्वाचान्तः प्रदक्षिणीकृतालयो भगवदावसथं गोपुरे वासुदेवध्यानपुरस्सरं प्रविश्य विमानमानम्य द्वारदेशं गत्वा तत्राधिष्ठितान् चण्डप्रचण्डादीन् प्रणम्य सोपचारं तत्र यन्त्रिकादि विनिवेद्य पुनस्तदादेशेनैव प्रतिगृह्य कवाटमुद्घाटयेत् । ततोऽन्तः प्रविश्य दीपादीनुद्दीप्य शिष्येण घटमानाय्य संनिहितनदीतटाककूपेषु पूर्वाभिमुखंवोत्तराभिमुखं वा स्थित्वा घटमाप्लावैः[1] पूरयित्वा वस्त्रेणावेष्ट्य स्रक्चन्दनादिभिरलंकृत्य नारिकेलचूतशाखाभिरपिधाय भगवत्पारिषद्गजेन्द्रकुंम्भे विन्यस्य स्वस्तिवाचनपुरस्सरं सर्ववाद्यसमायुक्तमालयं प्रदक्षिणीकृत्य भगवन्मन्दिरमवगाह्य गजेन्द्रगण्डस्थलात्ततो दिव्यकुम्भमवरोप्य भगवदुपकण्ठकल्याणवेदिकायां निवेश्यैलोशीरगन्धादिभिर्वासयित्वा तदुपरि पुण्याहं वाचयित्वा दिव्यालयं मन्त्रपूततीर्थैर्मन्त्रोच्चारणपुरोगं प्रोक्ष्य गोमयेनोपलिप्य रंगवल्ल्यादिभिरलंकृत्य तदनन्तरं देवसिंहासनं संशोध्य भगवतः शयनाधिवासानुगृहीतानि पुष्पादीन्यादाय शेषाशने[2] समर्पयेत् । तदनन्तरं संकल्पिताभिगमनाराधन आराधकोऽर्घ्यादिभिः भगवन्तं षोडशोपचारसहितमभ्यर्च्य मुद्गान्नं सहक्षीरं निवेद्य पंचांगं श्रावयित्वा हविर्भक्तेभ्यो विनियुज्योपक्रान्तप्रातराराधनोऽर्चक आराधनोपकरणपुष्पगन्धधूपदीपागरूशीरतुलसीमञ्जरीवनमालावैजयन्तीघृततैलमात्राच्छत्रचामरव्यजनादर्शालंकारदीपनीरा-

(1). आप्लाव = Water (Vedic term).

(2). शेषाशन=विष्वक्सेन according to आगम ।

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

जनकुम्भसन्ध्यारक्षापात्रशंखभेरीपणवपटहकाहळीमुरलीनिस्साणमुखमंगलवाद्यानि संभृत्य पूजार्हद्रव्याणि विशोध्य वादकानमरान् गणिका अप्सरसः परिचारकं गरुडमात्मानं नारायणं मन्यमानः कुम्भे वरुणमावाह्य शोषणादिभिः विशोध्य संशोधितानि पंच पात्राण्यद्भिः पूरयित्वा पुष्पगन्धाद्यैरभ्यर्च्याभिमन्त्र्य रक्षोनिरसनदक्षां घण्टां निनाद्य तत्प्रभृतिशंखभेरिकादींश्च तत्र द्वाराधिष्ठितदेवता बलिनिर्हरणपर्यन्तं समुद्घोषणाय स्थापयेत् । अथार्चकः कूर्मासने पद्मासनं परिकल्प्य सर्वाधारं सनातनमिति पीठमूलेऽभ्यर्च्य तस्योपरि सहस्रफणोपेतं फणिराजं ध्यात्वा दिग्गजान् परिकल्प्याधारशक्तिं ध्यात्वा तदुपर्यर्णवाननेकान् तन्मध्ये सहस्रपत्रं कमलं संकल्प्य तन्मध्ये कोकनदमयं पीठं ध्यात्वा तन्मध्यभागे श्रीमन्नारायणमाकलयेत् । ततः पूजकः कूर्मासने तिष्ठन् सप्रणवं सप्तव्याहृतिसाहितां गायत्रीमेकदा त्रिरुपांशूच्चारणपूर्वकं प्राणानायच्छेत् । सांगन्यासमथ मन्त्रराजं जप्त्वा हृत्पुण्डरीकसमासीनं पुण्डरीकाक्षं भूतशुद्धिपूर्वकं मानसपूजाविधया समभ्यर्च्य वामे वारिपात्रं दक्षिणे तुलसीकुसुमादिकमग्रेर्घ्यपाद्याचमनीयस्नानीयशुद्धोदकप्रतिग्रहपात्राणि निधायार्घ्यपात्रादर्घ्यजलमुद्धरण्या सतुलसीदलमुद्धृत्याभिमन्त्र्य भगवद्दिव्यमंगलविग्रहसुमनस्स्वात्मनः प्रोक्षेत् । तदनु भगवन्तमासनसमर्पणेन निमन्त्र्य बिंबस्य मूर्ध्नि विष्णवाद्यावाह्य नियमेनार्घ्यादीनि निवेद्य स्नानार्थं स्नानासनसमर्पणेन निमन्त्र्य पादुकासमर्पणं यथासमयमाकलय्य पुरुषसूक्तानुवाकेन तमभिषिच्य नीराजनाचमने प्रदाय पीताम्बरब्रह्मसूत्राभरणपुष्पालंकारगन्धधूपदीपादीन् सोपचारं परिकल्प्य मन्त्रपुष्पाक्षतं मंगलाशंसापूर्वकं दिव्यबिंबमूर्धनि निक्षिप्य मात्रां[3] दत्वा श्रुतिसुखाभिः श्रुतिभिः स्तुत्वाऽष्टाक्षरद्वादशाक्षरमननपूर्वकं विशुद्धदेवदासीहस्ते पुष्पांजलिं विकीर्य,ता मंगलवाद्यैर्घटदीपसहितं भगवन्तं परिवर्त्य ततो नैवेद्यं समर्पयेत् । महाहविस्सोपचारं निवेद्य निर्वर्त्य च नित्यहोमं तदन्वालयाश्रितदेवानामनन्तगरुडविष्वक्सेनादिपरिवारैर्भक्तबिंबैश्च सह पूजां विधाय ते-

(3). मात्रा=द्रोणमात्रतण्डुलदानं or प्रस्थद्वय..........



भ्यो हविर्निवेद्य भगवते यात्रासनं समर्प्य यात्रादानं दत्वा बल्युत्सवमाभूतबलि निर्वर्तयेत् । ततोऽर्चकः क्षालितबलिपात्रः शोधितपाणिपादः स्वाचान्तः सोपानमध्ये बलिबेरमास्थाप्यार्घ्यपाद्याचमनीयैः नीराजनं वितीर्यापूपान् निवेद्य तौर्यत्रिककृतः त्रिः प्रदक्षिणं देवं कारयित्वा बलिबेरं स्वास्थाने निवेश्य भक्तान् प्रतिगृह्णीयात् । अथेज्याराधनमाराधकः संकल्प्य षोडशोपचारैर्भगवन्तमभ्यर्च्य दध्यन्नं निवेद्य भागवतेभ्यो वितीर्य सायंपूजां उपक्रमेत । यथाविध्युपक्रम्य सन्ध्याकालिकाराधनं भगवन्तमर्घ्यादिभिराराध्य द्राविडवेदं संश्राव्य मुद्गान्नमाषापूपान् विनिवेद्य भागवतेभ्यो विनियुज्य सेवार्थिनश्च प्रतिगृह्णीयात् । अथ रात्र्याराधनमुपक्रम्य यथा प्रातर्निर्वर्तयेत् । अथार्चको रात्रावर्धयामाराधनमुपक्रम्य भगवन्तं मध्याह्न इव समाराध्य क्षीरान्नं निवेदयेत् । ततो दिव्यमंगलविग्रहेभ्यः पर्यंकासनं दत्वा पृथुकदलीपायसक्षीरादीनि निवेद्य कर्पूरनीराजनं समर्प्य मंगलगीतानि श्रावयित्वा भक्तेभ्यो भागवतेभ्यो भगवन्निवेदितं विनियुज्य कौतुका[4]दिबिम्बशक्तीः ध्रुवबेरे[5][6] समारोप्य क्षमापकमन्त्रेणापराधक्षापणमाशास्य कवाटं संवृणुयात् यन्त्रिकादि मणिकादिहस्ते निधाय गमनानुदेशं प्राप्य स्वगृहमाराधको गच्छेत् ।

एवं नित्यार्चनविधिः ।

## आराधनविशेषः ॥

भृगुवासरे पृथङ्मूर्त्याः श्रीमहालक्ष्म्या माध्याह्निकेज्याराधनानन्तरमलङ्काराभिषेकं निर्वर्त्य मधुरान्नं निवेदयेत् । एवं निर्वर्तितमध्याह्नपूजोर्चकः स्वानिलयं गच्छेत् । सायमाराधनानन्तरं समर्पितविहारयात्रासना भगवती

(4). कौतुकबेरं=लोहनिर्मितस्थानैकवर्तिध्रुवबेरादावाहनीयं बेरं

(5). ध्रुवबेरं=मूलबेरं शिलासुधादार्वन्यतमनिर्मितं प्रधानबेरं

(6). बेरं=अर्चाविग्रहविशेषः

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

परमेशाना समालब्धषोडशोपचारा परिगतवेदागमा विमुखरविप्रगणा, छत्रचामरादिसर्वोपकरणा यथासम्भवमनुगतगजतुरगादिसर्वपरिवारा घोषितनानावाद्यघोषा पोषितसर्वविलासा तोषितभक्तकदंबा शोषितसेवितृखेदा सरसविलासचंक्रमणरमणीया मन्दमन्दमुपसंवाहितदण्डिकाविलसितदिव्यदेहा देवालयान्तरितादिव्यारामे क्वचिन्मण्डपरत्ने स्वयं निविश्य कतिपयकालमास्थाय तत्रार्पितप्राज्याज्यघुमघुमायितमाषापूपादिकं स्वीकृत्यालयान्तरितवरण परिवृत्य सम्मुखदेशमण्डपं किंचिदास्थाय तत्रोपचारादि गृहीत्वा त्रिः परिवृत्यानन्तरं स्वस्थानं जिगमिषुः बलिपीठात् परतरद्वारदेशे समर्पितघटदीपं मङ्गलमभीक्ष्य स्वधामसम्मुखमण्डपे डोलामतिवेलहेलामधिरुह्य वेलानुगुणगीतश्रवणसंभृतमोदा तत्र निवेदितफलापूपताम्बूलादि परिगृह्य मन्दमन्दगमना निजवासभवनं गच्छति । एवमेव पंचस्वपि पर्वादिकालेषु च । अवतारर्क्षे भगवान् पुराणपुरुषः सरसविशेषं देवालयाद्बहिः कियन्तं दूरमागत्य चेतनानुज्जीव्य पुनर्यथापुरं स्वानिलयं प्रविशति ।

पञ्चपर्वाणि नाम संक्रमणदिनपौर्णमास्यमावास्याकृष्णाष्टमी कृष्णचतुर्दश्यः । चैत्रे चित्रर्क्षे भगवान् रात्र्याराधनात्परं सङ्कलिपतविहारप्रस्थानः कौमुदीकुतुकी यथोचितसर्वपरिच्छदः परिवेष्टितपरिवारभक्तकदम्बो वापीतटाकादिरोधस्यात्मानं विनोदयितुकामो निर्गत्य पुराद्बहिः तत्रेत्थमामोदितदिव्यान्तःकरणो यथावसरं मध्येप्राप्तसिकतासने परिगृहीतब्रह्माराधनः पारिब्रढ्येन यथापुरं स्वधाम गच्छति ।

वैशाखे तुरगविहगराजस्यन्दनान्दोलिकादिविविधवाहनेषु निखिलजनमोहनेषु विलक्षणालङ्कारलक्षितो ब्रह्मोत्सवमनुभवति । ज्येष्ठमासि शीतोपचारसहितं ग्रीष्मोत्सवं गजेन्द्रमोक्षणगरुडाधिरोहोत्सवं आषाढे परतत्वनिर्णायकसुपर्णाधिरोहोत्सवं श्रावणे पवित्रोत्सवं श्रीकृष्णजयन्त्युपलक्षितशिक्योत्सवं भाद्रपदे नवरात्रोत्सवं शमीवेधोत्सवंच आश्वयुजे दीपावल्युत्सवं



कार्तिकिके वनभोजनोत्सवं दीपोत्सवंच मार्गशीर्षे प्रतिदिवसं प्राभातिकाराधनसहितं अध्ययनोत्सवं गोदोत्सवंच पौषे मृगयोत्सवप्लवोत्सवरथसप्तम्युत्सवान् माघे मखोत्सवदमनिकोत्सवौ फाल्गुने विवाहोत्सव मन्यांश्च वैशेषिकान् विधिविहितानैच्छिकांश्चोत्सवान् स्वीकृत्यानुगृह्णाति भक्तजनान् । एतादृंशि भगवदर्चाराधनादीनि सर्वकर्माणि यज्ञदानादितुल्यतया चित्तशुद्धिद्वारा भक्तियोगं निष्पाद्य मोक्षसाधनानि भवन्तीति सतां संप्रदायः ।

## सेवार्थिनां भगवदालयाभिक्रमप्रकारः ॥

सेवार्थिनो "रिक्तहस्तेननोपेयाद्राजानं दैवतंगुरुं" इति गृहीतभगवन्निवेदनार्हनारिकेलकदलीफलताम्बूलकर्पूरादयो देवालयस्थपुष्करिणीं गत्वा शोधितहस्तपादाः सम्यगाचान्ता बलिपीठं साष्टाङ्गपातं प्रणम्य द्वारपालकानानम्य प्राप्यचानुमतिं सोपदं पृथङ्मूर्तिदेवीपुरुषकारपुरोगं भगवत्सन्निधिमुपसरन्ति । दिव्यदेशेषु भगवदर्चोत्तमकल्याणमूर्तिसिसेविषया बहवः तीर्थयात्रिकाः जानपदाः पौराश्च प्रत्यहं बद्धसङ्कल्पाः शुद्धचित्ताः कतिचनाभीष्टलिप्सवः कतिपये चित्तनैर्मल्यसिसंपादयिषवः कतिचित् पुष्कलदर्शनमात्रकुतुकाः कत्यपि तत्र प्रपठ्यमानवेदवेदाङ्गानुसन्धानकुतूहलपरायणाः एके तच्छुश्रूषवोऽन्ये भगवन्निवेदितामृतसमास्वादसञ्जनितामोदलिप्सवः एकतरे पित्र्यं पारंपर्यं धनमिव भगवद्दिव्याभिषेकपुण्यतीर्थं प्रथममीप्सव आविष्कृतकुलबिरुदा बहिष्कृतसङ्कोचा अन्यतरे च नानामनोरथाः साक्षाद्वानुषङ्गेणवा तत्तच्छुद्धसत्वसंपूर्णभगवत्सन्निधिमतो दिव्यार्चामङ्गलविग्रहान् संपश्यन्ति कृतार्थयन्त्यात्मानं सहसात्मस्वाभाव्येन परमात्मनि कमपि परभक्त्यमृतधारासंबन्धं संलभन्ते । एवं समागता भगवत्सन्निधावर्चकमुखेन श्रुतदिव्यबिंबशक्तयः तुलसीकुसुमादिभिर्भगवद्दिव्यबिंबचरणपुपूजयिषवो भवन्ति । तदा तेषामुपायनान्यर्चको गृहीत्वा देवान्तिके निधाय भक्तानां

(7). उपदा=उपायनं

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

सौकर्यानुगुणां लोकोपकाराय पाराशरिप्रकटितैः सहस्रेण दिव्यनामभिरष्टोत्तरशतैर्वा कदाचिद्द्वादशभिर्वा तेषां गोत्रनामनी भगवन्तं श्रावयित्वा तदभीष्टसिद्धिं सङ्कल्प्य भगवत्पादौ तुलस्यादिभिरभ्यर्च्य तदुपहृतं भगवन्तं विनिवेद्य भक्तप्रसादनकृते कर्पूरनीराजनं दिव्यबिम्बसमक्षं त्रिः मन्थरं मण्डलीकृत्य प्रमुखे तद्विकीर्य तेभ्यः तीर्थगन्धपुष्पादीनि यथाक्रमं प्रदाय श्रीवैकुण्ठनाथदिव्यपादपीठाभरणभूतं श्रीशठकोपं तदुत्तमाङ्गादौ निक्षिप्य तानुज्जीव्य पुनस्तत् स्वस्थाने भगवतः पुरतो विन्यस्य भगवन्निवेदितं यथासंप्रदायं तेभ्यो वितीर्यान्यानपि सेवाप्रतिपालकान् एवमेव प्रतिगृह्य प्रसाद्य प्रेषयति ।

## ॥ भगवत्सेवाशैली ॥

सेवासमये भगवन्महिमबोधिकाः स्तुतीः यथाज्ञानभक्त्यभिलाषं बहवः पठन्ति सेवार्थिनः । कतिचन जोषं ता मन्वते । कृत्वैवं भगवदनुमतिं लब्ध्वा भगवदालयबलिपीठप्रादक्षिण्येन विषयवासिनः साक्षाद्गृहाणि गच्छन्ति । वैदेशिकास्तु बलिपीठात् पुरतः क्वचित् कतिपयक्षणानुपविश्य ततो निलयं गच्छन्ति । एवं ययाकयाचन विधया तत्क्षणेवा कालान्तरे वा साक्षाद्वा परंपयावा देवालयसमागताः समुज्जीवन्तीति स्पष्टम् ।

---

(8). विषयवासिनः=तद्देशवासिनः ।

---



Meanwhile Rakshasa was pursuing, in the court of Malayaketu, his schemes of revenge; grief for his late masters was eating him up; his bereaved heart left him little energy for prompt action. In the field he could be brave; but he now lacked spirits for the persistent working out of a policy. Even his memory was playing him false; he could not recognise his own men—so much so that Viradhagupta, one of his spies, had to employ the quaint device of an *anyâpades'a sloka* to rouse the slumbering faculties of his woe—begone master. Well, after all he was a slow witted statesman. And he was now and then dreamy too. For he flies up immediately on mention of enemies beleaguering the city, though it was only a history related to him of what had taken place far back. With his brains thus muddled, what chance had he against the adroit and cool-headed Chanakya? Yet his sorrow and confusion do him honour. But he was not wanting in shrewdness, for in the midst of all his grief and dispondency he could point out the mistakes of his agents and with true political instinct guage the motives and policy of his deep-scheming adversary.

The seeds of Chanakya's policy were now slowly shooting up. Siddharthaka restored to Rakshasa the much lamented Sakatadasa reported to have been executed and Rakshasa, in a fit of gratitude, rewarded him with the jewels which had once been presented to him by his royal master Malayaketu, and took him into his service unsuspectingly. Thus by a variety of means had Chanakya succeeded in getting his own men into Rakshasa's service—his own spies and agents, who were ready, when time came, to deliver the deluded Rakshasa into his hands.

The next move of Chanakya was to make the world believe that an estrangement had grown between himself and his protege Chandragupta. Chanakya, haughty and proud, had got disgusted, it was rumoured, with the ways of Chandragupta who had become conceited and vain of his imperial dignity and the minister publicly retired from his post and would have nothing more to do with the ungrateful upstart. Rakshasa swallowed the rumoured rupture and dismissed Chanakya henceforth from his thoughts. Bhagurayana, now the trusted adviser of Malayaketu, was slowly working to awaken suspicions in that prince's mind about the fidelity of Rakshasa, giving, as if guided by no motives of personal ill-will, various interpretations of the minister's conduct, some favourable, others vaguely mischievous, the balance showing that Rakshasa might be a traitor after all. Thus Malayaketu gradually got accustomed to suspect his minister, so that when the catastrophe should come, he

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

might readily swallow those dishes of lies that would be set before him then.

The time is coming near when the policy of Chanakya is to bear fruit. It was an opportune time that that great statesman chose for the catastrophe. The whole camp of Malayaketu under the lead of the brave and noble Rakshasa is moving towards the city of Pataliputra. There was Bagurayana skilled in the art of sowing distrust between friends, Indusarma acting the part of a Jivasiddhi, ready to betray his confiding friend Siddharthaka, biding his time to substantiate the greatest calumny possible against Rakshasa, and the officers of the army, Bhadrabhata and others, waiting for the order of their master (Chanakya) to bind Malayaketu hand and foot, and deliver him over to his foes—all trusted servants of Malayaketu and Rakshasa, but always secretly loyal to their true master the deadly foe of both. When all these forces with all these secret corruptions, were encamped within a short space of Pataliputra, Chanakya gave the signal to the traitors in the camp to carry out his Machiavellian schemes. One by one, all of them are carried out and in the end Rakshasa stands alone, the sole remaining blasted trunk after a conflagration.

First, that old story about the murder of Parvatesvara is let out of the bag. By the advice of Bhagurayana secretly instructed doubtless by Chanakya, Malayaketu instituted a system of vigilance by which nobody was allowed to go out of the camp who had not obtained a passport from Bhagurayana. Indusarma assumes a purpose to go to Pataliputra and in his Buddhistic disguise goes to Bhagurayana for a pass. The latter wishes to know the reason of his going. The false Buddhist pretends to have become disgusted with his hitherto wicked life and declares his intention to give up such practices entirely. What practices! Here is food for curiosity. Bhagurayana would not give him the pass unless his curiosity was satisfied. With seemingly great reluctance the supposed Buddhist unfolded a wonderful tale of horror, how Rakshasa by the help of his magic caused Parvatesvara to die, and how that traitorous schemer was even then engaged in a more horrid plot to which, now repentent, he would not consent and to avoid which he was now packing off to Pataliputra. This horrid calumny, related with proper disguises, produces the expected effect on the deluded prince Malayaketu who happens just then to be over hearing the whole. Horror at the treachery of so trusted a friend and the thirst for revenge on the foul murderer of his father so stirred the soul of the prince that the life of Rakshasa was saved from his wrath only by the ingenuity of Bhagurayana.



Meanwhile Siddarthaka is caught trying to escape from the camp without a pass and bearing a letter and a box of jewels and is promptly carried to the presence of Malayaketu. Bhagurayana is with him. The letter is unceremoniously plucked from him and opened. The seal on the outside is easily recognised to be that cf Rakshasa. But the matter within is nothing. The letter prudently names no names and hence excites suspicion. But they can learn nothing from it. It contains an acknowledgment of something, jewels, received and mentions other presents sent along with the letter in return for these, and directs that further information should be learned by word of mouth from the bearer. The man is ordered to name the addressee and on his pretending compunction to betray his supposed master, a summary administration of the rod rids him of all objections and he opens his roll of treachery. The letter is addressed to Chandragupta and Rakshasa is the sender of the message of which the verbal portion is to commend five vassal kings in Malayaketu's camp to shares in the spoils of their betrayed master. All this is believed by Malayaketu and Rakshasa is called out and confronted with these proofs of his guilt. The letter is sealed with his seal, the jewels sent along with it are proved to have been those that Rakshasa was presented with by the prince, the writing is in the hand of Sakatadâsa, his confidential clerk, and he himself is seen wearing those jewels of Parvatesvara that Chanakya had caused to be sold to him, which, being stated in the letter to have been sent him by the addressee supposed to be Chandragupta, appears to Malayaketu as the price that the latter paid Rakshasa for the task of betraying his lord. Everything appears to be against him and he is declared a traitor though his life is spared in sheer contemptuous mercy. The five kings mentioned by Siddharthaka as traitors in the pay of Chandragupta are promptly put to death. There ensued at the heels of this execution a rebellion in the camp whereupon the traitors under Bhadrabhata bind up Malayaketu hand and foot and deliver him over to Chandragupta. At the same time Chanakya *publicly* reassumes his never deserted position of Dewan, and directs his energies towards the humbling of the haughty Rakshasa.

Chanakya had in custody the stout hearted Chandanadasa and Rakshasa with his prospects of revenge utterly washed away could find nothing else for him in the world to live for, except the liberation of that self sacrificing friend. His heart desolate by the failure of those schemes that his loyalty had prompted, he returned to Pataliputra alone, skulking like

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

thief among the ruined parts of the city. There in a decayed grove brooding on his sorrows, lamenting the destruction of the Nandas, recalling scenes of their former glory, and reflecting on the dire change, his wandering wits are focussed by the sight of a man about to hang himself. What misery, what despair could have spurred him to such an act! Sympathy for a fellow-sufferer pricks him on to questoning him. The man seems very unwilling to live one wretched moment longer and eager to leave this miserable and dreary world and is with difficulty induced to relate the cause of his meditated suicide. The story is one of faithful friendship and cruel separation, how Chanadanadasa was going to be executed for concealing Rakshasa's family, how Vishnudasa was going to give up his life that he might not out-live the loss of his friend and he himself was going to die for his friendship to the latter. Rakshasa's conscience now smote him hard for his neglect of his heroic friend Chandanadasa and to atone for it he resolves to surrender himself as a ransom for the merchant. Hurrying to the place of execution he is arrested and carried to Chanakya and Chandragupta. To save the life of a friend he swallows his pride that would not stoop to service under the usurper that murdered his old masters. The great Rakshasa resigned his enmity and became Prime Minister of the Emperor Chandragupta. Rakashasa gained, Chanakya's hearts desires were attained, and the great man tied up his hair in token of the *fulfilment of his vow* and handed over the sceptre of office with the greatest pleasure to so long his mortal foe, and contentedly retired to the forest to practice penance, his mind being little allured by the vanities of the world.

This is the story. And where is the effect? Where does it lie after all? This is the matter that the author has adroitly worked into the play. But how is it that the author invests the whole with life, makes it a great power in the realm of literature, renders the work an excellent recreation for the intellect or the heart? This is the question that puzzles us.

Clearly we have nothing to do but to investigate the manner in which the author has arranged the incidents and pictured them forth in language. There are two great charms that a work must not fail to have a work that is to please and to instruct. These can be very beautifully defined by two words; the one we shall call system, and the other tone or music. The first has to do with that gift of man which goes by the name of intellect; for it is that which requries cogency and truth. The second is essentially a faculty of the *heart* having reference to feeling, what may be called poetic effect.

(*to be continued*).

## THE S'RI—SUKTAM.

The *S'ri-Sûktam* is a *vedic* hymn in honour of *S'ri*, the Goddess of plenty and prosperity. It consists of fifteen *riks* and is found at the close of the fifth Mandala ot the Rigveda, but is expressly called *paris'ishta* or supplement. There is a manuscript commentary avilable, probably by *Vidyâranya*, as it commences with his usual benedictory *S'lòka*;

यस्य निश्वसितं वेदाः यो वेदेभ्योऽखिलं जगत् ।
निर्ममेतमहं वन्दे विद्यातीर्थं महेश्वरम् ॥

'I worship the Supreme Lord, *Vidyàtìrtha*, whose breath the Scriptures are and who created all the universe from the Vedas.'

There is a two-fold reference in this opening *s'loka* of *Vidyâranya*—one to the Supreme Being from whose eternal word sprang all things that exist, and one to *Vidyâtirtha*, the spiritual preceptor of *Vidyâranya*, who represents, to the devout desciple, the Supreme Lord incarnate on earth in human form to teach him divine wisdom. Through the *Acharya* the Vedic Truth is learnt and by the Vedic Truth is revealed the universe in its real nature. The next *s'loka* of the commentary runs thus.

संप्रणम्य श्रियं देवीं सर्वलोकमहेश्वरीम् ।
पुमर्थसिद्ध्यै श्रीसूक्तं व्याक्रिये श्रीप्रसादतः ॥

'Having worshipped the Goddess *S'rì*, the Supreme controller of the world, I explain the *S'rí-sûktam* through the Grace of *S'rí*, for the attainment of wealth and children'.

One of the 108 Upanishads, entitled *Saubhâgya Lakshmi Upanishad*, devotes its first part to the method in which the *Sri-sûktam* is to be utilised. A certain *yantra*, of a particular geometrical shape, is to be drawn; the several half verses of the

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

*Sûktam* are to be inscribed on the several *petals* of the figure. The Goddess is then invoked and entreated to grace the *yantra* with her presence. Then follow certain *dhyâna* ślokas in praise of the Deity. The *sûktam* is then to be recited a certain number of times with concentrated attention. Then follows *tarpana* or offering of water to the Goddess with the same hymn; then oblations in the sacred fire; and a feast to worthy Brahmans closes the ceremony. The Upanishad then goes on to say that only those who pray to the Goddess with a pure and disinterested heart—a heart untainted by sordid motives, avarice, greed or envy,—only such secure the grace of the Goddess and the fruits of *S'ri-vidyâ*:

निष्कामानामेव श्रीविद्यासिद्धिः न कदापि सकामानाम् ॥

By *S'ri-vidyâ* is to be understood here only the *S'ri-sûktam*—not the Sâktaic cult which the term generally denotes.

RIK. I.

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।

चन्द्रां हिरण्मयीं लक्ष्मींजातवेदोम आवह ॥

*Meaning*. Oh thou, (Agni) that hast knowledge of all things born, for me do thou invoke the golden-complexioned Lakshmi, antelope—shaped, wearing a garland of gold and silver flowers, resplendent as the moon and having a body made of (molten) gold.

Notes. *Harinim* may mean 'antelope-shaped' or 'yellow-coloured'. Both meanings are noted by the commentator; but 'yellow-coloured' is implied by the last epithet 'having a body made of gold.' The commentator notices the *puranic* tradition that *S'ri* once took the shape of an antelope and roamed the woods.

*Chandrâm*. 'resplendent as the moon' or 'having the moon as one of her forms.'



The idea seems to be that whatever is beautiful in nature, whatever gladdens the sight of man or contributes to his delight and enjoyment—the timid and fair-eyed fawn, starry gems and burning gold, the lovely woods and the lovelier blossoms gold or silver tinted, 'the full-orbed queen of night that as she walks the heavens sows the earth with orient pearl'—these are all of the essence of *s'ri*. *S'ri* thus symbolies the Divine Force that blends the multifarious appearances of the universe into one harmonious whole, the graceful hand divine that 'wheels the silent spheres, works in the secret deep, shoots steaming thence the fair profusion that spreads the spring and with transport touches all the springs of life.'

*Agni* is the messenger of the Gods—carries to them the oblations offered by the sacrificer or calls them down to partake of his libation and bless him. As the libation is poured on the glowing fire, the bright flames leap up and the curling smoke, laden with fragrance, rises up heavenward, and the flames seem to say to the enraptured devotee, "Thus do we take up your offering," and the smoke seems to say, "Thus do I, your offering, go up to the gods." Such were the *living* ideas of the vedic days, when time had not petrified these symbols into forms and when self-sufficiency had not degraded them into superstition. It is a beautiful idea—this—that fire is the messenger of the Gods; and the present *rik*, in harmony with this graceful conception, calls on Agni to invoke the Goddess of prosperity.

RIK II.

तां म आवह जातवेदो लक्ष्मीमनपगामिनीं ।

यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥

*Meaning*. Oh thou, Agni, that hast knowledge of all things born, do thou invoke for me that Lakshmi who, once she comes, goeth not away,—through whom, (invoked,) I shall obtain gold, cows, horses and men (*i. e*, children, friends and servants).

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

*Notes.* *Anapagáminím.* The rik appears to distinguish between the freaks of fickle fortune that seems to smile now, only to frown the next moment, and the never dying happiness that flows through the grace of Lakshmi. The success that now and then appears to attend unaided human efforts, success that is not based on the permanent foundations of trust in Providence, is as deceitful as the calm and loveliness of the sea just before a storm is brewing. It is the favour of *S'rí* alone (who represents the grace and the love of the Almighty Power) that can confer undying bliss and usher in a tide of wealth, fame and children, that knows no ebbing.

RIK III.

**अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम् ।**

**श्रियं देवीमुपह्वये श्रीर्मादेवीजुषताम् ॥**

*Meaning.* I invoke the goddess *S'rí,* who (rides in martial glory) with horses in front, and chariots in the centre, and who delights in the (mighty) roar of elephants. May the Goddess *S'rí* attend me.

*Notes.* '*Pramodiním*' is the northern reading. The southern reading is '*Prabodhiním*', which the commentator follows. We have adopted the northern reading and translated the expression as 'who delights in the roar of the elephants'. The commentator interprets the other expression to mean 'who rouses the world (into awe and admiration) with the mighty roar of elephants.'

This *rik* prays for success in war, prancing steeds that lead the van, shining chariots driven by haughty warriors, and elephants in *must* that as they roar in wild exuberance of spirits instil fear and amazement in the sternest of hearts.

The pomp and pageantry of a military procession, the 'clattering cars' the rushing steeds, the roaring elephants, the warriors in glittering steel, the majestic attractiveness that pervades the scene—all this represents one aspect of the goddess *S'rí,* and victory in war is her doing however much man may vaunt and take to himself in his arrogance.

(*to be Continued*).

## ॥ नियतिः ॥

गरीयसी सा नियतिर्जगत्पतेः संकल्पमाश्रित्य फलं प्रदोग्धि ।
जिजीविषा यस्य तु तां प्रतार्य वार्धिं स हस्तेन जडस्तितीर्षेत् ॥

पुरा खलु काश्यां महात्मा सकलशास्त्रतत्वज्ञ आसीत् कश्चिदग्रजन्मा ।
स च गंगायामन्वहं-स्नात्वा-शुद्धः, देवता अभ्यर्चयन्, वटूनध्यापयन्, अ-
द्वैतं विचारयन्, अधर्मं परिहरन्, धर्मविचारणासक्तहृदयः, वैयर्थ्येन नानै-
षीन्निमिषमपि । तं च सर्वे संपूज्य शुद्धशीलत्वात्तस्य "सुशील" इति नाम
चाक्रिरे । तस्य चानुरूपा साध्वी धीमती चारुवृत्ता नाम पत्नी बभूव । स तु
तां मनोनुकूलां सुशीलां ललनाललामभूतां ललितां रतिकल्पाममन्यत प्राण-
समाम् । तन्वंग्यास्तस्या वपुषि वायुवशाद्यदि किञ्चित् तृणं पतेत् तदपि स
गंडोपलं मन्येत । "अपि व्यथस" इति मुहुर्मुहुः पृच्छेत् । केवलं तां शिरीष-
कुसुमवत् प्रयत्नेन पुपोष । सा च भर्तारं गौरवेणोपाचरत् । अरंजयदतीवतमाम् ।
एवमत्यवाहिषत ताभ्यामन्योन्यप्रीताभ्यां दंपतिभ्यां भूयस्यश्शरदः । कदा-
चित् दयितया सह तल्पमधिशयानः समुदैक्षतोपरि लंबमानमेकं पलालं ।
वीक्षमाणस्य च तस्य पुस्फोर वामेतरल्लोचनं बाहुश्च । "किमिदं अकस्मादा-
पतितमनिमित्तेने"ति व्यथमाने च तस्मिन् लंबमानस्स च पलालो मंचे पपात ।
चचाल च किंचित् । अनुपदं च स पलालः कृष्णसर्पाकृतिरुदभूत् । प्रसृ-
तायाञ्च फणायामदृश्यत वैष्णवं चिह्नं । अलक्ष्येताञ्चाधरं लिहत्यौ द्वे रसने ।
तदग्रे च नीलो वान्तो विषबिन्दुः प्रादुरासीत् । रक्तबुद्बुदाकारं क्रोधकलुषि-
तं नेत्रश्रोत्रात्मकमवयवद्वयञ्च वदने व्यरुचत् । क्षणादुदमुच्यत च तद्गृहं
दुर्वारेणाप्यन्धतमसेन । तद्विलोक्य इतिकर्तव्यतामूढः "किमिदमस्मद्गृहे भ-
गवान् भानुरुद्वियाय" इति विभ्रान्तः इतस्ततः परिलुठन् हृदयदयितावक्ष-
सि निक्षेपाक्षियुगलं । तत्र च ।

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

"व्यामायतं कुटिलितस्वकगात्रयष्टिं
शोणाधरातनुविदारकमंजनाभम् ।
क्रुद्धं भृशं तरुणसूर्यनिकाशरत्न
देदीप्यमानशिरसं फणिनं ददर्श ॥
वज्रविद्धशिखरीव भूसुरः दर्शनेन दयितामृतेस्तदा ।
संज्ञया दयितयेव विच्युतः वेपमानतनुरापतद्भुवि ॥"

चिरेणच संज्ञां लब्ध्वा ।

हाप्रेयसि, क्वनुगतासि विसृज्य मां त्वं
चेतस्तुमे त्वयि निबद्धसमस्तभावम् ।
उत्तिष्ठ तत्त्वमिहमे सदयावलोकैः
जातं कृतार्थय परित्यज निश्चलत्वम् ॥
नाथेत्याहूय पूर्वं त्वमिह ममसुखं प्रेक्ष्यचाश्लिष्य किंते
संप्रत्याधिक्यहानिर्विद निखिलमहं पूरयामीति नाथ ।
अस्त्वेतद्दुर्लभं मे तव वचनसुधापानमेतत् कुरुत्वं
व्यावृत्याप्याननेन्दुं मम भुजशिरसि स्थापयैकं भुजं द्राक् ॥

कथमद्यापि मानिनी नाभि भाषते मां । नूनमियं क्रुद्धैव ।

माभून्मानिनि कोपः ते प्राज्ञे भर्तृवत्सले दयिते ।
करुणां कुरुष्व रभसं वीक्षस्वाद्यैव चक्षुरंतेन ॥

(द्रागुपसृत्य मुखमुन्नमय्य) हाहतोऽस्मि नूनमियं प्रयातैव ।

"हादेवि किंवाद्य करोमि मांच नयस्व याता भवतीच यत्र ।
त्यक्तस्त्वया नैव जिजीविषा मे सर्वा ममान्धाः ककुभो विभान्ति ॥"

इति बहुधा विलप्य सत्याकलितोपि सत्याऽयुक्तः पत्न्याः क्रियामपरां निर्वर्त्य धृतिमेवालम्बनदण्डयन् वेपमानोऽपि मन्दं मन्दं सर्पन्तं सर्पन्तमेवानुससर्प । सरीसृपोऽपि सदनात्तस्माद्विनिर्गत्य माहिषीं मूर्तिमास्थाय ।

दीर्घेण वालेन पदैश्चतुर्भिः विषाणयुग्मेन रदैर्मुखेन ।
अन्यैश्च सर्वावयवैः प्रतोल्यां निष्पिष्य जन्तून् कुटिलं दधाव



तत्सर्वं निरीक्षमाणस्सुशीलोऽतीव विस्मितः "किमिद" मिति शङ्कमानएव महिषमनुससार । सच महिषः क्षणादेव मनोहरं युवतिरूपमाधाय श्रान्तिं नाटयन् मतङ्गजगमनेन मन्दं मन्दं काननावनीरुहस्य मूले निषसाद । तत्र च यदृच्छया मृगयार्थमागतौ विदर्भनरपतेस्सोमवर्मणः पुत्रौ इन्दुवर्मभानुवर्माणावन्योन्यबद्धानर्वसख्यौ सहजौ तां ददृशतुः । दृष्ट्वा तां तरुणजनहृदयहरिणहरणजालायमानलावण्यां कन्दर्पदर्पपात्रीभवदन्तःकरणः समन्दस्मितमिन्दुवर्माणं प्राहस्मानुजो भानुवर्मा । "तात, पश्य स्नुषां" इति । इन्दुवर्माच तद्रूपायत्तचित्तः समुदीक्ष्योग्रमनुजमवोचत "दुष्टबुद्धे, नेयं मामकीना स्नुषा, किंतु तावकीनैव प्रजावती ॥ इति ।

इत्थं वदद्भ्यामुभाभ्याञ्च ताभ्यां सुन्दोपसुंदप्रहतया पद्धत्या प्रास्थीयत यमसदनं प्रति । उपरतौ च तौ दृष्ट्वा सा युवतिश्शार्दूलरूपेण काननवासिनो यथेच्छं प्रहृत्य स्वं रूपं सिषेवे । तत्र हि ।

करालासंख्यदंष्ट्राभिर्व्याप्तं मुखकंदरं ।
पाशैश्च बाहुयुगले केशैश्च कपिशैश्शिरः ॥

एतादृशं च रूपमधिष्ठास्नुना संयमिनीमार्गमासेवमानेन तेनाभ्यगाम्यनुचरो नरवरः । "सुशील, गम्यतामितः । दृष्टमद्विलसितोसि" इति ।

सुशीलः—"को भवान्? सामान्यतः पलालरज्जोर्भवतः किमिदमचिन्तनीयं कृत्यं" इति विनयपूर्वमपृच्छत् ।

सोऽप्याहस्म । "अहं हि शमनशासनधारी कोऽपि तदीयो भृत्यः । विविहिताश्च सर्पादिभिः त्वत्पत्न्यादीनां मृतयः । अतः तत्तद्रूपमास्थाय निर्वर्तितं धर्मराजशासनं । सेवनीयं देवपादमूलं । गम्यतामलमनुगमनेन" इति ।

विप्रः—"तथासत्युच्यतां कदा मे मृतिः?" इति ।

यमकिङ्करः—"गुप्तमेतदतीव । नैतत्कथनीयं" ।

विप्रः—"कथयित्वैव यातव्यं । नोचेत् सदाचारप्रभावेन भवन्तमनुगन्तुं यातोस्मि ।

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

यमकिङ्करः—कर्णे "एवं तेऽवसानं" इति कथयित्वाऽन्तरधात् ।

विप्रस्तत्प्रभृति गङ्गास्नानं परित्यज्य त्यक्त्वाच वाराणसीवासं दक्षिणकाष्ठायाः पराङ्काष्ठां पालयन्तं धर्मपालनामानं नरपालमासेवमानस्सुखमानशे । नृपोऽपि परमप्रीतः सुशीलमर्घ्यादिनाभ्यर्च्य स्वसदसि सदस्यतां वितीर्य सुबहु पारितोषिकं दत्वा ररक्ष । गच्छता कालेन नरपतेः महिषी नियतिर्नाम कौटिल्येन भर्तारमनुरक्तेव संवञ्च्य मन्दुरापतिं कञ्चन चण्डाळं प्रीतिपूर्वमन्वरञ्जयत् । वृत्तमेतद्बहोः कालात् ज्ञात्वा सराजा तत्कौटिलमनुस्मृत्य स्मयमानस्तां निष्कास्यान्यां काञ्चन काञ्चनाकृतिं नयनचन्द्रिकां नाम तरुणीं पर्यणैषीत् । सा च विप्रागमनदिवसात् प्रभृति गर्भमधत्त । अपुत्रो धर्मपालोऽतिहृष्टः " विप्रागमनं श्रेयोनिदान"मिति तं विशेषेणापुषत् । अथ च सीमन्तोन्नयनादिकं यथाकालं विधाय दशमे मासि च पूर्णप्राये नरपतिरतीव तुतोष । अथ च नयनचन्द्रिका उज्वलाकारं मनोहरं सुकुमारं कञ्चन कुमारं प्रासूत । पुत्रलाभतुष्टश्च राजा यथेष्टं गवादीनि विप्रेभ्यः प्रायच्छत् । सर्वत्र नगरे मङ्गळवाद्यानि समघुष्यन्त । सर्वेच पौराः स्वीयमिवोत्सवमतीव समतुष्यन् । महीपतिश्च यथाविधि ततान "बन्धुपाल" इति नाम पुत्रस्य ।

"मासे षष्ठे गते पुत्रः जङ्घाभ्यां विचचार सः ।
क्षोण्याः पित्रा गृहीतायास्संकुचन् पादताडने ॥

अथच पुत्रस्य पञ्चवार्षिकस्य चूडाकर्म चकार धर्मपालो भूपालः । सच पुत्रः पटुबुद्धिस्सर्वामपि विद्यां सुशीलादिभ्योऽभ्यस्य गुरुभ्यः प्रार्थितां कीर्तिं लेभे । एकादशे वत्सरेऽप्युपनीतस्सर्वशास्त्रकोविदतामप्यविन्दत ।

अथ कदाचित् धर्मशास्त्रकारास्समागत्य नृपतिमेकान्ते व्यजिज्ञपन् । " क्षितीश, नियतिं परिणीयाब्दानां त्रिंशदासीत् । साच दुष्टचारित्रा तत्प्रभृति तच्चारित्रापरिज्ञानेन तां च भूयांसमनेहसं पोषितवानसि । अतः पवित्रचरित्रं भवदीयगोत्रं किञ्चित् कळङ्कपात्रमासीत् । तेन च राजातिक्रमेण नहि पर्जन्यः काले वर्षति । नवावाति विना कौटिल्यं वातपोतः । अन्यच्च । भवदीयस्तनय आसन्नविंशवत्सरः किरति जनमनस्यमन्दमानन्दं । तस्य स्वतः पवित्रस्यापि कार्याणि वृद्धैः पवित्रभूयिष्ठानि कार्याणि । अतस्सर्वश्रेयोनिदानं सुरनदीसेवनं क्रियतां । न सा साधारणी नदी । कोटिजन्मोपात्तान्यपि ब्रह्महत्यादीनि महापातकान्यपि क्षणाद्धूनोति । अपिच श्रृणु तस्या भाग्यवत्ताम् ।



" त्रैविक्रमं परमपावनमंघ्रिपद्मं
उत्पत्तिभूस्त्रिदशसंस्तुतनिम्नगायाः ।
कन्दर्पदर्पदमनस्य तथोत्तमाङ्गे
त्र्यक्षस्यचामृतकरेण सहैववासः ॥
अर्धक्षणादेवच तारिताहि
विचित्रशक्त्या सुरलोकनद्या ।
तेसागराष्षष्टिसहस्रसंख्याः
महर्षितेजश्शलभायिता द्राक् ॥

निवेदितं निवेदनीयम् । श्रुत्वा देवः प्रमाणं इति ।

अन्वर्थनामा स च धर्मपालः
भूमीपतिर्मन्त्रिमुखैस्सुधीभिः ।
संचिन्त्य संचिन्त्य च निर्णिनाय
देवापगास्नानमगण्यवैभवः ॥

अथ नरपतिः पुत्रमाहूय "वत्स, निश्चीयते विष्णुपदीस्नानं । त्वया सन्नद्धेन वर्तितव्यं" इत्यादिदेश ।

पुत्रः—"सन्नद्धोऽस्मि यद्याचार्येणानुगम्यते सुशीलेन" इति ।

तन्निशम्य सुशीलमाहूय नरपतिर्वृत्तान्तं न्यवेदयत् । सुशीलस्तु रहसि कथितं यमकिंकरवचनमनुस्मरन् प्रोवाच नरपतिं । "नद्दशाप्युदीचीं दिशं गच्छेयं । श्रूयतां यमकिङ्करकथितं रहस्यं । अस्ति सुमहति गाङ्गे ह्रदे कराळो ग्राहः । तेन पूर्णषष्टिसंवत्सरस्य मृतिर्भविष्यती"ति । पञ्चषदिवसैश्च परिपूर्यते वत्सराणां षष्टिः । अतो मां नास्मिन् कार्ये नियोजय । अधर्मभीरोर्भवतः नियतं ब्रह्महत्या भवेत्" इति ।

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

राजा—विना भवन्तं न हि मत्पुत्रस्समायाति। अतस्त्वयावश्यमागन्तव्यं रक्षामि च भवन्तं स्नान्तं गङ्गायाम् । क्रियते च गङ्गामध्ये सर्वत आयसी भित्तिः । भित्तिमध्यगं च जलं निरस्य सम्यक्परीक्ष्य च नूतनेनोदकेन परिपूर्यते । कथं ग्राहस्समुपेयात्? सपरिवारेण धृतखड्गेन च मया जलं गाहमानो भवान् संरक्षिष्यत" इति ।

द्विजः—"तथासत्यागम्यत" इति सर्वं संप्रतिपद्यालङ्घ्यतया नियतेस्सह नृपेण प्रतस्थे। नृपश्च सपरिवारश्शिल्पिवर्गसमीकृतसरणिः मंगलवाद्यैः परिपूर्यमाणगगनान्तरालः पुरः प्रसृतस्तंबेरमनिकुरुंबः शिबिकामारुह्य सपुत्रबलवाहनः द्विजगणपरिवृतः पंचभिर्दिवसैर्गङ्गाकूलमुपागमत् । उपगम्य च सुशीलाय प्रतिश्रुतं सर्वं निर्वर्त्य बंधुपालेन सह तदुदकमवगाहयाञ्चक्रे । पश्यतश्च गृहीतखड्गस्य नृपतेर्बंधुपाल एव क्षणाद्ग्राहरूपमास्थाय विप्रं हस्ते गृहीत्वा समगिरत ।

नियतिर्मनुजेन लंघ्यते यदि विप्रेन्द्र किमस्ति पौरुषम् ।
इयती सुखदुःखसन्ततिः स्थितिरित्येव ललाटलेखनस्य ॥

तव च तदा गुप्तवृत्तकथनस्य फलं मम गर्भवासक्लेशः । आगम्यतां" इति प्राणानाहृत्य तस्य परित्यज्य च ग्राहतां संयमिनीं प्राविक्षत् । नरपतिर्गतं तनयमुद्वीक्ष्य अनुभूतनियतिवृत्तः व्यचिन्तयत् ।

"मन्ये नियतेस्स्त्रीत्वात् कौटिल्यं भूय एतदायातं ।
नोचेद्गङ्गाविमुखः गंगायां तद्वशान्ममज्ज कथम् ॥ इति ।

दुर्लंघ्यां नियतिं मत्वा विरक्तः तपोभिर्जगदीशमाराध्य तत्कृपया सदारः निर्दुःखं स्वर्गमुपेत्य मंदमानन्दमविन्दत ।

श्रीनूत्नसालनृपकल्पितपाठगेहेऽ-
लंकारशास्त्रमधिगम्य यथामतीयम् ।
गोपालनामविदुषा हि कृतिर्व्यधायि
कृष्णार्यशासनधरेण मुदे बुधानाम् ॥

---

# मदालसाचरितम् ।

"लीलां वा मायां वा वदन्तु सृष्टिं विमुक्तिभुक्तिफलाम् ।
सा या यदर्थमासीदेकस्तद्वेद यदि स नः पायात् ॥
कर्मसु सत्सु कवीनां ग्रथनैस्ते किमिति शङ्क्यतान्नैव ।
न रुवन्ति मौकिलाः किं कोकिलविरुतेषु सत्सु मधुरेषु ॥"

आसीद्राजा राजराजविभवः सर्वसामन्तनिकरगतागतसंकुलप्रतीहारभूमिः पौरुषसमुत्कर्षवशादविगणितसुरासुरप्रवीरः पितृवत् परिपालयन् प्रजाः प्रजापतिविनिर्मितं जगति धर्ममप्रमादेन प्रवर्तयन् अपर इव साक्षात् स्वायंभुवः भुवो भर्ता हर्ता जनपदापदां आहर्ता सन्ततन्तूनां पुण्यश्लोकश्शत्रुजिन्नाम ॥ तस्य च परिपालयतो महीमन्ववर्तन्त तिर्यञ्चोऽपि यदा शासनं किं पुनस्तदा मनुजाः । तञ्च कदाचन धर्मासनगतं साक्षादिव धर्मं सशरीरं दिदृक्षुरखिलवेदपारगः महातपा गालवो नाम महामुनिः अतिमहान्तमुद्वहन् मनसा कार्यभरं आससाद प्रतीहारभुवं। दौवारिकनिवेदितागमनस्सनृपेण प्रत्युद्गमननमनादिभिर्विहितसपर्यः पर्यास्तृतकुशासनरुचिरं भेजे कनकमयमासनम् । ततश्चान्योन्यमनामयसंप्रश्नपूर्वासु अभिरामासु कासु चित् परस्परमाहिमवर्णनामयीषु वृत्तासु वार्तासु स भगवानात्मनस्समारंभे निमित्तमागमनस्याभिधातुम् । "राजन् अभिरक्षितानां अवनीपतिभिस्तपस्विनामनन्तरायं प्रवर्तते तपश्चर्या। सुचिरमुपचितवन्तो वयं भवद्विषयानुबंधिनि तपोवने निवसन्तस्तापसधनं । अद्यत्वे पुनर्दनुजस्य वज्रकेतोस्तनयः पाताळकेतुः सत्ववशादवमतनिखिलसुरव्रजः समागत्य मुहुरुपरुणद्धि नस्तपश्चर्याम् । यद्यपि वयमेव तं प्रभवामश्शापाग्निना दग्धुम् । तथापि तपोव्ययभयात् तितिक्ष्यन्ते तदपराधाः । जागर्ति हि क्षत्रन्नाम तेजः प्रजापतेर्बाहुसंभवं ।

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

तदेव धर्मापराधिषु नियुक्तं दण्डं धारायितुमिति विमृश्य जोषंभावमास्थितेष्वस्मासु पुनरपि मायाविना तेन कृतो महानाश्रमवासिनामुपरोधः । तमसह्यमालोक्य क्षुभितमासीदस्माकं हृदयं । तथाविधेन वयं हृदयेन समीक्ष्य नभस्स्थलं निश्वसन्तस्स्थिताः । अथ साक्षादुच्चैश्श्रवाइव गगनतलान्निपपात नः पुरस्ताद्वाजिरत्नं । अश्रौष्म च गभीरमनोहरां नभोवाणीम् । “भो भो महामुने तुरगोऽसौ गतिविजितसदागतिः कुवलयो नाम । मुहूर्तादेव भूवलयमशेषं प्रभवति परिक्रमितुम् । अत एवास्य कुवलयसंज्ञा । इममधिरूढश्शत्रुजिदात्मजः पातयिष्यति पातालकेतुं” इति । तमुपादाय तुरगं भवन्तमुपगतास्स्मः । इतःपरं कर्तव्ये भवानेव प्रमाणं “इत्युक्त्वा स मुनिस्तूष्णीमासीत्” । राजापि तच्छ्रुत्वा तञ्च वाजिनमृषिकुमारकैरुपनीतम् आलोक्य प्रहृष्टहृदयस्सन्दिदेश सुतं “वत्स, जानास्येव निरवशेषं राजधर्मान्, न खलु विषये वसतामनपनोद्य पीडामुपैति कश्चिद्राजेति संप्रातिपत्तिं । तत्रापि किमुत ब्राह्मणानां एष्वपि किं पुनर्मुनीनां । नहि ततोऽन्यज्जगति कर्म पावनमस्ति । यदतिशांतानामृषीणां परित्राणन्नाम । तदेनमधिरुह्य तुरङ्गवरं शास्यतां भवता पातालकेतुः । न कदाचिदप्यन्वये नः प्राप्तवानर्थनाभंगमर्थिजनः । किंपुनस्तपस्विजनः । तत्प्रतिष्ठस्व तपोविघातनिरसनाय” इति ।

कुमारोपि तं पितुरादेशं राज्याभिषेकमिव बहुमन्यमानो जननीजनकयोरभ्यवादयत चरणौ । प्रतस्थे च सह मुनिना तपोवनरक्षाहेतोः । क्रमेण च जनपदमतीत्य महामुनेरासमादाश्रमपदम् । अथ सतताभ्यस्यमाननिगमघोषमुखरे विवृतकल्पे मीमांसितनिगमे सततहुताग्निधूमस्तोमांधकारिततरुबृंदे एकान्तोपविष्टसंयमिजननिरुध्यमानकरणग्रामे तस्मिन्नपर इव ब्रह्मलोके स कञ्चित्कालमवसत् गालवाश्रमे राजसूनुः । अतिक्रामत्सुच द्वित्रेषु दिवसेषु सदानवस्समास्थाय सौकरं रूपं घुर्घुरैस्त्रासयन् मुनीनुपगम्याश्रममभिदुद्राव गालवमहामुनिम् ।

अथ कुमारोऽपि समारोपितशरमादाय शरासनं समधिरुह्य कुवलयमाससाद तत्सविधम् । प्राह च जलभरभरितघनाघनध्वानगंभीरेण ध्वनिना “मा-



स्म भवन्तो भैषुरिति” मुनिं “तिष्ठतिष्ठे”ति दनुजञ्च अदृश्यत मण्डलीकृतचापः कुण्डलीन्द्रभोगप्रचण्डदोर्दण्डः साक्षादिव वीरो रसश्शत्रुजिन्नन्दनः । तं तादृशमुपलभ्य पातालं प्रति पातालकेतुर्दुद्राव । सद्रागेवान्वसरच्च तं तथाविधयैव गत्या कुवलयाश्वः । अकरोच्च गच्छन्नेव मनसि । यद्यप्ययमस्माभिरुपेक्षणीयएव पराङ्मुखः पलायनात् रिरक्षिषुः प्राणान् अयुक्तं हि युद्धधर्मविदामीदृशस्यानुसरणम् । तथापि मुनिजनवधमहापातकैरपराध्यन् नायमर्हति विमोक्षम् । यदि सांप्रतमयं जीवन्नेव विमुक्तस्स्यात्पुनरपि मुनिजनहिंसामाचरन्नुत्पादयेदेव ममानुशयम् । अनुवर्तननिवर्तनयोः किल पक्षयोरेकतरास्मिन् पराङ्मुखवधाद्भवति पापसंभावना । इतरस्मिंश्च मुनिजनवधमहापातकोपेक्षया प्रसज्येत महदेनः । मानस्तत् प्रसांक्षीत् । कथंचिदपि अवश्यकर्तव्यश्च नस्तातशासनम् । तच्चास्य प्रववृते शासनहेतोः । तत्सर्वथायमर्हति निबर्हणम् । स्मरन्ति हि “मायाचारो मायया बाधितव्य” इति संप्रधार्य स सम्यगेवं मुमोच तस्मिन् मार्गणम् । स विद्धस्तेन कस्मिंश्चित् भूविवरे बभूव निपतितः । अन्वपतच्च तं अश्वस्सकुमारः ।

अथ तस्मात् बिलांधकारात्तुरगवेगवशेन विनिस्सृतः प्रकाशविशदमपश्यद्राजसूनुः पातालम् । तस्मिन्नितस्ततो मृगयमाणः नापश्यत् क्रोडं न वा कञ्चिन्मर्त्यममर्त्यं वा । एकं पुनर्दूरादेव ददर्श दर्शनीयमसावतिमात्रोत्सेधं सौधम् । जगाम च तत्सन्निकृष्टमुद्देशम् । तत्रैकाकिनी दिव्या योषिददृश्यत कुमारेण । सापि तं “कोयमुद्देशः? कस्यायं निलयः? कावात्र भवती?” इति पृच्छन्तमनादृत्य किमप्यदत्वोत्तरमारुरोह सत्वरैव प्रासादम् । तामन्वारोहद्द्वारिनिबद्धतुरगस्सजिज्ञासया राजनन्दनः । तत्र च विचित्रवितानाविलसिते हेमस्तंभचतुष्कमध्यवर्तिनि जांबूनदमये पर्यङ्के निषण्णां मदनविनाकृतामिव रतिमुन्मिषद्यौवनामतिसुकुमारीं सदृदर्श दर्शनीयतमां । दृष्ट्वैव तां लोकोत्तररूपधेयां लावण्यामृतदीर्घिकामिव द्रवतामपहाय घनीभूतां । विस्मयस्तिमितेन प्रीतिविस्तारितेन चक्षुषा सपिबन्निव निरूपयन्नकरोदेवं म-

*

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

नसि “अहो! रूपातिशयसमावेशः। आश्चर्यतममदृष्टचरमीदृशं लावण्यम्। सौकुमार्यञ्च कुसुमनिकरादपि श्लाघनीयतमम्। तद्यदिनस्यादियं पारिणीतास्यादेवास्माकमाशा सावकाशा। चक्षुरपि नस्सफलं सहजन्मना” इति।

सापि कुमारं सुकुमारं मारमिव साकारं निर्वर्ण्य वर्णनातिशायिना सौन्दर्येण विवशहृदया हृदयभवभावानामासीद्गोचरे विकाराणाम्। तत उत्थाय शयनीयादवतीर्णा भूतलं मुमोह सा निपपातच विवशा। अथ सख्या विविधैः शिशिरोपचारैरुपचर्यमाणापि नसा सम्यञ्चमवाप विबोधम्। सखी पुनरस्या विबोधसमये हृदयमवगतवती। कुमारस्तु पप्रच्छ सखीमुपचरन्तीम्। “भद्रे केयं? अलंकृतिः कस्य वंशस्य? किन्निमित्तश्चास्या मोहसमुद्गमः। कासिच भवती?” इति। सातु सप्रश्रयमुवाच। “महाभाग, सैषा गन्धर्वाधिपतेर्दुहिता विश्वावसोर्मदालसानाम। सेयं सह वयस्याभिरुपवने विहरन्ती दृष्टासीत् पाताळकेतुना। ततस्समायया जहारैनामेकाकिनीम्। अत्र किल निधायैनां सगतश्चरितुं मृगयाम्। मामपि कुण्डलाभिधानां ज्ञातुमर्हति महाभागस्सखीमस्याः। पिताच मे विन्ध्यवान्नाम। साहमूढा पुष्करमालिना। विनिपातिते युधि सुम्भेन भर्तरि तीर्थात् तीर्थं व्रजन्ती लोकान्तरसुखसाधनव्यग्रा स्थितास्मि। हृतामिमां प्राणसमां मृगयन्माणा वयस्यान्दिव्ययागत्या देशेऽस्मिन्नासादितवती। अस्याञ्च सदृशवरलाभसुखितायां निर्वृता तपसे गन्तुमस्म्यध्यवसिता। शृणु वत्स भाविन्यामेनां सपरिणेष्यति त्रयोदश्यामिति। ह्यः किल सेयमनर्हवरोपभोगमाशङ्क्य जातोद्वेगा विजने स्वात्मानमुद्बन्धनेन व्यापादयितुं प्रवृत्ता। वरं हि कन्यानामभिरूपाणामसदृशपरिणयात् स्वरूपच्युतिः। न खलु सुरभिसुकुमारसुमनोमयीमम्लानतनुं मालिकामर्हति कुक्कुर उपभोक्तुम्। उपगम्य तादृगवस्थामेनां माता गवां कामधुक् सुरभिस्सान्त्वपूर्वमिदमुक्तवती। “वत्से, माकार्षीस्साहसम्। न खलु भवतीं प्राप्स्यति स दानवापशदः। यः पुनरेनन्दनुजं मनुजः करिष्यति शरव्यं निजबाणस्य स ते विधात्रा विहितोभर्ता। न चिरं दुःखमेतत् भवत्या भविष्य



ति” इति। तच्छ्रुत्वेयमात्मव्यापादनानिर्बन्धमपहाय सुरभिवचःप्रत्ययेन तत्संदिष्टं प्रतिपालयति वरम्। अत्रान्तरे विलोक्य महाभागमप्रतिरूपरूपमियमासीत् गोचरे मदनशराणाम्। इतः परमस्याभविता नान्यत्र महाभान्मनश्चक्षुषोर्निबन्धः। अवितथभाषिणीच माता गवाम्। तयातु कोऽप्यन्यो निर्दिष्टः पतिरस्याः यः पाताळकेतुमभिहनिष्यति। अवश्यञ्च भवितव्यमस्यास्तेनैव खलु पत्या। एवमेषा विचिन्त्य द्वैधमात्माभिलाषदिष्टगत्योर्मोहमुपगतवती। यतो मनस्विनीनामनभिमतवरणं मरणादपि दुःखमाशरीरपातात्। मम च सखीदुःखदुःखिन्या लोकान्तरोपयोगिनः प्रच्यवो भवति धर्मार्जनात्। अथ महाभागममानुषाकृतिशीलं जानीवः कथमावाम्। नापीदं रसातलं मनुष्येण सता शक्यं प्रवेष्टुम्।

कुमारस्तु विदित्वा निखिलमुदन्तं मदालसाया हर्षभरमशक्नुवन् वोढुं अचिन्तयन्मनसि। “अहो! बहूपकृतं दानवपतिना। यन्निमित्तमिहागतस्य जातं मे जन्मनस्साफल्यम्। यदेनामद्राक्षमखिलललनाललामभूतां गंधर्वराजसुताम्। दिष्ट्या च दृष्ट्वा मां स्निग्धामुद्वहति सैषा दृशम्। सन्दिष्टा च सुरभ्या ममैव प्रियात्वेन। सर्वथा सानुग्रहा मयि देवाः। कथमितरथा ताते वर्षशताय शासति भुवं कौमार एव मत्तो महर्षिणा रक्षाभ्यर्थना। कथञ्च कुवलयतुरगावाप्तिः। कथन्तराञ्च पाताळकेतोरनुसरणं इषुणा हननं वा? कथन्तमाञ्च तेन प्रागेवानीयेह निहितायास्समासादनं भुवनसुन्दर्याः। कथं कारमन्यथा सुरभिस्सा तां तादृगवस्थां पाताळकेतुहननादिनास्मदुदन्तेन समाश्वासयेत्” इति। अब्रवीच्च कुण्डलाम्। “भद्रे, भवतीभ्यामात्मानमिच्छामो विदितं बहुमंतुम्। अस्ति समस्तसामन्तमकुटतटशासनः पाकशासनसमस्समरश्लाघी त्रिविधेषु दण्डधरः दाता सततमर्थिकामानां आहर्ता सप्ततन्तूनां उत्सादयिता विरोधिनां प्रसारयिता यशसां मध्यलोकरक्षादीक्षितो राजर्षिश्शत्रुजिन्नाम। तस्याहमौरसः पितुरेवाज्ञया तपोवनरक्षाहेतोर्धनुर्द्वितीयः तुरगमधिरुह्य तपोविरोधिनं सूकराकृतिं पातालकेतुमन्वसरम्। विद्धश्च स मयेषुणा विवेश पातालम्। तमनुसरन्नत्रागतोऽस्मि तुरगेण। परिभ्रमता चेह मया दृष्टा भ-

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

वती । पृष्टा च किमप्यनुक्त्वासि प्रासादमधिरूढा । अन्वारूढेन मया दृष्टा सखी ते दर्शनीयतमा" इति कुमारस्य वचनमाकर्ण्य मदालसा प्रमोदभरभरिता लज्जाविनम्रं दधाना मुखकमलं साकूतं तिर्यक्सखीमीक्षाञ्चक्रे । सा तु तस्यास्तादृशेन विलोकनेन समुन्नीताशया प्रोवाच राजपुत्रम् । "महाभाग! यदेतद्भवता कथितं सर्वं तत्सुरभिवचस्संवादजनितप्रत्ययमवितथमवगम्यते । किञ्च सख्या मे हृदयं सह दृष्ट्या नान्यत्र रन्तुमर्हति दैवोपपादितात्पत्युः, यत्साधुजनस्य प्रमाणमात्मतुष्टिर्नाम । तदवश्यं कौमुदी कुमुदबंधुं प्रभा प्रभाकरं समासादयतीति स्थाने खल्वयं दैवनिसृष्टो विधिः । अपैतु च धातुस्सदृशघटनयाऽनया चिरोपार्जिता वाच्यता । यद्यपि गंधर्वाणां राज्ञाञ्च वधूवरयोरभिरुचिरेव विवाहविधिः । तथापि नोल्लंघनीयस्सतां समुदाचारः । तदियमधुनैव महाभागेन निगमोदितविधिना वोढव्या मे प्रियसखी । निर्वोढव्या खलु सुरभिवचनस्य सत्यता इति । "परवानस्मि भवतीभ्या"मितीरिते कुमारेण सस्मार सा तुंबुरुन्नाम गंधर्वकुलगुरुम् । आविरभूच्च स्मृतमात्र एव स तुंबुरुः । अथ तेन विवाहविधौ निर्वर्तिते वधूमादाय निजनगरं प्रति गन्तुमियेष राजपुत्रः । अथ कुण्डला प्रोवाच बाष्पगद्गदेन स्वरेण कुमारम् । "महाभाग! पुंसापि गृहीतानुशासनेन नोपदेष्टुमर्हा भवादृशाः । किमुत स्त्रिया सुतरामनभिज्ञया । अतो नोपदिशामि कुतस्सन्दिशामि केवलं स्मारयाम्येव महाभागम् । एवमपि स्मृताखिलवेद्यमत्रभवन्तमनर्हास्मि स्मारयितुमपि । परं सखीस्नेहविवशा विस्रंभिता च कुमारेण विज्ञापयामि किञ्चित् । भार्या हि नाम भर्तुर्बहिश्चराः प्राणाः । विस्रंभभूमिरतुला द्वितीयं हृदयञ्च । एवमेव भर्तापि भार्यायाः । न विना पतिर्भार्यां न सापि विना भर्तारं त्रिवर्गमलं संपादयितुम् । तत् सर्वथा भर्त्र्यासौ कर्तव्या च गृहतन्त्रवाहितया" इति साञ्जलिबंधं विज्ञाप्य कुमारं मदालसां च परिष्वज्य मुहुर्मुहुर्जगाम कुण्डला तपश्चरणाय ।

ततः कुमारोऽपि वधूमारोप्य तुरगं निर्जगाम पातालात् । तथा स्त्रीरत्नहरं दानवास्संभूय पातालकेतुप्रमुखास्तं रुरुधुस्सामर्षाः । शत्रुजित्तनयोऽपि त्वाष्ट्रमस्त्रमभिमन्त्र्य मुमोच शरान् । ददाह च तैररीन् कपिल इव सगरसुतान् । अनन्तरमनुजः पातालकेतोस्तालकेतुर्मायया रुरोध तस्य पंथानम् । तमपि राजसूनुरस्त्रेण व्यधुनोदतिदूरं । ततः प्रतिनिवर्त्य यथागतमाससाद सवधूकः पितुर्नगरीम् । जग्राह च सह भार्यया जननीजनकयोश्चरणौ । अकथयच्च गमनादारभ्य पुनरागमनावधि सर्वमेव निजचरितम् । राजा तु तस्य निशम्य चरितमतिमानुषमानन्दविवशः परिषस्वजे तनूजम् । प्राह च तनयं विनयभरनम्रम् । "वत्स, जीव चिरं कुलमस्माकमुन्नतिं समासादितं त्वया । तथा हि । स खलु वहति धुरं पुत्राणां ख्यापयति यस्स्वेन यशसा पितरम् । न खलु विख्यायमानः पित्रा पदमस्यार्हति समधिरोढुम् । किं पुनः कुलेन मातुर्विख्यातः पत्न्या वा । तद्भवतो नान्यं पश्यामि धन्यतमम् । यद्वा अहमेव धन्यानामर्होऽस्मि प्रथमगणनाम् । यस्य मे भवानीदृशो नंदनस्सम्भूतः । इयं च वधूस्सुता गंधर्वाधिपतेः ज्योत्स्नेव सुधाकरमासाद्य त्वामाप्नोतु श्लाघाम् । सन्ततमवियुक्तावायुष्मन्तौ सुखान्यनुभवतं" इति विसर्जितः पित्रा कुमारः गृहमेत्य सह प्रियया रेमे स राजसूनुः ।

अथ कदाचित् स्वजनविनिपातजातवैरः कोपि दनुजो युधि कुमारस्य प्रतिकर्तुमक्षमः छलेन प्रतिचिकीर्षुः प्राह मुनिर्भूत्वा समेत्य राजानम् । "राजन्, पुनरपि तपोवनोपरोधमाचरन्त्यसुरा हतशिष्टा दुष्टाः । तानपि निहन्तुं यथापुरमाज्ञापय कुमारमप्रतिमम् । न खलु भवद्भुजपरिपालिता मुनयो बाधामर्हन्त्यसुरेभ्यः ।" इति वाचं कपटमुनेस्तस्य तथ्यमेव समन्वानो नृपतिरादिदेश पूर्ववदेव तनयमाश्रमरक्षाहेतोः । सोपि कुवलयमधिरूढः प्रतस्थे धनुषा सद्वितीयः । तथा तस्मिन्नाश्रमाय चलिते सपुनरेत्य कपटमुनिरवदन्नृपतिमतिनिर्विण्णाकृतिः । "भो राजन्, पुत्रस्तव तपस्विनामर्थे यथाप्राणं युधि व्यायच्छन् विनिहतश्शत्रुभिः । उदन्तमिममावेदयितुं तुभ्यं कुलपतिरनुशशास माम् । नवयमसदृशमप्रियं भवन्तं श्रावयितुमिच्छामः । अत्रापराध्यति कुलपतेराज्ञा" इत्युक्त्वापासरत् । अथ राजा महति शोकसागरे निमग्नो निपपात मूर्छितः । मुहूर्तादुत्थाय "हा वत्स, क्वनु मामपहाय जननीं च गतोऽस्येकाकी । ननु त्वय्यवतार्य राज्यभरमात्मना लघुना तपोवनयात्रा-



Digitised by Ajit Gargeshwari For Karnataka Samskrita University

स्माभिश्चिकीर्षिताभूत् । अधुना च गते त्वयि लोकान्तरं को नाम वहन् राज्यधुरमिमामरण्यगमनाय नस्समनुज्ञास्यति निर्वृतान् । अज्ञासिषं हि त्वां आकृतिशीलगुणैर्जगति दुर्लभम् । तद्दुर्लभ एवासि संप्रति संवृत्तः ।" इति बहु विलपन्तं विलोक्य तं जगाद महिषी । "सत्वार्यपुत्र पुत्रः खलु न शोच्यः परमावयोरतिमानुषचरितः । यस्य बाल्यैव सतस्तपस्विनामर्थे तनोस्त्यागः । तएव पुनश्शोच्याः । ये क्षत्रियास्सन्तो रुजावा निमित्तेनवेतरेण लभन्ते रणाङ्गणादन्यत्र पञ्चताम् । द्वाभ्यामेव हि क्षत्रियाण्या जीवलोके समुन्नतिर्महती । यदात्मजेन जयोवा रिपूणां यच्च निमित्तीकृत्य साधुपरित्राणं युध्यतस्सुतस्य हननं वा शत्रुभिः । यदाहुः । "दातुं मर्तुं त्वद्विधाराजपुत्री" इति । तदात्मा पिता माता च सर्वेऽपि वयं तारितास्स्मो वत्सेन । को नाम जगति तस्य कृते शोकस्यावकाशः । यदाहमपि पश्यामि तस्य मनागप्यशोच्यताम् । तदा किं पुनरितरे । यदा पुनरवश्यंभावी देहन्यासः सर्वेषामविशेषेण बाल्ये तारुण्ये स्थाविरे वा जन्तूनाम् । तदा किन्नाम शोकस्यास्ति फलं शोचतः । शोको नाम जगत्यनौषधचिकित्स्यो महान् व्याधिः । येन निपीडिता जहति जन्तवस्स्वात्मानमपि । केवलमियमेव तस्य वधूर्निक्षेपमर्हति शोच्यकोटौ । या तादृशेन विनाकृता भर्त्रा विविधैश्च वयसि कामभोगैः" इति वदन्त्यामृतध्वजमातरि वक्तुमारेभे मन्दंमन्दं मदालसा । सातु निगृह्य बाष्पं प्रणम्य श्वशुरावाह सप्रश्रयम् । "यदिदमार्या मामवगच्छति शोच्यां स्थान एव तत् । आर्यपुत्रविनाकृतममंगलमसुखमिदं यद्ध्रियते शरीरम् । नाहं प्रियरहिते जीवलोके शक्नोमि धारयितुं प्राणान् । न च मया विना दिवि कथमप्यार्यपुत्रस्सुरयुवतिभिर्विलोभितोऽपि लप्स्यते रतिम् । तदेवमुभयोरप्यपरिहार्यायामनिर्वृतावनुमरणेन पुनरात्मानमार्यपुत्रञ्च सुखिनमिच्छाम्युपपादयितुम् । तदनुजानातु मामनुमरणाय विलंबाक्षमामंबा तातश्च । गच्छति खलु सुदूरमेकाकीमे प्राणेश्वरः" इत्युक्त्वा पत्युराधाय परिधानं तनुं तनूनपाति समनह्यत सा प्रक्षेप्तुम् । "युक्तमेवैतदृतध्वजपत्न्या" इति सर्वैस्सममेव भाषिते राजाप्यनुमेने सदयं वधूहृदयम् । ततो यथाविधि लंभिताग्निप्रवेशायां मदालसायां स राजा



सहैव पत्न्या चक्रे विधिमात्मजस्यावश्यकम् । अथ स एव कपटमुनिः कुमारं तपोवनसमीपगतमेत्य प्राह परितुष्टाकृतिः । "राजपुत्र, श्रुत्वैव भवदागमनवार्ता सर्वेऽपि पलायिता दनुजाः । तत्कृतकर्तव्योऽसि गच्छ स्वैरं निजगृहान्" इति । तस्य वचस्समाकर्ण्य प्रतिनिवृत्तः कुमारः प्रविवेश स्वां नगरीम् । प्रविशन्नेव राजगृहमनिर्वृतजनं आलोक्य किमेतदिति वितर्कयन् प्रययौ पितुरास्थानीम् । अथ विस्मयहर्षस्तिमितविकस्वरनयनैः"जयजय महाराज वर्षशतं जीवति कुमारः प्रतिहतममंगलम् । निहतास्ते परिपंथिनः । प्रसन्नाश्च कुलदेवताः" इति समन्तादीरिते परिजनैश्शत्रुजिदपि समीक्ष्य जीवन्तमात्मजमपरिच्छेद्यया मुदा समुत्थाय ससंभ्रममभिगतस्समाश्लिष्य तनयं निर्ववार भृशम् । एवमेव मात्राप्यभिनन्द्य विसर्जितो दिदृक्षुर्मदालसां जिगमिषतिस्म निजनिलयम् । ततश्च यदात्मनः प्रवाससमनन्तरं पुनरागत्य कपटमुनिना भाषितं यच्च तदनुरूपमात्मानुरूपञ्च चेष्टितं मदालसया तत्सर्वमावेदितः पित्रा जगाम स महतीमार्तिम् । विममर्श चैवं मनसि । "हा कष्टं जगदसारमिदानीमस्माकम् । यदेतत्तया गंधर्वराजतनयया विरहितं निपीतसारघमिव क्षौद्रपटलम् । सा किल सुरलोकमुपगता मृगयन्माणा तत्र मामनासाद्य कथमिव यापयिष्यति कलामपि कालस्य । न हि सा विना मया कमपि काम्यमिन्द्रियाणामिच्छत्युपभोक्तुं विषयम् । नूनं सा सुरसुन्दरीरनुयोक्ष्यति मदीयमुदन्तम् । अथ ताभिरात्मनो दिव्यज्ञानेन वाधिगत्य मम भूलोकएव स्थितिमेष्यति सुमहान्तं परितापम् । ततश्च पुनरप्यमुष्मादिमं लोकमवतरितुं चिन्तयन्त्यपि नाधिगमिष्यति कमप्युपायम् । न खलु कर्मभूमाविव त्रिदिवेऽपि लोकान्तरमनातुमनुशिष्टमस्त्युपायान्तरानुष्ठानम् । अहमपि तामासादयितुं नैव कमप्यवगच्छाम्युपायम् । न हि स्त्रियं परलोकगतामवाप्तुं अनुशासनेषु पुंसामस्त्युपायोपदेशः । किं करोमि को वा दुःखप्रतीकारः । यद्वा उपदिष्ट एव तनुत्यागात् प्रियया मे दुःखशमनोपायः । तमेव तावदनुष्ठितवतो मे भवित्री सुलभा निर्वृतिः । यद्वा न युक्तमिदम् । प्रत्यवेयात् खलु तनुत्यागी गति-

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

हीनः पुमान् । यदपि हा प्रिये क मामेकाकीनी परित्यज्य गतासीति मुक्तकण्ठमुच्चैराक्रन्दनेन शोकलघूकरणम् । तदपि न सदृशमस्मादृशां पुरुषमानिनाम्। यच्च शोकजडीकृतेन दीनेन सता मृजादेश्शरीरसंस्कारस्य हानम् । तदपि वर्धयेदेव शत्रुपक्षस्य हर्षप्रकर्षम् । किं च परवदस्ति पितृभ्यामिदं शरीरम् शुश्रूषणीयोहि पिता मादृशैः पुत्रै"रिति विचार्य निश्चितवानेवम् । "नेतःप्रभृति स्त्रियं काञ्चिदपि स्पृष्टुम्द्रष्टुमिच्छामि स्मर्तुं वा । केवलमविषयलंपटेन मया साधुजनोचितैरुपायैराशरीरपातमात्मा विनोदयितव्यः" इति पुनरप्यचिन्तयत् । "या मे विपत्तिवचश्श्रवणादेव जुहाव हुतवहे देहम् । किं वा तस्याः कृते विहितेऽपि भोगत्यागे सदृशमनुष्ठितं भवति । तन्मया यदेतन्निश्चितं तन्न किञ्चिदपि। तथापि नास्मादधिकमस्माभिश्शक्यमनुष्ठातुम् । यत्किञ्चिदनुष्ठितमपि न तस्या नात्मनः नापि पित्रोर्नेवा कस्यचिदितरस्य भवेदुपकृत्यै । तन्निश्चितान्नापरमननुरूपादप्याचरितुमर्हं इति

अथ पित्रा सन्ततिमभीप्सता दारपरिग्रहाय नियुक्तः स निश्चयमात्मनः प्रकटीचकार प्रतिज्ञारूपेण । शत्रुजिदपि स्वेन मात्रा सचिवैर्गुरुभिरन्यैश्च मान्यैर्बहूनितिहासानुपपत्तीरनुपपत्तीश्च समुपदिशद्भिर्यदा कुमारमहार्यनिश्चियममन्यत निववृते तदा दारग्रहणनियोगनिर्बंधात् । ततः प्रभृति कुमारस्सवयोभिः क्षत्रियाणामितरेषाञ्च कुमारैः सह तैस्तैर्विनोदैर्दिनानीव रात्रीरत्यवाहयत् । तथाहि कदाचिल्ललितकाव्यरचनाभिः कदाचिच्छास्त्रतत्वनिरूपणैः कदाचिच्चललक्ष्यवेधविधानैः कदाचिद्गीतवाद्यैः कञ्चित्कालमादियुगोदन्तैः कञ्चित् समयं सुसंगतस्वैरालापैः अन्यैश्च मनोनुकूलैः प्रशस्तैर्व्यापारैः विनोदयन्नात्मानं सहवयस्यैस्तस्थौ । अभूताञ्च वयस्यानां मध्ये मुनिकुमारवेषौ द्वौ नागकुमारौ । तौ किल नागाधिपतेरश्वतरस्य तनयावुषसि नागलोकादनुदिनमुपेत्य कुमारेण सह दिनमखिलं विहृत्य निशागमे निजनिलयमुपगच्छन्तौ कुमारस्य परं विस्रंभस्थानमभूताम् ।

(क्रमशः)



**कां सो स्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीं ।**

**पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियं ।**

*Meaning*—I invoke Her here,—the transcendent and softly smiling Srî, living within an inclosure of gold, wet and burning, satisfied and satisfying, seated on the lotus and complexioned like the lotus.

*Note.* 1. *Kâm.* The commentator means by this word "transcending the limits of speech or thought" *i.e.*, 'whose real nature and greatness cannot be conceived by the mind or expressed in language'. An alternative explanation is also offered. '*Brahmarûpâm, brahmakalpâm vâ*' 'of the nature of Brahman or resembling Brahman' (*Ka* having come to denote the Supreme Deity as well as *Prajâpati*, from a fanciful interpretation of *Sûktam* 121 of the X Mandala of the Rig Vedà). But both interpretations come to the same thing. For, as has been already pointed out, S'rî, represents the Force of the Supreme Lord or Brahman,—the Energy to whose working is due everything that is beautiful in life or nature; and this Force, in its ultimate, noumenal essence, transcends the limits of human knowledge.

Speaking from the *Vyâvahârika* or phenomenal stand-point, Isvara is invested with the three functions of creating, preserving and destroying (which are going on in an endless circle). Without energy there can be no work and when Isvara creates, He is dominated by the energy known as *Vâk or* (*Sarasvatî* in Pauranic literature); when He preserves, He is dominated by the energy known as S'rî (or *Lakshmî* in later literature); and when He destroys, He is dominated by the energy known as *Durgâ*.

S'rî or Lakshmî is, thus, the preserving Energy of Îs'vara and is, anthropomorphically, represented as a transcendently lovely damsel sprung from the milky sea, dripping with the

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

dazzling foam of the milky waves, delighting in lotus-ponds gilded saloons, and all that is beautiful and enchanting in art or nature. She is therefore described here as lit up with a lovely smile, living in a golden mansion, wet with the white foam of the milky sea, effulgent, seated on the lotus and complexioned like the lotus.

2. *Hiranyaprâkâram*, 'living within an inclosure of gold'. The commentator thinks it may also mean 'one whose form is excellent like gold'. C.f. '*hiranyavarnâm*' in Rik I.

3. *Ârdrâm*, 'wet'. Pauranic traditions represent S'rî as having sprung from the milky sea, radiant with the milk-white foam, when the Devas and the Asuras churned it for getting Amrita, the immortal drink of the Gods. The commentator is of opinion that the expression may be also taken to mean 'Rudrarûpâm' 'of the nature of Rudra, Rudra here simply denoting Îs'vara.

4. *Treptam tarpayantim*, 'satisfied and satisfying'. S'rî is ever satisfied and happy as representing the benignant aspect of the Lord, and blesses (satisfies) her devotees with wealth and children.

RIK. V.

चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदारां ।

तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥

*Meaning*—I seek Her as (my sole) refuge on earth,—the magnanimous and bountiful S'rî, resplendent as the moon, radiant, beaming with glory and graciousness, worshipped by the Gods and slender like the lotus-creeper. (Oh thou Lakshmî!) May my misfortune perish! I seek they shelter.

*Notes*—1 *Aham* 'I' The commentator is of opinion that the insertion of this word implies egotism and is therefore due to faulty or careless reading. In the northern reading, the word is not found, though the exigencies of metre seem to require the two additional syllables.



2. *Loke*, 'on Earth', *devajushtâm* 'worshipped by the Gods'. When the exalted splendour of even Indra is due to Her favour, it is needless to say that all bliss on earth must flow from Her grace.

3. *Îm*. often a meaningless particle often inserted to meet metrical requirements. The commentator thinks, however, that the particle may be here taken to mean '*Îkâravâchyâm*'—the Supreme Devi who is symbolised by the *Bijakshara I Cf.* the expression *Îkârarûpinì* as applied to the Devi in the *Trisati Namavali*. This interpretation would, however be considered by some as forced and unwarranted.

RIK VI.

आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।

तस्य फलानि तपसानुदन्तु ममान्तरायाश्च बाह्या अलक्ष्मीः ॥

*Meaning*. Oh thou of sunlike brilliance, through thy austerity hath the lord of the forest (*i. e.* the trees of the forest) come into being, as well as the Bilva tree; may its fruits remove, through thy grace, (all) my mental ills as well as those ills which are external.

Notes. 1. *Vanaspatih* 'the lord of the forest' denotes the trees and plants that blossom, and bear fruits. It is the beauty of Sri, Her tenderness and love, that walk forth in the pleasing spring or the bountiful autumn, when herbs and fruits and flowers softly 'roll their incense, in mingled clouds' to the Energy Divine, whose sun hath exalted, whose breath hath perfumed, and whose pencil hath painted them.

2. *Tapas*.—The commentator takes the first *tapas* in the sense of '*niyama*' or 'austerity; but 'heat' would appear to be a more appropriate interpretation. All creation, as the Upanishads teach, is the result of the willing and energising of Isvarâ. This willing and energising is known as '*tapas*' or 'heat'. What a world of philosophy—and science is suggested by this little word *tapas*?

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

3. *Bilva.*—The *bilva* tree is said to have come out of Lakshmi's hand. The commentator refers to this Pauranic tradition and quotes a half verse from the *Vâmana Purâna*:—

कात्यायन्याः शमी जातः बिल्वो लक्ष्म्याः करेऽभवत् ।

'From Kâtyâyanî or Durgâ was the *Sami* tree born and frcm Lakshmi's hand did the *Bilva* come forth.' This is plainly symbolic. The *Sami* tree is said to contain fire (the *aranî's* or sacred fire—sticks being made out of the *sami* wood) and represents the function of destroying and, as already remarked, Durgâ represents the destroying Energy of Isvarâ. The *bilva* cures diseases, bestows health and thus typifies the function of preserving, which is the special province of S'rî or Lakshmi. The *rik* states that the *bilva* and its fruits have superior virtues, cure not only the disorders of the body but also (indirectly) 'the mind's wrong bias, spleen'—the perverted vision with which a mind diseased views all things.

4. *Mama* 'My'.—The commentator follows the southern reading *'maya'* for *'mámá,'* 'maya' meaning 'ignorance'; but the expression *antaráh alakshmih* includes *mâyâ* and thus there is no difference between the two readings.

RIK VII.

उपैतु मां देवसखः कीर्तिश्च मणिना सह ।

प्रादुर्भूतः सुराष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥

*Meaning.* May (Kubera), befriended by Mahâdeva, come to me and may (the Goddess of) Glory (come to me), accompanied by Mani! May he, manifesting himself in this fair land, grant me fame and prosperity!

*Notes* 1. *Devasakhah.* Kubera is so called because he is befriended by Mahâdeva. Kubera is the God of wealth, lord of the Yakshas, and regent of the Northern quarter. He, like his powerful Patron, Mahâdeva, lives on mount *Kailâsa* and showers wealth and fame on His devotees.

(*To be continued*).

## SADASIVA BRAHMENDRA.

The yoga and its claims to be the source of mysterious-powers have met with scant courtesy at the hands of western scholars.

Indian scholars also, brought up in western methods of thought, have followed in the wake of western Sanskritists and condemned yoga belief and practices. Mr. R. C. Dutt, for instance thus writes of yoga.—"The occult powers or *Siddhis* described in the third Chapter (of Patanjale's Yogasutra) are indeed wonderful! One may know the past and the future, make himself invisible to men, observe the details of what is passing in distant regions or in the stars and planets, converse with spirits, travel in the air or through water and acquire various supernatural powers. The noble philosophy of Kapila was trailed through dirt and mire as soon as it was blended with superstitions*!".

It must be admitted that many indecent rites and mystic practices have been and are indulged in the name of yoga, that many so-called yogins who go about seeking whom they may deceive and fleece trade on the name yoga! Unscrupulous men have, ere now, made a tool of man a name equally sacred and revered, and brought it into disrepute. But we must judge of a belief by its aims, its ethics, and its philosophy, and its genuine devotees,—and not by the wicked men who have masqueraded in its garb and profaned its teaching.

The yoga insists on purity of mind and purity of body as essential preliminaries to all yoga practice. Says Apastamba, a great teacher who lived several centuries before the christian era:

"But the eradication of the faults is brought about in this life by the means (called yoga). A wise man who has eradicated the (faults) which destroy the creatures obtains salvation.

(2) Now we will enumerate the faults which tend to destroy the creatures.

The attachment grew on both sides. This pre-occupation of the mind began to affect the body. The lovers grew lean and feverish. The woman suffered more. The people of the hermitage prepared cooling baths to soothe her excited frame.

The restless king wandered about the hermitage seeking to steal a look at his love. He finds her in an arbour lying on a stone bed spread with flowers, with her mates seated by. Concealed he stands and listens to their talk. The girls suppose that their mate is suffering from the effect of the unbearable heat of the sun and try to minister to her recovery. The Raja guesses, or, rather, hopes, that his love, lovely even in suffering, could suffer thus through Cupid alone.

क्षामक्षामकपोलमाननमुरः काठिन्यमुक्तस्तनं
मध्यः क्लान्ततरः प्रकामविनतावंसौछविः पाण्डुरा ।
शोच्या च प्रियदर्शना च मदनक्लिष्टेयमालक्ष्यते
पत्राणामिव शोषणेन मरुतास्पृष्टा लता माधवी ॥

"Her cheeks so lean, her breasts grown loose, her waist much exhausted, her shoulders drooping and her complexion pale,—thus compassionable yet lovely does she appear, like the Mallika creeper attacked by the wind that dries up the leaves"

When the maids find their exertions fruitless and their friend as ill as ever, they come to the same conclusion. "Is it for the royal saint you suffer thus, friend?" When this question was roundly put by Anasuya the king felt himself walking on the edge of a sword. He has been all along arguing most logically that she must be in love with himself, but anxiety cannot be answered by logic.

(*to be continued.*)

# मदालसाचरितम् ॥

( पूर्वप्रकाशितात्परम् )

अथ कदाचिदिमौ पप्रच्छ पिता नागराजः—

ननु वत्सौ बहोः कालात्प्रभृति रात्रावेव दृश्यते भवन्तावावसथे । दिवातु भवतोर्यत्र स्थितिर्यापिचर्या येच सहचरास्सर्वन्तदवगन्तुमिच्छामः इति । तच्छ्रुत्वा व्यजिज्ञपतां तौ सविनयं "तात, अस्ति मध्यमलोके शत्रुजिन्नामकोप्यन्वर्थाभिधानः संप्रति राजर्षिः । तस्य साक्षादिवमूर्तिमाननंगो धनुर्वेदपारावारपारदृश्वा सत्कर्ता साधूनां न्यक्कर्ता खलानामधीताखिलवेदो गृहीतसकलानुशासनः शासने पितु स्तिष्ठन् अस्ति कुमारऋतध्वजोनाम । सकिल सवयोभिःसह नानाविधनिगमागमकाव्यविचारैः आचारैश्च साधुसंमतैः कालमतिवाहयति निखिलं । सचावयोः प्राणसममासीन्मित्रं तत्संगत्या दिनमखिलमतिवाहयावस्सुसुखम् । आवां विहायतं सचनौ विनोदंवा सुखंवा नाभिलषामः कथञ्चिदपि ।" ततः संप्रधार्य सम्यक् प्राह तौ पिताभुजगाधिपः यद्येवं तर्हि साध्वेव क्रियते वत्साभ्यां । शिष्टोहि शास्त्रेषु गुणोत्कृष्टैस्सह पुंसां संगस्सुखहेतुतया विशेषेण तु कुमाराणां । तदविच्छेदेनैव भवतु युवयोस्तस्य संगतम् । सहि सर्वेषामुपरि मानवानां जगतांवा यस्य भवन्तावेवं परोक्षेपि गुणान् प्रशंसतः परमीदृशस्य सख्युरर्थे नागलोकात् किमपि रत्नभूतं वस्तु समादाय प्रयच्छतमिति नागपतिना भाषिते तावाहतुः पुनः पितरं । तात तस्य गृहे बहूनि रत्नानि यानि गृहेष्वस्माकन्नवेतरेषां नागानां । तस्माच्च यमर्थंचयं प्राप्नुवन्त्यर्थिनः न स भवितुमर्हति गृहेष्वपि राज्ञामन्येषां । तन्न केनापि देयेन शक्योसावुपकर्तुं । अस्ति तु काचिदस्य न्यूनता याच, विनात्रिभिरीश्वरैर्न्नसमाधातुमन्येन । तस्य हि विश्वावसोस्तनया मदालसानाम स्त्रीरत्नमासीत् भार्या । प्रोषिते च कुमारे वैरिणा दनुजेन युधि निहतः कुमारइति सा विप्रलब्धा प्राविशदग्निं । ततः प्रभृति नोपभोक्ष्ये विना तां स्त्रियमन्यामिति स निश्चयमकरोत् । इत्युक्त्वा पुनर्यथापुरं कुमारसविधं गतयोः सुतयोरश्वतरश्चिन्तामापेदे समहतीं ।

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

कथन्नु खलु समयोपकर्तव्यस्सखासुतयोर्नृपसूनुः ? कथं वा तादृशस्य गुणनिधेस्संभवेदस्मत्तः प्रमोदः ? इति सुदूरं संप्रधार्य, कमपि निश्चयमापेदे पतिरुरगाणाम् । अथ भगवतीमुपतस्थे स गिरान्देवीं । ततस्तीव्रसंवेगस्य समाधिना परितुष्टा सन्निदधे तस्येश्वरी जगतां । प्रसन्नयाच वरग्रहणाय नियुक्तस्तथावव्रे सगांधर्वस्य कात्स्न्र्येन प्रतिभानं । तथास्त्विति तया दत्ते वरे प्रत्यभात् सर्वोपि गांधर्वागमः । ततस्सनागवरः पुरस्तात् भगवतः कैलासपतेः जगौ ननर्त मुहुरवादयच्चातोद्यं । अथ नृत्तगीतादिभिरतिमहत्याच भक्त्या समतुष्यन्महेश्वरः । वव्रेच तस्मादीश्वरान्मदालसायास्तस्याएव स्वस्माज्जननं । अविस्मृतपूर्वभावायास्तामेव वयोवस्थाञ्च । अस्तु तथैवेति देवेनोक्ते संप्रहृष्टः प्रत्यपद्यत गृहान् अवापच तामेव सुतान्तथारूपांजातिस्मराम् । ततस्तामवरोधगतां रहसि केप्यनुपलक्षितामरक्षदबलाभिन्नागेश्वरः । एकदा स जगाद निजतनुजौ वत्सौ वयस्यंभवतोर्दिदृक्षते नो हृदयम् । यदि शक्यस्ससमानेतुमानीयतामविलंबितामिति । अथ तौ कुमारमासाद्य सप्रणयमूचतुरिदं सखे काचिदस्ति आवयोरभ्यर्थना यदलङ्कर्तुमर्हति भवानावयोर्गृहानिति । तावसौ विहस्य कुमारः प्रोवाच, ननु वयस्याविमेगृहायुवयोरेव यदिदं गृहं यानिचेमानि रत्नानि यदपि शरीरमिदं यच्चान्यत् भोगसाधनं सर्वन्तद्युवयोरपि तद्भवतोरेवँ गृहे स्थीयते मया । प्रथाक्रियामिव संप्रति युवयोर्वचसावगंत्य खिद्यते मे हृदयामिति । ततस्तथैवेति तौ संप्रतिपद्य पुनरिदमूचतुः । वयस्य पिता नस्त्वद्गुणगणश्रवणाज्जाताशंसोदिदृक्षतेभवन्तम् । तद्यदि नकार्यातिपातः पूर्यतान्तस्य मनोरथइति । एवमुक्तमात्रएव कुमारस्सहसा विसृज्यासनमुत्थाय प्राह शिरसि विरचितांजलिः अहमस्मि सांप्रतमेव धन्यानां जगति गणनायां यन्मह्यन्तातः स्वयमेव दित्सति दर्शनं, तत्संप्रत्येव गमिष्यामस्तातचरणसन्दर्शनायेत्युक्त्वा प्रतस्थे सहताभ्यान्तदानीमेव कुमारः । किञ्चिद्दूरमिव गत्वा ते नदीं गोमतीमवतीर्णाः । अथ नागसुतौ कुमारमंभसि गृहीत्वा प्रावेशयतां नागावेव भूत्वा पातालम् । ततः कुमारेण पृष्टौ यथातथन्यवेदयतामखिलमेव नैजमुदन्तं । समधिकतरसंजातप्रीतिना कुमारेण समनुगतौ तौ पितुरावसथं । ततस्तेत्रयोपि निर्विशेषमेव पितरमश्वतरमुपचेरुः ।



सोपि तं राजकुमारमाकारशीलशौर्यादिभिरवगत्य माननीयं साक्षादिव निजं तनयं पश्यन्नाससाद मुदमतिमहतीं । अथ रसायनैश्च भोज्यैश्च समुपाचरत्तं भुजगेशः । ततः कुमारमसाधारणैरभिजनरूपपराक्रमविद्याविनयैरलंकृतमपि पुनरलंकर्तुमियेष रत्नैरश्वतरः । ततः कुमारस्य जानन्तौ हृदयमाहतुः तौ पितरं । ततस्सद्वंशप्रभवाअपि सुवृत्ताअपि न विना गुणान् शोभन्ते मुक्तामणयः । गुणास्तुविनैवमणीन् शोभन्तइति निदर्शनमत्र कुमारएव । किञ्च नास्यदुर्लभमस्ति जगति किमपिरत्नंनाम । तथाह्यस्य पितुरपर्यन्तागृहेषु विभूतिः पश्यन्तोयां दिदृक्षन्ते न रत्नाकरं नवा रत्नसानुं नापिरोहणगिरिं । अस्यतु मनस्यरतिः परिकर्मणि केनापि हेतुना संवृत्ता । सचहेतुः निवेदितएव कदाचिदावाभ्यां प्रसंगवशात् । अतो नार्हत्यलंकरणादिषु निर्बंधमसौ तातसकाशादिति ताभ्यामुदितः प्राह पन्नगेश्वरः ननु वत्सौवत्सस्य मनोनुकूलं किमपि कर्तुकामावयं यदि चासावस्माभिरनुपकृतएव सन् गच्छेन्निजगृहान् तर्हि भवेन्नश्शरीरावधिरेव नियतमानिर्वृतिः । तदस्मत्तः कमपि काममभ्यर्थयतावत्सेन पितृत्वमस्मासु समर्थ्यतामिति । तथा तस्य सति निर्बंधे समुन्नीतकुमारहृदयौ तावूचतुरिदं तात या खलु कुमारस्य त्रिभुवनसुन्दरी प्रेमनिधिरासीत् प्रियतमा सास्य विपत्तिवचश्श्रवणादेव तथा चेष्टितवती यथा सततमेवतामनुस्मरन्नात्मधारणमप्यपराधंमन्यमानः परितप्यते कुमारः । अस्ति तु हृदये तामधिकृत्य काचिदस्याशंसा । यन्मायामयींवा तां पश्येयं पुनस्सकृदपीति । ततः प्राह कुमारं पुनरपि पतिर्भुजगानां । यद्यपि वत्समायान्तादृशीं वयं शक्नुमः प्रयोक्तुं तथापि नेयं स्प्रष्टव्यावत्सेन । यद्येषसमयोभिमतस्समयारप्स्यते प्रयोगइति । अस्तु तथेति सोल्लासमभ्युपगते कुमारेण सतामवरोधादानिनाय यवनिकान्तरितां । अथापसारितनेपथ्येन, कुमार, पश्य, किमियन्तव प्रियानवेति पृष्टश्चाश्वतरेण सकुमारस्सौन्दर्याकृतिवयःकान्तितारुण्यैस्तथैव विलसन्तींतामालोक्य प्राणसमामखिलमपि विस्मृत्य सबाष्पनयनस्समुपससर्पपिस्पृक्षुः जजल्पच हाप्रिये पुनर्दृष्टासि, नमामर्हस्यकारणे परित्यक्तुमिति । अथ मा कुमारस्प्राक्षीरेनां मायामयीखल्वेषा स्पृष्टाचेद्यास्यत्यदर्शनमित्यश्वतरः प्रतिषिध्य कुवलयाश्वमावृत्य यवनिकया तामवरोधमेव प्रावे-

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

शयत् । ततस्सकुवलयाश्वःपपात मोहमुपगतः तदवस्थञ्च तं पश्यन्नश्वतरश्चिन्तितवान् अहो! महदिदमाश्चर्यं यद्वयं पातयितासन्नारीणामस्यादर्शनादेव मुह्यन्निपतितः यान् किल मन्यन्ते जनास्सुकुमारान् विषयान् ।

तेहि कुलिशायुधादपि तीक्ष्णाः कठिनाश्च । अथवा भूम्यंबुप्रभृतीनां परिणते श्चेष्टायाश्च स तादृशो महिमा । येनायमेवं भ्राम्यन् विमुह्यति महासत्वोऽपि । नन्वणुष्वङ्गोपाङ्गप्रदेशैः पृथक्पृथगेव संहत्य विभिन्ना नामरूपार्थप्रक्रियास्समासादयत्सु सञ्जाता भ्रान्तिरमुष्यैकोऽयमवयवीति' इति समाश्वास्य कुमारमादितः प्रभृति कथितवानश्वतरस्तस्या हेतोस्तादृशमात्मोद्यमम् । ततस्संप्रहृष्टस्सकुमारस्समासाद्य मदालसामनंसदिश्वतरं । अथ चिन्तितमात्रोपनतं कुवलयमधिरुह्य तया साकमाससाद सराजधानीमात्मनः । ततः प्रणम्य पित्रोश्चरणौ न्यवेदयन्मदालसाया स्सञ्जीवनं । प्रणम्य सापि श्वशुरावन्यमपि स्वजनं यथार्हमुपाचरच्चारुभाषिणी । अथ तथा प्रत्युज्जीवितान्दृष्ट्वैव मदालसां पौरास्सर्वेपि प्रावोचन्महता हर्षेण परिप्लुताः । अहो तस्य नागपतेस्तपसो महिमा । अहो भगवतो गौरीपतेरैश्वर्यम् । येनेयं पुरा भस्मीभूता पुनस्समुत्थापिता । ननु शरीरे तस्याः प्रतिपन्ने भस्मता मणवोनाम विशकलिताः परिशिष्टाः कर्मात्माच । नविना नोदनेनैषां पुनरपि भवित्री संहतिः। श्रूयतेच भूतात्मनो विद्याकर्मभ्यामन्वारम्भणमायततेच भविनां धर्मज्ञानादिकर्मीश्वरे । तदनुसरताच भगवता नुन्नास्ते परमाणव स्संहताश्शरीरतया तमेव कर्मात्मानं प्रापिता नूनमासन् । कथमितरथा तदेवेदमस्या दृश्यते शरीरं । प्रत्यभिजानन् वा स एव भूतात्मेति । ततस्सकुवलयाश्वस्तया सह रेमे सुचिरमुत्कण्ठितः । सापि जातिस्मरा भोगैः पुण्यक्षयमीक्षमाणा बुभुजे विषयान् । इयानेवहि प्रतिबुद्धविमूढयोर्विशेषः । यद्भोक्तृत्वे कर्तृत्वेवा सति तुल्ये तयोर्दर्शनभेद इति । तथाहि । प्रतिबुद्धो भुञ्जानस्सुखमितरद्वा कुर्वन् वा किञ्चिदात्मानमनुसन्धत्ते निस्सङ्गमितरस्त्वहमेव भोक्ता कर्तेति देहादिभिरेकीभवन् ससङ्गं । प्रतिबुद्धाच सा भुञ्जानैव साक्षादपश्यदात्मानमसङ्गम् । अथ दिवङ्गते राजनि शत्रुजिति समेत्य प्रकृतयस्सामन्ताश्च तस्य पदे निवेशयामा-



सुः कुवलयाश्वं । सोऽपि ररक्ष पुत्रवदेव प्रजाः । जिगायच परिपन्थिनः । वितस्तारच यशो विमलञ्जगति । अथ मदालसापि काले प्रासूत सुतं । तस्य पिता नाम चक्रे विक्रान्त इति मदालसायां विहसन्त्यां बालञ्च सा तनयमुत्तानशयं बुबोधयिषुरुल्लापरूपेण जगावित्थम् ।

"हायं हायं देहान् पायं पायन्नवन्नवं स्तन्यम् ।
निर्वेदन्नासि गतः तेनात्मानं दिदृक्षसे नत्वम् ।
शुद्धोऽसि रे नभोवत् निस्सङ्गो निर्मलः प्रकाशात्मा ।
मारोदी रथवास्मिन् सङ्घाते रुदति रोदिर्षाव त्वम् ।
गृहशयनासननीत्या चित्ते संहत्य कारिणि परार्थे ।
त्वमसि परश्चिद्रूपः सन्निधिमात्रोपकारितस्त्वन्ते ।
घटपटवत् पृथगेता दृश्यन्ते चित्तवृत्तयस्स्वस्मात् ।
दृष्टा तासामसिरे तासु दृगेवासि सन्निरुद्धासु ।
बुद्धिस्सुखदुःखमयी जडा तटस्थोहि चेतनः पुरुषः ।
पुंबिंबनात् परिणता बद्धिस्सर्वार्थचित्ततया " इति ।

ततः क्रमेण वपुषा सह विज्ञाने मातुरुपदेशात् विवृद्धिमागते कौमार एव हानोपादानपराङ्मुखश्चक्रे सतटस्थ एव सर्वाः क्रियाः । नतस्य मनसि सततमागमापायदर्शिन्यलभत पदमीषदपि विषयाभिलाषः । एवमस्य विबुद्धस्य बभूव गृहधर्मेष्वतिमहानादरः । अथापरावसूत गन्धर्वसुता । तयोरपि राजा सुबाहुरित्यरिमर्दन इति च चक्रे नामनी । मदालसापि तदा जहासैव पूर्ववत् । तावप्याशैशवादुपदिष्टौ जनित्र्या लब्धविबोधौ ज्यायांसमेवानुसरताम् । ततः प्रासूत सा तुरीयं तनयम् । तस्य च पिता नाम चिकीर्षुरुवाच मदालसां । "ननु भवती नामसु तनुजानां मे क्रियमाणेषु पुरा हसितवती । पृच्छामस्तत्र कारणमत्र भवतीम् । सांप्रतमभिधानमस्य क्रियमाणमिच्छामो भवत्यैव । " इति राज्ञासावनुयुक्ता हसित कारणं नियुक्ताच नामकरणे तमाबभाषे मदालसा । "यदिमयैवास्य नाम करणीयं इत्यार्यपुत्रस्यादेशस्तर्हि अहमस्म्यनुवर्तिनी । अयमळर्कोनाम विख्यातो जगति भविता रंजनयजनदानसन्तानैः । य-

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

श्चास्मि हासकारणमावेदयितुमादिष्टा तत्र संज्ञामप्रवृत्तिमनिमित्तामुनुपलभमाना हसितवती नाम्नो नामिन्यसम्बद्धतया। तथाहि। विक्रान्तिर्नाम विशिष्टागतिः।सा खलु कथमिव संम्भवेदक्रिये पुरुषे। कथंवा निरवयवो भविता बाहुमान्। कुतस्तरामरिर्निर्विकारस्य। केवलमेतास्संव्यवहारफलाननु कल्पिता एवे”ति। आकर्ण्य वचो मदालसाया स्स मेने हासितमुपपन्नं। ततस्सा गृहधर्मेषु पुरुषतत्वेच तमळर्कं व्युत्पादयितुमनास्तदनुगुणानुपदेशानारेभे कर्तुं। ततस्तामुवाच भार्यामेष विषण्णमनाः। किमेवमखिलानपि मे तनयान् उपदेशैः करोषि गृहविमुखान्। गृहस्थोहि पितृदेवमनुजानन्यदपि भूतजातं प्रभवत्याराधयितुं। नखलु विहाय गृहानालम्बनमन्यदस्ति देवानामातिथीनां वा वयसां कृमिकीटप्रभृतीनांवा। पूर्वेच गृहधर्म एव वंश्यान्नियुक्तवन्तः पितरः। तथाहि। सत्स्वेव गृहधर्मेषु सन्ततिभिर्निवापपिण्डानुच्छेदः पितृणां। तन्नार्हस्येनमप्युपदेशैरनर्हं राजधर्माणामाकलयितुं”इति। मदालसापि भर्तुराशयमनुवर्तमाना गृहधर्मान् सहराजधर्मैं स्सम्यगेव समुपादिशदेवमळर्काय। “वत्स, वर्धस्व पितुस्सन्ततेर्यशसो राज्यस्यच विवृध्यै। ननु पितुरालम्बनमसि बह्वीनामाशानां। पितरः खलु पुत्रानिच्छन्ति कुलानुवृत्तां धुरं वोढुं निर्वोढुञ्च सहयशसा सन्ततिं यजनञ्च पितृणां। क्षत्रजातेश्च यजनाध्ययनदानैर्महाप्राणतया शौर्येण शस्त्रसौष्ठवेनच भवति महानुत्कर्षः। वांछन्ति च जनयितारः पुत्रानात्मनोऽपि गुणैस्समधिकान् किंपुनरितरेभ्यः” इति।

ततः कृतोपनयनस्सराजसूनुः मातुरेव सर्वानधिगत्य धर्मान् प्राभवद्राज्यभरं वोढुं। अथ समीक्ष्य राजा तादृशमात्मजमात्मानञ्च प्रवयसं तपोवनं गन्तुमनास्सुस्थाप्य तमात्मनःपदे जगाम विरतो वनमेव। मदालसापि सहभर्ता तपोवनं व्रजन्ती संदिदेश पुत्रमळर्कं। वत्स गृहाण पत्रगर्भमिदमंगुळीयं। यदा तु महतीमापदमवाप्य किंकर्तव्यतामूढः प्राप्स्यसि प्राणसंशयं तदैतदुद्धाट्य वाचयेथाः पत्रमिति संदिश्य प्रादादङ्गुळीयकम्। ततस्सहैवमात्रा गतवति पितरि वनं तस्य राज्यमनुशासतः क्रमेण जज्ञिरे बह्वस्तनयाः। अथ सुबाहुरस्याग्रजः शुश्राव दृढतरनिरूढसंगमनुजं विषयेषु। अचिन्तयच्चमनसि ‘अ-



हो महिमा मोहस्य यदनवरतमसमाधेयछिद्रबहुळमनुशासतोस्य राज्यं। नाद्यापि हृदिभवति किञ्चिदपि निर्वेदः। तस्य राज्यभ्रंशादृते न कथंचिदपि भवित्री विषयेविरतिः’ इति। ततस्सुबाहुः प्रतिनिवृत्य वनादाससाद काशीपतिम्। स तेन सत्कृतः प्राह पृष्टश्चागमनप्रयोजनम्। राजन् अनुजो हि सत्यग्रजे नार्हति राजासनमध्यासितुं। एष हि प्रजापतिना समनुशिष्टोधर्मः अहमस्मि नृपतेरग्रजः खल्वलर्कस्य। सचावज्ञाय धर्मेणसहैव मामधितिष्ठति नृपासनम्। अवजानताञ्च धर्मञ्जगति शास्तारो भवन्ति ननु क्षत्रिया भवादृशा धर्मपराः? तदिच्छामि राज्यादवरोपितमलर्कन्द्रष्टुमात्मराज्यहेतोरत्र भवते”ति। स तथेति प्रतिज्ञाय प्राहिणोदळर्काय दूतं संदेशहरम्। आकर्ण्यसंदेशं काशीपतेः पुरुषात् प्रतिसंदिदेश तमळर्कोऽपि “यदि राज्यकामोऽस्माकमग्रजः किमितिनाम नास्मानुपेत्य निवेदयति निजमाशयं? कुतश्च संदेष्टा काशीराजस्संवृत्तोऽस्माकं? केनवा हेतुना तस्य वयज्ञाता वशंवदाः” इति तस्य प्रतिसंदेशमाकर्ण्य संरम्भेण सुमहता चकार काशीपतिर्बलसमुद्यमं,ततस्सेनया सुमहत्या रुरोध पुरमळर्कस्य,प्रवृत्तेचसंगरे प्रतिदिनमक्षीयत बलमळर्कस्यैव, क्षीणेच दण्डचक्रे सहैव कोशैरवाप महतीमार्तिम्यत्। कोशदण्डोनाम निदानं राज्ञां राज्यस्य। विनैव तौ दृष्टः केवलान्नाम्नोवा वेषाद्वा न कश्चिद्राजा। ऋतेच ताभ्यान्निष्पद्यन्ते नैव शिष्टाः पञ्चाङ्गविशेषाः। सन्तोऽपि खल्वकिञ्चित्करा एव, स तदा विपदि पतितस्सस्मार मातुराज्ञाम्।

अथ स्नातः कृतपूज्यपूजः समुद्धाट्य तस्मादंगुळीयात् पत्रमवाचयत् स भक्तिपुलकैरङ्गैः।

त्यज सर्वधैव संगं हानं संगस्य दुशक्कं यदि ते।
साधुषु ते संगस्स्यात् कुर्युस्ते संगरोगभैषज्यम्॥
त्यज सर्वधैव कामं यदि नेमं हातुमंग शक्नोषि।
मुक्तौ कामं कुर्याः स हरेत्कामानशेषेण॥

इत्यनुवाच्य पत्रं समासतस्सत्सङ्गनिमित्तात् दुःखविमुक्तिमवधार्य चिन्तितवानेवमलर्कः। अस्ति राज्ये पुत्रदारादिषु च सज्जतस्तदपाये तत्संबंधा-

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

पायेवा सुमहद्दुःखमिति ततो निविवृत्सया प्रारभमाणश्चोपायाननिष्पत्तौ
तेषामर्धनिष्पत्तौ निष्पद्य विलयेवा महत्येव दुःखपरंपरेति जानाम्यनतिक्रमणीयां
संगस्य दुःखप्रतिबद्धताम। एवमेव संगजानां पुनरपि संगमापादयतामपरिहा-
र्यो दुःखसंभेदइति भवत्येव कामानामपि हेयपक्षे निक्षेपइति विमृश्य मन्यमान-
स्संगप्रतिपक्षतया सत्संगमुपतस्थे भगवन्तं दत्तात्रेयं स नरपतिः । तञ्च भ-
गवन्तं प्रणम्य स विधिवदुपसन्नो निवेदितवानात्मनो दुःखमसह्यम् । श्रुत्वा त-
स्यार्तिवचः प्राह स योगेश्वरः "अंग, कस्त्वं कस्यवादुःखं तदेतदुभयं पृच्छा-
मस्तत्रभवन्तम् । उत्तरादुत्तरमेव विमृशामस्तत्र प्रतीकारमप्रकारम् । त-
द्ब्रूहि याथातथ्येन पृष्टं" इति । अथ नरपतिरारेभे तदुभयं विचारयितुं ।
अहमस्मि कस्त्वं कस्य दुःखमिति पृष्टो भगवता । यद्यहं स्वात्मानमसम्य-
ङ्निवेदयेयं तर्हि न मां भगवाननुगृह्णीयात् । तद्विचार्य साधु निवेदयेयमात्मानं
किमहं राजानमेवात्मानं निवेदयेयं यद्वाक्षत्रजातिमात्रमाहोस्विन्मानवमेव वा
एतेष्वपि किमहमिदं शिरएव उतेयंग्रीवा अथ वान्यदेवतत्तत्प्रतीकं । व्यभि-
चरति हि बाल्ये सांप्रतमपि मां राजभावः । क्षत्रियतां मानुषताञ्च शरीर-
मिदमव्यभिचरन्तीमपि पश्यामः पूर्वापरयोर्जात्योरनिर्धार्याम् । मूर्धग्रीवादी-
नामन्यतमञ्च मन्यामहे निरूपयन्तोवयमसमाप्तमेकत्र तत्राहम्मतिं । जानामि
च देहमपि गृहवदेव ममतायागोचरं । यथैव किल प्रतीमो घटादिकं दृश्यन्द्र-
ष्टारमतोऽन्यमात्मानम् । तथैव खलु दृश्यादेव देहादन्यमेव द्रष्टारमुपलभा-
महे सततमात्मानं । एवन्दृश्यकोटावेव निवेश्यन्ते मनःप्राणबुद्धयः । द्र-
ष्टातु तेभ्योऽन्य एव विज्ञायते । सर्वमेतदिदमिति परामृशन्नहमज्ञासिषमिति
प्रतिपन्नः । शब्दादयोऽपि विषयाः बाह्याज्ञाता अज्ञाताश्च भवन्तोगमयन्ति
परिणामिनीमेषां प्रकाशिकां बुद्धिम् । बुद्धिवृत्तयस्तु सदाप्रकाशमानाः ता-
सां प्रकाशकं पुरुषमपरिणामिनं । सोऽहं द्रष्टा बुद्धिवृत्तीनां पुरुषः । तथाच
सुखदुःखमोहरूपं जगदात्मबुद्धेः प्रतीयते सर्वं । द्रष्टा बौद्धसुखादेरन्योऽहं । नो
सुखीनवा दुःखी किञ्च ।

प्रतिकूलं दुःखं स्यात् अनुकूलं सुखमिति व्यवस्थेयम् ।
दिक्कालपुरुषभेदैः व्यभिचारादव्यवस्थेव इति ॥



ततस्स निजतत्वनिश्चयाज्जहासमुहुस्स्मारं स्मारं राजदशाम् । अथ सभ-
गवन्तमात्रेयं विगतमोहः प्रोवाच "ननु भगवतः प्रसादादेव मे सर्वोऽपि वि-
लीनस्सहकार्यैर्विमोहः । अस्य पुनरपुनरुद्गमाय मां भगवानुपदेशैरनुगृह्णातु"
इति । दत्तोपि भगवान् याथार्थ्यमात्मनः समुपादिशत् सहयोगैः । अथ स
विबुद्धस्समासाद्य काशीराजं शृण्वतएव सुबाहोः प्रावोचदविकृतमनाः "रा-
जन् राज्यमिदं गृह्णातु भवान् स्वार्थेवा सुबाहोरर्थेवा । ननु भवानेव तस्य हे-
तोर्महतासमुद्यमेन समागतो ममाभियोक्तुम्" इत्युक्त्वा तूष्णीमासीत् । अ-
थाह तं काशीपतिः । "भो राजन्, नैष धर्मः क्षत्रियाणाम् यदयुद्धेन रा-
ज्यार्पणन्नाम । कथं नु राज्ञा धर्मज्ञेन सता विहाय क्षत्रदर्पं पुरस्तात् प्रति-
पक्षस्य शक्यमीदृशं वक्तुं । ननु क्षत्रियस्य प्रसक्तरणस्य प्रशंसापदं शत्रु-
जयो वा युद्धे मरणं वे"ति । स तस्य शत्रोश्श्रुत्वा वचस्तथैवाविकृतेन मन-
सा प्राह मदालसातनयः । "ननु भवतो राज्येनैव प्रयोजनं नास्माकं चरि-
तविमर्शेन । वयं हि चिरादुदितेन भागधेयेन राज्यदारसुतप्रभृतेस्संगादुद्वि-
ग्नास्समाश्रिता योगधर्मान् । अलमलमस्माकमितःपरं ग्राम्यैरुपभोगैर्विषयाणां ।
संप्रत्यारण्यकचरितेषु महती नश्श्रद्धा समुत्पन्ना" इत्येतदाकर्ण्य तस्य वच-
नमुत्थाय सुबाहुः करे जग्राहावरजम् । उवाच च काशीपतिम् । "राजन्,
वयमत्र भवता कृतोपकाराः कृतकृत्यास्स्मस्संवृत्ताः । तदनुजानातु भवान-
स्मान्वनगमनाय" इत्युक्तस्तं पप्रच्छ काशीराजः । "ननु भवतो राज्य-
हेतोरस्माभिरियता संरंभेण कृतः क्षपितकोशबलोऽयमळर्कः । राज्यञ्चेदमुप-
स्थितं भवन्तम् । कथमुपस्थितमिदं विहाय राज्यमभिप्रैति वनगमनं भवान् ।
यदि राज्यं भवतोनाभिमतं कथं मया कृतोपकारो भवान् ? कथं वा राज्य-
मप्राप्य कृतकृत्यताभवतः" इति । अथाह तं सुबाहुः । न वयं राज्यमभि-
प्रयन्तः समाश्रिता भवन्तम् । किं त्वयमळर्कस्समासक्तोविषयेषु गजइव प-
ङ्केषु निमग्नो नोद्धारमात्मनो वांछति कर्तुं । तदस्य निर्वेदमुत्पादयितुमासीत्
भवानेवं राज्यप्रसंगेन प्रोत्साहितः । नच मृषावादिनो वेत्तुमर्हति भवानस्मान्
आत्मराज्यहेतोर्हि राज्यादळर्कस्यावरोपणमाशंसितमासीत् । आत्मराज्यञ्चा-
ळर्कस्य स्वतन्त्रस्वरूपस्थितिरेव । अनेन खल्वळर्केण तस्मिन्नेव पश्चादुदरे

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

समुषितं । तदेव पीतं स्तन्यं यस्मिन् वयमुषितास्स्मोयच्च निपीतवन्तः । नन्वेकसार्थगतानामेकतरोऽन्यतरं नदीं पङ्कंवा तरीतुमपारयन्तमुपेक्षितुमर्हति समर्थस्सन् ? माभूदयं मदालसायाः पुत्रोभूत्वा प्रबुद्धगोष्ठ्या पशुरिव बहिष्कृत-इत्येतत् सर्वमभिसंदधानैरस्माभिरत्र भवान् कारितस्तमिममुद्योगम् । तदधुनास्य निर्वेदेन प्रबोधफलेन जाता नः कृतकृत्यता। भवतोऽपि राज्यप्राप्तिरियं कृतकृत्यतामुत्पादयिष्यति" इत्युक्त्वा सहानुजेन वनं प्रति प्रतस्थे खलु सुबाहुः । अथ काशीश्वरस्तावनुगच्छन् प्राह सप्रश्रयं। "भो राजपुत्र सुबाहो, यदुपाश्रित्य करगतमपि त्यजसि राज्यसुखम् । नूनं तद्राज्यसुखादथवा सुखमात्रात् भविष्यति सुखं प्रकृष्टतमम् । ननु बहुतरक्लेशोपार्जितैः साधनैः संपद्यते राज्यसुखम्। तद्वा तादृग्वा जगति सुखमनुकरणमेव चेत् सिध्येत् किं राज्यसुखेन ? यदाहुः । "न खलु क्षुधितः परित्यज्य सिद्धमभ्यवहार्यं यतते धान्यमुत्पादयितुं" इति । तन्ममापि कर्तुमर्हसि रसज्ञं निजसुखानाम् । ननु सतां सप्तपदं मैत्रं" इति बहुविनीततरमाभाषमाणं तमपि सुबाहुस्सम्मेने सहविपिनं नेतुं । अथ काशीपतिरळर्कस्यैव तनयमभिषिच्य तस्य पदे स्वस्यापि सुतमात्मपदे सहैव ताभ्यां विवेश वनम् । अथ सोऽप्यात्मतत्वे व्युत्पन्नोभूदळर्कवदेव काशीशः । अविभश्च तद्वदेव विषयेषु महतीमरतिं । मैत्र्यादिनाच भावितमासीदनयोरन्तःकरणम् ।

ततः प्रशान्तपावनविषयपरिचयात् तद्रूपतामिव तयोरापेदे चित्तम् । तच्च क्रमेण शब्दादिभिरनुविद्धे सूक्ष्मे सूक्ष्मतरेच तदनाविद्धे लेभे विषये समापत्तिम् । ततस्तस्याप्यपहारो जज्ञे परवैराग्याद्विषयस्य । केवलमतिशान्तसुखप्रवाहवाहिनि सति निरोधचित्ते तस्थतुस्तावपि सुबाहुवदेव स्वेन रूपेण ।

एवं मदालसायाः चरितं विस्मापकञ्च धर्म्यञ्च ।
विषयविरतिं सबोधां दोग्धीति सतामिहादरो भूयात् ॥

---

# ॥ मठाधिपतयः ॥

श्रीरामोविजयतेतमाम् ।

विश्वं येन वरीवृधीति नियतं सर्वात्मना सन्ततं
सर्गस्थानलयादिकेलिलसितं यस्स्वाम्यनन्ताश्रयः ।
रामाकारमुखैरनन्तकरुणै स्सद्धर्ममस्थापयत्
ग्राहार्तं गजमप्यपालयदहो तं नौमि सर्वेश्वरम् ॥

इह खलु मठाधिपतीनां लक्षणानि च कर्तव्यानि च सहृदयहृदयविबुधजनप्रेरितो यथाशक्ति संग्रहेण वक्ष्ये । मठाधिष्ठाननिर्माणकारणानामुपपादनानि यथोपोद्घातमनावश्यकानि यद्यपि प्राकरणिकतया किञ्चिद्दिङ्मात्रेण वच्मि। भगवान् परमकारुणिकस्सर्वेशानोऽनादिकर्मवासनाश्लथमानेषु चेतनेषु दयमानः कर्मभूमाविह निर्द्वन्द्वोपि प्राण्यन्यतमभावनः दुष्टहननाशिष्टावनधर्मस्थापनादिभिर्जगतीमनुजगृहे ॥ अद्यापि कालप्रवाहतो धर्मवासनाहैन्येन नश्यति प्राणिजाते स्वशासनभूताखिलशास्त्रप्रवक्तॄन् स्वानुप्रवेशसरसान् गुरुजनान् श्रीशङ्करभगवत्पादभगवद्रामानुजश्रीपूर्णप्रज्ञप्रभृतीन् गुरुजनान् भुवनमिदमभिरक्षितुं प्रेषयामास । ते हि परमपुरुषयाथात्म्यामेयकलशोदधिविविधविलक्षणप्रतिक्षणरमणीयभागान् एकैकशो विविच्यानन्दसन्दोहोन्मत्तमनुभूय तांस्तानेव भागान् जगति वेदेतिहासपुराणागमाद्यविरुद्धं प्रकाशयामासुः ॥ लोको भिन्नरुचिरिति न्यायेन तेषां रुचिर्भगवदनुभूतौ विभिद्यतइति नदूष्यं । एकः स्वादु न भुञ्जीतेति न्यायात् स्वाभिरुचिततमभागं जगतः प्रादर्शयन्निति च नदोषलेशमर्हति । विहारार्थं पञ्चषपद्मिनीरमणीकः कश्चनानवद्यः गुणमणिः सार्वभौमः निजकान्ताभिस्ताभिः प्रत्येकं स्वस्वेच्छानुरूपं उपभुज्यमानो यद्यपि नभिद्यते हि स्वरूपे । तावापद्मिन्यः नाद्विषतोन्योन्यं दूषयन्ति वा अन्यासां सरससपत्नीनां वाभिप्रायं स किल दृष्टान्तोऽत्र तेषां गुरूणां सौमनस्यमविद्धतांच द्रढयति ॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

तथाच तत्तद्गुरूपज्ञं तैस्तैरनुगृहीताः कतिकतिविरक्ता धरित्र्यवनरक्षाधरासुरमणीन्द्राः अवधूतपरमात्मयाथात्म्या मठेषु गुरूपकल्पितेषु संप्राप्तपरमहंसपदाः तत्तदभिमानदेवतामाराधयन्तः प्रायेणाद्वैतिविशिष्टाद्वैतिद्वैतिषु समपादिषत । प्रायशः त्रिसहस्रसमासु कलियुगेस्मिन् समंगतासु शंकरश्शंकरस्साक्षात् इति विश्रुता भगवदवताराः श्रीशंकरभगवत्पादा महीमवतेरुः। तदा दिव्यश्रीबुद्धजगन्मोहनदिव्यसूरेः युक्तिकलाकलापरंजितैः करणत्रयशुद्धिप्रदानैः कालिकालकालकुसुमैः कमितसर्वशास्त्राभिप्रायैः कन्दर्पदूरैः निरुपाधिधर्मैककर्तव्यताकैः खण्डितमोघव्यलीकाडंबरकुलवासनादूषितदुर्वर्णनिबन्धनसंरंभैः खंजितमूर्खातिलोकदुर्विवादप्रक्रियैः खट्वीभूतैरखिलसुमनोमणीनामपि कर्माध्वयात्राजर्झरितानां आखेटितहिंसाकलकलदुश्शास्त्रसंबन्धैः केवलमात्मविचारसंचारैरपि दुरूहयुक्तिशक्तिमहाजालान्तरितैः पृथग्जनेतरैकसुविलसितैः पङ्क्तिपङ्क्तिशः समापतितसुधासारमहौघमहाप्रवाहैः परमनिस्पृहैः परिपूर्णब्रह्मानुभवैः अथाप्यसाधारणगोचरैस्सूक्तिपरिवाहैः जगतीह कतिपयकालादारभ्य चिरात् शास्त्रागारक्षौद्रपटलीसारमननुभवति केवलतत्वसुखानुभवदूषितमोहिते सुतरां तद्विभूतितिरोधानानन्तरं अधिकतामसाहन्ताप्रधानकर्मनिरते नास्तिक्योपघ्नीभूतइवाशनव्यवायैकनिघ्ने दुरितदूरनिहितधर्मकर्मकुले दुरितबहुळे पशुप्रायजीवितावष्टंभस्तंभभूतवर्णसांकर्यसंपादककेवलमनोनुकूलधर्मशास्त्रप्रवृत्त्यरुन्तुदमहावेधमूर्छिते सति जनास्सर्वेपि सौगताभिप्रायं स्वरसेन नज्ञात्वा दुस्संपादसौकर्यसंपादनार्थं मध्येस्माकं भारतवर्षीयाणामस्मत्पूर्वाभिव्यवस्थापितधर्मसूक्ष्ममपि नाशयन्तो विह्वलविह्वलाः अविज्ञातेदमिदमितिज्ञानाः केवलबौद्धाभिधानाअभवन्। तदा तदुद्दिधीर्षया आगतोयं शंकराचार्यः स्वानुभवैकसमधिगतभगवत्पारम्यः परिपूर्णब्रह्मानन्दीसन् बाल्यएव कर्मन्दिश्रैष्ठचयमवलंब्य तत्रतत्र दीनदयापरतया आसेतुहैमाचलं यात्वा तांस्तान् दुरुत्सेकाभिभूतान् प्रसिद्धानपि बौद्धान् प्रबलयुक्तिप्रभेदाविरुद्धैः सत्यानुरुद्धैः संप्रतिपन्नशास्त्रसारशस्त्रैः प्रजित्य शुद्धाद्वैततत्वं समाधाय समवधायच बोधयामास विपुलम् । ततस्सरति कतिपयकाले हृदयंगमे समहान् यथोदाहृतं चिरायेह तत्तत्वप्रतिष्ठापयिषया कतिचन छात्रान् तन्मतधौरंधर्यदीक्षितान् कृत्वा तेषामितरानपेक्षं निलयादीनि सर्वोपकरणादीनि दत्वा तात्कालिकराजसाहाय्येन कल्पयित्वाऽन्तरधात्। तदनुगताः तदुपज्ञमठेषु तेषु निस्पृहतया प्रविश्य धर्माधर्मविवेकं जनानां अभिदर्शयन्तः स्वाचरणैः प्रचारणैश्च वचसां युक्त्यबाधितानां इतरेतरवैमनस्यादृते कतिपयसौकर्यसंजनकं वर्णनिबन्धनावलंबनमुत साधकं परममिति निर्धारयन्तः निरूपयन्तश्चानुभावे समवर्तिषत । ते प्रत्यहं शय्योत्थायं आधिचिन्तितलोकक्षेमाः अविचिन्तितस्वविषयादराः प्रतिदेशं श्रीभगवदुपज्ञगीतासारमहामृतासारं अध्यायभेदेन अधिकारभेदेन सामरस्यं सङ्कलयन्तः सर्वतोमुखशक्तयस्सर्वानुकूला दीनावनपरा विद्याभिवर्धनदीक्षाः तदुचितविद्याशालाः शाखोपशाखितं प्रतिष्ठापयन्तः प्रजानां परमोपकारिणो बभूवुः । यथाशङ्करोपज्ञं शैशवएवावलंबितप्रव्रज्याः ततउपात्तसर्वशास्त्राध्ययनाः समरसाश्च भूत्वा सुनिर्मलाशयास्सन्तः देहसंबन्धिष्वेव सर्वेष्वपि प्राणिषु । अनावश्यककर्माचरणा अपि ते सन्यासिनः लोकानुग्रहार्थं अभीष्टदेवताविग्रहाराधनमवलंबितवन्तो भक्तियोगं दुस्साधमपि साधिते परमसुखं सर्वसाधारण्येन बाढमुपापादयन् ।

ते पूर्वपूर्वेतु तत्तन्मठीयाः परमहंसाः किलानन्तकल्याणगुणोदधयः चिरं वरं सन्तारयितुं जगतीमिमां स्वस्वगोष्ठीषु संप्रदायमनूचानं अनवद्यं संप्रवर्त्य बहुसंररक्षुः । यथा ते महिष्ठाः तत्तद्भाष्यकृत्सिद्धान्तं प्रत्यहं नियतकालेषु व्याचख्युः । अपूपुषन् बह्वर्हणीयान् अवृत्तिमतः पंडितान् निजैरेव चरितैः अनीहसत्कर्मयोजितैः सकलानपि साधुधर्मान् स्थापयामासुः । तस्मादेव तत्क्रमागता गुरुपादमाप्ताः परमहंसाः तात्कालिकैराजभिः इतरानपेक्षवर्तनानुगुणाः कैदारिकवृत्तीः प्रापुः । तेच राजानः जगदुज्जीवनार्थं परिगृहीततत्तदभीष्टदिव्यदेवताराधनानुगुणसकलपरिजनपरिच्छदान् यात्रासौकर्यार्थं गजतुरगपदातीन् मुद्गरपरिघनाळीकशतघ्न्यादिसकलायुधसमेतां परिमितध्वजिनीं चक्रचामरान्दोलिकाशिबिकाचतुरन्तयानशिबिरसामग्रीपताकादिकान् वीणावेणुमृदङ्गमद्दलादिसकलवाद्यवादकांश्च भगवन्मंगळमूर्तिमंडनानुगुणसकलमहार्हभूषणानि च परमौदार्यपुरस्सरं विश्राणयामासुः । तेषां च महीभृतां चैषां पूर्वेषां भाष्यकृतांचाशयस्तावत् एतादृशसंभावितसौकर्यशतैः



Digitised by Ajit Gargeshwari For Karnataka Samskrita University

बहिरुत्तमयतिपदमतिक्रम्यवा मनाक् देशाद्देशं नगरान्नगरं ग्रामाद्ग्रामं अनु-
पद्रवमाटमाटं सकलामपि जगतीं आस्तिक्यगर्भितां यथातथावा निरन्तरायं
निरन्तरञ्च कुर्युरित्येव । अतएव स्मार्तव्यपदिष्टेष्वास्माकीनेषु मठत्रयमधर्म-
हठभेदनं शृङ्गेरिपुष्पगिरिकुंभघोणेषु प्रतिष्ठितपदं श्रीशङ्करकरुणाञ्चितं जे-
जीयतेतरां ।

श्रीवैष्णवेषुच श्रीमदहोबिलपरकालतोताद्रिनामभिरञ्चितं मठत्रय-
मिदानीं किंगृहपुरीमहीसुरपुरीतोताद्रिप्रभृतिषु श्रीरामानुजकरुणोदञ्चित-
मभिव्यक्तं सत् विजयतेतराम् । तथैवास्माकेषु माध्वेषु सत्यपूर्णव्या-
सरायसुमतीन्द्राभिधानं मठत्रयं उत्तरदेशमहीसुरराजधानीविविधप्रदेशप्र-
तिष्ठितं श्रीमदानन्दतीर्थदयोन्नाहितं जगति चाकशीतितराम् । तस्मात्स-
र्वजगत्सार्वभौमे परमेश्वरे यथा श्रीभूमिनीळादयः परस्परमविरुद्धाशया
न कलहायन्ते नन्दन्तिच स्वाभिमतानुभवे तद्वद्वयमपि सर्वेपि सोदराः
भिन्ननामानोऽप्येकब्रह्मजातीयाः एकब्रह्मसमुदायाः नविवदामहै तत्तदवान्त-
राशयेषु नकिञ्चित्करेषु । परन्तु प्रयतामहै सततमविच्छिन्नसौभ्रात्राः । अ-
स्मन्मठाधिपतयः लब्धवृत्तयः स्वस्थचित्ताः त्यक्तेषणात्रयाः अतएव कालं
दैनन्दिनं विभजेयुः संविभजेयुश्च बह्वाश्रितजनेभ्यः आत्मनामात्मीयकर्माणि-
च । नतेषामहं तत्कर्तव्यादेशी परन्तु तेषां एकान्तिनां चरणयोः साष्टांग-
पातं प्रणम्य हार्दं प्रार्थये । तन्नाम, ते महान्तः ब्राह्मे मुहूर्ते प्रत्यहमुत्थाय
आत्मपावनानि कर्माणि कुर्युरेव, वर्तिषीरन्नेव यतिधर्मेण । तेषां त्यक्तैहिक-
कर्मत्वात् कर्माचरणं लोकसंग्रहायैव । ततो हेतोः तानि तानि कर्माणि सं-
कोच्य शिष्येभ्योभिलाषुकेभ्यःआस्तिक्यमुपादिशेयुः ब्रह्मस्वरूपं प्रथयेयुः ।
तत्रतत्र पाठशालां गैर्वाणवाणीवृध्यर्थं दीनजनाय स्थापयेयुः प्रोत्साहयेयुश्च-
जनान् तथाकरणे । सर्वेषामस्माकं सौहार्दवर्धकानुपदेशान्मुहुर्मुहुः कुर्वीरन्
कारयेयुश्च । राजनि विश्वासं धामन्यास्माकेच निरन्तरोपदेशमहिमाभिरुल्ला-
सयेयुः स्वधर्मोपदेशान् पत्रिकासु मुद्रितान् कृत्वा कारयित्वाच बहिः प्र-
ख्यापयेयुः । यदि धर्मप्रत्यक्षविरुद्धदारसुतादिपोषणं विमुंचेयुः । अनवसरेषु



प्रायेणवा नयानमधिरोहेयुः । तत्तद्देशकालानुगुणं उपदेश्यान् सद्धर्मानपि
उपदिशेयुः । बह्वीभिरेवंविधाभिस्सत्क्रियाभिः अस्मानखिलानप्युद्धरेयुः ।
अभिपालयेयुश्च । तथाबहुसुजनाभिप्रायं यद्यस्मदेकान्तिनोपि माठाधिपत्य-
सौकर्यवन्तः लोकोपकारे प्रवर्तिषीरन् । तदा भारतवर्षीया वयं सर्वेपि रा-
जानुरक्ताः परस्परस्निग्धाः अक्षुभितदेशाः धर्माभिनिरताश्च सुखवन्तो मन्त्र-
वन्तइव भारतवर्षमधितिष्ठेम विजयेमहि सर्वदाचेति समञ्जसमखिलानन्द-
करमविरुद्धंच । बत कालव्यत्यासः तन्मठेष्वद्य तच्छात्राः ब्रह्मचर्यएव
सन्यस्यन्ति केवलं । छिन्दन्ति ब्रह्मसूत्रम् । लुनन्ति शिखाम् । वसते काषा-
यवसनं । धरन्तिचैकदण्डम् । भूमिकाग्रहणं सुकरं कुर्वतेहि तथापि आका-
रसदृशप्रज्ञां नाधिलिप्सन्ते । कालक्रमेण संप्राप्तवृत्तिबाहुल्येन तत्तद्विचारण-
कर्तव्यताकतया नतेषामवकाशो विशालः केषांचन तेषां तादृक्प्रज्ञाधिजिग-
मिषूणामपिं पांचभूतिकं हेयं तच्छरीरं तत् इन्द्रियपुष्टिदायकैः षाडबैः दर्प-
दायिमेदोजटिलवपानिबिडघूर्णमानं विषयप्रावण्यं जायते । तादृशमेवाहारं
गुरुतरावधानसहितं पृथक् विविक्ततया पक्वंतेऽद्य परिगृह्णते । भगवदाभिव्य-
क्तिरंजितक्षेत्रयात्राकालेऽपि भगवतो विलसतोऽपि पुरतो देवायतने भगवदी-
येषु च भागवतेषु सब्राह्मणेषु समधीतवेदवेदांगेषु परितोऽभिमुखं प्रत्युत्थान-
विधया समागत्य विलसितेषु सत्स्वपि हुंहाध्वानध्वनितदीनजनोढचतुरन्त-
यानान्तरुल्लासिता उपचारार्थं वा विनयाभिनयलेशं वा नकुर्वन्तो निर्विशङ्कं ।
दिव्यमङ्गलविग्रहसेवाव्याजेन सविग्रहं साडंबरं दर्शयन्तोऽनपेक्षितसत्कारमी-
प्सन्तः देवालयकायस्थगणिकादीनपि देवस्वोपजीविनः अन्यथानुप-
पत्या हन्त समाराधयन्ति मन्वतेच तादृशपुरस्काराविरहे श्रीशङ्करपादादीना-
मेव पूर्वेषां कर्तव्यवरिवस्यादेः लोपोभवतीति । तत्तु प्रामादिकं । यदि ते
तन्मतमहारत्नपण्यागण्यसदाचारसमाख्या भवेयुः तदैव ते तदनूचानशि-
ष्यपारंपर्यपरमहंसाः तद्गुरुपूजां वस्तुगत्या वितन्वन्त्येव किं वाह्योपचारैर्वितथैः।
पूर्वकायनमनपुरोधावनानुसरणादिकायिकोपचारेभ्योपि गुरुचरणाज्ञानुपाल-
नतदभीष्टप्रतिपालनादिकं हि तदनन्तरात्मसमाराधनं बोभवीति । निर्बद्धावा
कतिभिर्व्याजैरनुबद्धावा तदभीष्टदेवताबिंबसमलंकरणाय विद्यावर्धनदीनरक्ष-

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

णादिषु सूपयोज्यमठस्वैः भूषणानि भूरीणि विरचयन्ति सन्नाह्यन्तिच । किं आभरणाभरणस्य भगवद्दिव्यमंगलविग्रहस्यान्यैराभरणैः । चिरस्य ब्रह्मविदग्रेसरपरमहंसाराधितदिव्यबिंबशक्तयएव उपान्तागतानां अन्तेवासिनां अनवद्यभक्त्युत्पादने किन्नालं । तत्र विद्यमाना भूपालाश्च, स्वर्गमण्डपमपेक्षितं वज्रखचितं भृंगारुकमभिलषितं पद्मरागनिष्ठ्यूतवैजयन्तीमालावैजयन्तीभूषणं बिंबस्य संपादनीयेत्यादिसावतारिकैस्सोपचारैर्वाक्यैः प्रार्थितमात्रं यथाभिप्रायं प्रयच्छन्ति गुरुजनेभ्य एतेभ्यः । आः कष्टं कतिचनात्र तेषां मध्ये विभीषिकासदृक्षाः कलिकालछद्मरूपाः केवलद्राक्षासारसमानभाषणा हंसाभासा चिराभ्यस्तगूढपापाचाराः स्वस्वदेहबन्धुभ्यः तान्यपि देवभूषणानि संवितरन्ति । तत्पदे भूषणाभासान् सरभसार्जितान् निक्षिपन्ति । आहारबलादधिरूढविषयवासनास्ते कदाचित् स्वाश्रितिस्वास्थितिस्वागमकारणानि विस्मरन्ति । आत्मनस्समयेक्कचन मातापितृबन्धून् महामूर्खाननाघ्राताक्षरगन्धान् महाराजोङ्गरक्षकानिव निदधति । तेहि प्रायेण निर्घृणा निखिलमपिनिन्द्यं कर्म कर्तुं उत्सहन्ते । प्रसभमपनयन्ति मठस्वमखिलंगूढगूढं ते । कदाचिदुपदृष्टा अपि नावमानं पश्यन्ति । शरीरमाद्यं खलु धर्मसाधनंइति" मोक्षपरमोपायीभूतसन्यासधर्मसाधने शरीरधारणं परमावश्यकं हि तावत् । नैते सन्यासिनः केवलं स्वधर्मपरायणाः ॥ किन्तु लोकोज्जीवनविधानदीक्षिताः ततः नानादेशपर्यटनक्षमतया देहदार्ढ्यसंपादनमत्यावश्यकं भवति । एतेन हेतुना विषयप्रावण्यात्यन्तानुत्पादकान् क्षणेक्षणेऽप्रतिहतप्रज्ञावर्धकान् कायशुद्धिकरान् देहारोग्यदायिनः स्वाहारानेव ते मठाधिष्ठाधिहंसराजपदागृह्णीरन् । अहो कुत्रवास्माकं न्यूनता । इन्धते किल महौषधयः करणकळेबरसारौजस्संपादिकाः कतिचन भोज्याः शाकस्थानीयाः विषयदुर्वासनानिर्मूलनाः । कुतस्ता नसेव्यन्ते । यत्यन्नं पृथक् पृथक् पच्यतइत्युक्ते तादृशेनैव सात्विकाहारेण भवितव्यं । एवमेव प्रसरन्त्यां अद्वैतचन्द्रिकायां भगवद्रामानुजपादाः तस्याविशेषोत्सवं कमप्यादिदर्शयिषवः सर्वेषां सुमनसां अजनिषत । सकिल साक्षादादिशेषावतारइति विश्रूयते । सविशेषाद्वैमुख्यप्रवर्तको महोदारस्सकलोज्जीवनतत्परः । नतेषामाशयो गुरुभिः काषायांबरिभिरेव भवितव्यमिति ॥

## THOUGHTS ON "LOVE"

SUGGESTED BY AMARU.

Love is a theme that has been sung by nearly every Poet of Sanskrit Literature. Even Valmiki, the great sage, has given us an absorbing portraiture in that realm. The thoughts that poets have clothed the ideal in vary very widely, from the highest spiritualism, down to low materialism. Among these a century that goes by the name of Amaru holds a very high rank.

The name Amaru is obscure to us except through this work. A legend declares that Sankaracharya once entered the body of a dying king of that name, and that he learned the art of Love during his sojourn in that body. Thus tradition fathers the poem on the great preacher. We cannot disprove the belief, for we do not find any perceptible difference in style between this poem and his other reputed works. There is an ease and a flow that says the author knows the very depth of the subject.

When one human soul feels a longing for the company of another, the desire is called Love. A high spiritual perfection requires no such company, and hence has no desire for it. But a lower nature on the highway of evolution cannot resist the impulse to take advantage of the strength of union. The human soul is destined to be happy. But it cannot be happy in its imperfect state. Yet, if it can recognise its affinity to another soul, and remove all effaceable distinction between itself and that other, the process of unification produces a rapture that has no parallel in the region of sensual pleasure. This is Love and the happiness of Love.

We do not mean by Love mere carnal Lust. Lust is absolutely sensual, cares merely for the form and its effect is on the senses. When that effect ceases, the tie ceases. The soul is as isolated in the exercise of Lust as if it were not. It is for brutes and men of undeveloped consciousness. Men capable of a belovebelong to a higher stage of human development—the early spiritual stage, the unselfishness of the *grihastha*.

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

The nature of such happiness depends on the disposition of the parties. To love a person, as a human being, without any reservation whatever, without the taint of unselfishness, is to be worthy of such happiness. Mere contact of the bodies can never produce that ecstacy. On the contrary, where true love exists, mere active mental communication would do to make the lovers happy.

अज्ञानेन पराङ्मुखीं परिभवादाश्लिष्य मां दुःखितां
किं लब्धं चटुल त्वयेह नयता सौभाग्यमेतां दशाम् ।
पश्यैतद्दयिताकुचव्यतिकरोन्मृष्टाङ्गरागारुणं
वक्षस्ते मलतैलपङ्कशबलैर्वेणीपदैरङ्कितम् ॥

"Me sorrowing with my face turned away, you embraced by force, and what did you gain Oh fool! by thus violating me? See there, your breast, marked red with the paint of your lover's breasts, has been striped by dirt and oil from my hair"

Love is not the desire to touch some smooth and well shaped object. It is the unreserved self sacrifice of soul to soul which being returned is the cause of happiness supreme. Unreturned it is the cause of misery untold.

बाले नाथ विमुंच मानिनि रुषं रोषान्मया किं कृतं
खेदोऽस्मासु न मेऽपराध्यति भवान् सर्वेऽपराधा मयि ।
तत्किं रोदिषि गद्गदेन वचसा कस्याग्रतो रुद्यते
नन्वेतन्मम–का तवास्मि?–दयिता–नास्मीत्यतो रुद्यते ॥

"Well my child! Here my Lord, Relent, Oh angered one! What has my anger done? It makes us unhappy. My lord is not in fault; it is I that should bear all the blame. Why then do you cry with utterence half-choked? What if? before whom do I cry? Are not you my—. Well what am I to my Lord? Beloved—, Oh it is that I am not that, that I grieve."

Love's sorrows all come from the being denied that communion of soul, which is the ideal aimed at.

But when the desire is met then there is happiness indescribable, for Love is its own offering, and the manifestation of its mutuality fulfils desire.

दीर्घा वन्दनमालिका विरचिता दृष्ट्यैव नेन्दीवरैः
पुष्पाणां प्रकरः स्मितेन रचितो नो कुन्दजात्यादिभिः ।
दत्तः स्वेदमुचा पयोधरयुगेनार्घ्यो न कुंभांभसा



स्वैरेवावयवैः प्रियस्य विशतस्तन्व्या कृतं मङ्गलम् ॥

"No long garland of Indivara flowers did grace her lover when entering but only her own loving looks; nor bouquets of kunda flowers but her refreshing smiles. No arghya was there to do him homage, but she worshipped him with the sweat of her breasts in close embrace. Out of herself she managed to give her lord a cordial reception."

The mere expression of that love is enough. No external work or material gift can enhance the happiness of love. It is always occupied in contemplation of its object, and the realisation of the union is the happiness. Hence at no moment does Love stray from the beloved one. Round that centre thought revolves unwearied.

मुग्धे मुग्धतयैव नेतुमखिलं कालं किमारभ्यते
मानं धत्स्व धृतिं बधान ऋजुतां दूरे कुरु प्रेयसि ।
सख्यैवं प्रतिबोधिता प्रतिवचस्तामाह भीतानना
नीचैः शंस हृदि स्थितो ननु स मे प्राणेश्वरः श्रोष्यति ॥

" 'Simple one, do not you foolishly waste time, but assume anger, be firm, and let alone truth my dear' says her mate trying to give her good advice, but the timid one replies 'speak low, or my lord may hear, that has taken hold of my heart.' "

To love is to efface all self, and unselfishlessly to think on another soul, to desire to make that soul happy, and to be made happy by it in turn.

अङ्गानामतितानवं कथमिदं कम्पश्च कस्मात्कुतो
मुग्धे पाण्डुकपोलमाननमिति प्राणेश्वरे पृच्छति ।
तन्व्या सर्वमिदं स्वभावजमिति व्याहृत्य पक्ष्मान्तर-
व्यापी बाष्पभरस्तया चलितया निःश्वस्य मुक्तोऽन्यतः ॥

" 'Whence this leanness of thy frame, whence this trembling and why this paleness in thy cheeks' asks her loving lord; 'It is only my week health my lord' she replies, and turning aside, she relieves herself with a sigh and wipes away a tear from her other eye."

No, she would not oppress her lord with her own sorrows, she would sacrifice her own sensitiveness, to make her lord happy.

Love is therefore unselfishness. Resentment between lovers

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

is at the best transitory; for it is the mark of selfiishness to harbour anger.

एकस्मिन् शयने पराङ्मुखतया वीतोत्तरं ताम्यतो
रन्योन्यस्य हृदि स्थितेऽप्यनुनये संरक्षतोर्गौरवम् ।
दंपत्योः शनकैरपाङ्गवलनान्मिश्रीभवच्चक्षुषो-
र्भग्नो मानकलिः सहासरभसव्यासक्तकण्ठग्रहम् ॥

"In the same bed with faces turned away from each other, they lie apart, though at heart loving each other, yet guarding an outward appearance of pride and anger. But when, by chance turnings of the body, their eyes meet each other, the aesumed resentment melts away, and eagerly they return to love, clasping each other by the neck, and langhing heartily".

Or see the situation of a girl that tries to be angry with her lover.

भ्रूभङ्गे रचितेऽपि दृष्टिरधिकं सोत्कण्ठमुद्वीक्षते
कार्कश्यं गमितेऽपि चेतसि तनू रोमाञ्चमालंबते ।
रुद्धायामपि वाचि सस्मितमिदं दग्धाननं जायते
दृष्टे निर्वहणं भविष्यति कथं मानस्य तस्मिन् जने ॥

" She makes a frown on her brows, but her eyes look more lovingly than ever, she hardens her heart against him, but every hair on her frame stands on end to give her the lie, she resolves not to speak to him, but a smile overspread her rebellious face; how is the poor girl to maintain the farce of anger in his presence ?"

Every lover when offended is eager to forgive.

कोपात्कोमललोल बाहुलतिका पाशेन बद्धा दृढं
नीत्वा केलिनिकेतनं दयितया सायं सखीनां पुरः ।
भूयोऽप्येवमिति स्खलन्मृदुगिरा संसूच्य दुश्चेष्टितं
धन्यो हन्यत एव निह्नुतिपरः प्रेयान् रुदत्या हसन् ॥

" With her tender arms, trembling with anger she enfolds him tight, leads him before her mates and overcome by her efforts to rebuke him for his misdeeds, the poor girl bursts into tears. And he laughs all the while and enjoys the censure. How happy he ?"

Censure coming from a loving one does not embitter; for it takes the form of a tender appeal that breathes the very spirit of love.



It is very natural for lovers to forget the cause of offence in the rapture of being together. For see,

तस्यास्सान्द्र विलेपनस्तनतटप्रश्लेषमुद्राङ्कितं
किं वक्षश्चरणानतिव्यतिकरव्याजेन गोपाय्यते ।
इत्युक्ते क्व तदित्युदीर्य सहसा तत्संप्रमार्ष्टुं मया
साश्लिष्टा रभसेन तत्सुखवशात्तन्व्यापि तद्विस्मृतम् ॥

" When she accused me saying 'Do you try to conceal from me the mark of her sandal-painted breasts on your chest by pretending to fall at my feet ?" 'ah! where is it ?' cried I, and to rub off the tell tale mark, I embraced her in haste, and she forgot her resentment in the ecstacy of it".

Who can maintain anger against a loved one? No, not mortals that have a heart. Anger inflicts its own punishment, denies us the happiness of love, and we very eagerly seek a pretext for relenting.

The sense of desolation that overtakes a lover threatened with separation is evidence of the happiness that love can confer. To be denied the sustaining bliss of the company of a kindred soul is to be enveloped in absolute darkness. We can find no other explanation of this phenomenon than that evolution stimulates man to realise as for as possible the ideal of unity of all souls—a very insignificant portion of it, but still on the way towards a higher unity. And to oppose this tendency to unify is to cause misery in proportion to the fulness of the desire.

प्रहरविरतौ मध्ये वाह्नस्ततोऽपि परेऽथवा
किमुत सकले जाते वाह्नि प्रिय त्वमिहैष्यसि ।
इति दिनशतप्राप्यं देशं प्रियस्य यियासतो
हरति गमनं बालालापैः सबाष्पगलज्जलैः ॥

"When her lord means going on a journey of a hundred days she asks him fearfully, will he come back in three hours, or at noon, or in the evening, or if he might even take a whole day to return and at the thought of such a long separation the young one sheds such profuse tears that he gives up all thought of going at all."

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

New love is afraid to step into its rights too soon. It generally tries to stand aloof, but is pushed forward by gathering intensity. At first it is coy. Feminine nature particularly, being peculiarly wanting in knowledge of the world, is much subject to this feeling.

अलसवलितैः प्रेमार्द्रार्द्रैर्मुहुर्मुकुलीकृतैः
क्षणमभिमुखै र्लज्जालोलै र्निमेषपराङ्मुखैः ।
हृदयनिहितं भावाकूतं वमद्भिरिवेक्षणै
कथयसुकृती कोयं मुग्धे त्वयाद्य विलोक्यते ॥

"What happy mortal do you look at? with lcoks moving languidly, brimming with love, often formed into buds, now turning towards him, now hesitating with shyness, for a moment turned away, all along exhibiting your inward thoughts?"

A direct contemplation of the object it seems, supposes a carnal disposition of the desire, which all refined mortals are somewhat ashamed of. So too the new-married bride,

पटालग्ने पत्यौ नमयति मुखं जातविनया
हठाश्लेषं वाञ्छत्यपहरति गात्राणि निभृतम् ।
नशक्नोत्याख्यातुं स्मितमुखसखीदत्तनयना
ह्रिया ताम्यत्यन्तः प्रथमपरिहासे नववधूः ॥

"Modesty makes her look down when her husband takes hold of her dress; when he tries to embrace her close, she snatches herself away; cannot speak to him, but looks aside at her mates who are laughing at her and colours deep with shame at the first joke cut at her expense." Or again.

शून्यं वासगृहं विलोक्य शयनादुत्थाय किंचिच्छनै-
र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ।
विश्रब्धं परिचुंब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जा नम्रमुखी प्रियेण हसता बाला चिरं चुंबिता ॥

"She rose gently in the couch, and scanned her husband's face who wore the mask of sleep, and she boldly kissed him, but the hair stood on end on the pretended sleeper's neck, and he kissed her again and again, while she was quite bowed down with shyness." But experience teaches that that is the way mortals express love, and then she regrets her folly in having denied herself the raptures of love.



श्लिष्टः कण्ठे किमिति नमिया मूढया प्राणनाथः
चुंबत्यस्मिन् वदनविधुतिः किंकृता किंनदृष्टः ।
नोक्तः कस्मादिति नववधूःचेष्टितं चिन्तयन्ती
पश्चात्तापं वहति तरुणी प्रेम्णि जाते रसज्ञा ॥

"Why did not I clasp my lord by the neck? why did I hold back when he tried to kiss me? why looked I not at him? or talked not to him?—and with such regrets she blames herself, when she knew what love was, and felt it."

Thus though love retains among us some of the qualities of lust, it is yet a feeling of which only refined minds are capable, for it lays the foundation of a higher nature *in man*—unselfishness.

---

## NOTES AND COMMENTS.

### SIR MONIER—WILLIAMS.

At Cannes, on the shores of the Mediterrnean which he loved so well and within sight of the ever-changing beauty of the Esterelles in which he revelled, on the morning of April 11, Sir Monier—Williams K. C. I. A. D. C. Bodin Professor of Sanskrit in the University of Oxford closed his long and useful career in the eightieth year of his age. The following particulars of his life culled from 'The guardian' will be of interest to our readers.

'While he lay a dying, his physician and friend said to him 'You have always been a lover of languages' which drew from him the immediate answer 'Yes, but I have only cared for languages in so for as they throw light on the religions and customs of men.' It is quite true. Although he was the author of the first really useful Sanskrit Grammar in English, he was never a mere grammarian and although he devoted many years of absorbing study to his Sanskrit Dictionaries and other Sanskrit works, he had a great dislike to be described as a lexicographer, as if that was the main purpose of his life.

After spending fifteen years as Prof of Sanskrit, Bengali and Telugu at the East India Company College at Hailybury

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

he returned to Oxford as Boden Professor of Sanskrit when he was 41 years of age; and when he was nearly 60 years of age he undertook the first of his three journeys to India in which he travelled from Kashmir to Ceylon. Up to that time he had lived the life of a scholar, almost of a recluse, shrinking sensitively from taking any part in public affairs and from extreme shyness never speaking in convocation.

But during these years he was accumulating real learning, the fruit of accurate scholarship, so that when at last he emerged from his retirement and proposed in Convocation (May 1875 the establishment of an Indian Institute and followed up his proposal by undertaking at his own expence, in company with his wife and daughter, a Journey to India with a view to the more effective furtherance of this object, he was well equipped for his task.

Col. Boden had instituted the Professorship of Sanskrit at Oxford which goes by his name, with the express object of providing means for the conversion of the natives of India to the Christian religion. To bring about this conversion, Professor Monier-Williams saw the need of *sympathetic* study of Indian religions and he was always indignant at the opprobrious term *heathen* being applied to Hindus or to other representatives of the venerable fathers of the East, preferring the use of the phrase 'non-Christian religions' and humorously describing himself as half a Hindu. But he was a devout Christian and his chief article of faith was this: Human nature craves some remedy for sin, which Christianity alone can supply. But he did good for Indian religion by his popular and instructive sketches of it in his "Hinduism", "Indian Wisdom", "Brahmanism and Hinduism" "The modern India and the Indians".

His death is a great loss to the Sanskrit world. At the time of his death the veteran Sanskritist was engaged in a final revision of his Sanskrit-English Dictionary' on a new basis altogether, to keep it abreast of the latest results of Aryan researches. Let us hope that some competent scholar may be found in England to take up the unfinished task and bring it to a worthy completion.

---

॥ हरि: श्रीगणपतयेनमः ॥

# ॥ किरातार्जुनीयव्यायोगः ॥

अमृतांशुकलाविद्धं ध्यानलक्ष्यं परं महः ।
धर्मार्थकाममोक्षाणामेकं बीजमुपास्महे ॥ १ ॥

( नान्द्यन्ते ततः प्रविशति सूत्रधारः । )

**सूत्र**—( पुरोविलोक्य साञ्जलिबन्धं )

पार्थप्रहारदलितं गलितास्त्रधारं
मूर्द्धानमप्यनतिवीक्ष्य निजस्य पत्युः ।
वात्सल्यगन्धिनयनं विजये किरन्ती
वाञ्छाप्तये भवतु वस्त्वरिता किराती ॥ २ ॥

अयि भोस्सामाजिकाः श्रृणुतेमां मदीयामभ्यर्थनां ।
भवदाराधनव्यग्रा नव्यं किमपि रूपकं ।
प्रयुञ्ज्महे ततोभूयाद्व्यायोगश्रियः प्रियं ॥ ३ ॥

तदाज्ञापयन्त्वार्यमिश्राः किमत्राभिनेतव्यमिति ।

**पारिपार्श्विकः**—( प्रविश्य ) भाव ! इदमाज्ञापयन्त्यार्यमिश्राः । "अयि भरतपुत्र अहृद्यमपि युष्मदभिनीतं हृद्यं भवति । किमुत हृद्यं । अतोयदभिरुचितं भवते तन्नः प्रियं ।" किन्तु "देव्यायोगश्रिय"इति भवदुक्ते 'व्यायोग' इत्युपश्रुतिरासीत् । नित्यमस्तु ते विजय" इति ।

**सूत्र**—(सहर्षोल्लासं) अहो ! अस्मन्मनोरथप्रचाररमणीयोऽयममीषामाज्ञामार्गः । ( सश्लाघं ) 'अस्तु ते विजय' इत्याशीर्मिषादर्जुननेतृकतापि रूपकस्य सूचिता भवति । तन्मारिष! किरातार्जुनीयव्यायोगमभिनयामः अत्र हि ।

कुञ्जिक्कुट्टापराख्यस्साकिल कवयिता रामवर्मावनीशः
पुण्यं वस्तु प्रशस्तं जयति विजयिना नायकेनार्जुनेन ।

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

किंच स्वामी प्रसन्नस्स्वयमिह कुहनाकौतुकी पार्वतीशः
प्राज्ञास्सामाजिकाश्चेत्यभिनयविषये सर्वमव्याहतं नः ॥ ४ ॥

तद्गच्छ सज्जीकुरु सर्वं नेपथ्यकृत्यं ।

**पारि**—यदाज्ञापयति भावः । (निष्क्रान्तः)

(नेपथ्ये) अहो ! प्रमादः ! प्रमादः !

किरातव्याधूताद्गहनकुहरान्तादयमयं
वराहः प्रत्यूहस्स्वयमिव शरीरी प्रचलितः ।
तपोदीपालोकस्फुटपरशिवालीनमनसं
त्रिभित्सुर्बीभत्सुं द्रवति तुहिनांशुं तमइव ॥ ५ ॥

**सूत्र**—अये प्रस्तुतमेव नटकुमारेण व्योमचरव्याक्रन्दनपठनं ।

(पुनरन्यत्रनेपथ्ये कलकलानन्तरं)

दूरं यात वनेचरा अलमलं कोलाहलैर्न्नह्ययं
कोलः पार्थमुनेर्वधाय विचलन् नन्वेषमूकासुरः ।
कान्ते मा तव संभ्रमोऽस्त्वयमसौ पश्यातिकायो मया
पश्चार्द्धे चललक्ष्यवेधविधिना बाणेन संदार्यते ॥ ६ ॥

**सूत्र०**—अये ! ननु सदारस्य किरातरुद्रस्येदमुदारगभीरं वचनं ।

(पुनः परत्र नेपथ्ये) अहो ! जितं जितं सुकृतेन । यतः

दैवप्रबोधितइव प्रतिवुद्धयोगा
दालोक्य तं कलितगाण्डिवकाण्डचण्डः ।
बीभत्सुराशु मुखतोविदलय्य कोलं
बीभत्समानइव मन्दमितोऽभ्युपैति ॥ ७ ॥

(ततः प्रविशति यथानिर्दिष्टोऽर्जुनः)

**अर्जुनः**—(सबीभत्सं) हन्त विगर्हितमिदं कृतं तपःक्रमस्य ।

**सूत्र०**—अये ! प्रविष्ट एव नायकभूमिकामादाय भ्राता मे सुदर्शनः । तदहमपि अनन्तरकरणीयाय सज्जीभवामि । (निष्क्रान्तः)

॥ **प्रस्तावना** ॥

---



**अर्जुनः**— अहिंसा परमोधर्मस्तापसानां विशेषतः ।
मया तु मुनिवृत्तेन व्याधकृत्यमिदं कृतम् ॥ ८ ॥

अथवा कागतिरीदृशेष्वत्याहितेषु । किंच; आत्मत्राणमेव हि तपश्चर्यायाः प्रथमे प्राणाः । (पुरोविलोक्य साश्चर्यम् ।) अहो किमेतत् ।

बाणावदारितवपुः पततहियाव
त्तावद्विहाय किटितामसिताचलाभः ।
सोऽयं प्रयात्यसुरतां सुरतां च (सप्रत्यभिज्ञं) हन्त
दुर्योधनप्रियसुहृत्स्फुटमेष मूकः ॥ ९ ॥

तदस्य दुर्हृदो देवद्रुहो निधनमपि देवस्य भगवतोभवानीपतेरन्यादृशमाराधनमेव भविष्यति ।

(ततः प्रविशतः किरातरूपौ पार्वतीपरमेश्वरौ)

**किरातः**—प्रिये ? अपि दृष्टं पार्थस्य धनुषि लाघवं ? यदसौ मत्प्रयुक्तेन सायकेन निर्भिद्यमानएव किटिपृष्ठे विरम्य योगबन्धादुन्मील्यच चक्षुषी—

आदाय कार्मुकमथाशु विधाय सज्य
माकृष्य बाणमपि लक्ष्यममुष्य वक्त्रं !
निर्दिश्य तुल्यमिव मामकसायकेन
तद्गात्रमर्द्धमभिनत्स्मयमानएव ॥ १० ॥

**किराती**—अज्जउत्त ! दिट्ठं दिट्ठं अच्छरिअं कम्म वच्छस्स ।

**अर्जुनः**—(विलोक्य) अये ! अपि दूरे दर्शनीयमिदं दृश्यते मृगयाविनोदपर्युत्सुकायाश्शबरपृतनायाविजृंभितं । तथाहि ।

गर्त्तेषूच्चैरटन्ती घनतुहिनशिलापृष्ठमध्याश्रयन्ती
निम्नेषु प्रस्खलन्ती निबिडतरुतते रन्तरानिष्पतन्ती ।
सत्वौघं संहरन्ती प्रचलदसिलता मेचका यामुनीव
स्रोतोवृद्धिर्विधत्तेशबरभटघटा काननाभोगपूर्तिम् ॥ ११ ॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

किंच ।

कलकलमयमिव गगनं
कलुषतमोमयमिवाखिलं गहनं ।
मृगमृतिमयमिव लोकं
मृगयाकुलमृगयुकुलमिदं कुरुते ॥ १२ ॥

(साश्चर्यम् ।) अमीषां च किरातानामग्रभागे ।

प्रेयस्याहरिनीलनीलवपुषा युक्तस्सुवर्णद्युतिः ।
प्रांशुर्देवइवान्यथैव विहरंश्चापीशरावापवान् ।
कर्षन् व्याधवरूथिनीं मृगवधव्याक्षिप्तरूक्षेक्षणः
शृङ्गाराद्भुतवीररौद्रशबलः कोऽसौ किराताकृतिः ॥ १३ ॥

अथवा विचित्रोहि जीवलोकः । किंच दिव्यलोकसञ्चारयोग्ये अस्मिन् हिमवति गौरीगुरौ गिरौ किंकिन्नसंभाव्यते । भवतु । किमनेन निरूपितेन प्रकृतमेवानुसरामि । यावदस्मिन् गङ्गास्रोतसि कृताचमनविधिः पुनरपि योगमेवानुतिष्ठामि । (परिक्रामति)

**किराती—**अज्जउत्त! एसो वच्छो पुणो वि तवस्यिदुंपउत्तो । तातुरिअंगदुअअहिमदवरेहिंउवच्छन्देम णं ।

**किरातः—**(सस्मितं) अयि वात्सल्यशीले! किं विस्मृतं त्वया किरातवेषग्रहणप्रयोजनं? तदहममुं निवर्त्य तपःपद्धतेरवतारयामि वीरपद्धतिं । (उच्चैः) तिष्ठ भोस्तापसाकृते! किंचिदिदं पृच्छ्यते ।

अस्मादृक्कुलधर्मभूतमृगयायोग्योग्रसत्वाकुले
देशेऽस्मिन्नृषिधार्यवल्कलजटाभारादिबिभ्रद्बहिः ।
कस्त्वं भोबकवन्निमील्य नयने जन्तूनुपान्तागतान्
हन्तुं तिष्ठसि सञ्चिनोषि सुकृतस्थाने पुनर्दुष्कृतं ॥ १४ ॥

**अर्जुनः—**(आकर्ण्य) हन्त मामिव स्पृशत्यमुष्य शबरवीरस्येदमुदारं वचनं । तद्यथातत्वं प्रत्युत्तरीकृत्य गन्तव्यम् । (परिवृत्यावलोक्य) अयि किरातनाथ सत्यमाह भवान् । ऋषिजनानानुरूपमेव मया कृतम् । किन्तु न



केवलमृषिमात्रकावयं । परपराजयशक्तिलाभाय तापसवृत्तिमाश्रिता राजन्या एव ।

क्षत्रस्य तु प्रकृतिसिद्धमवेहिधर्मम्
दुर्दान्तजन्तुशमनं दुरितं नतत्स्यात् ।
वैशेषिकं किल मुनिव्रतमप्यमुष्मि
न्नात्यन्तिके नहि विरोधिदशामुपैति ॥ १५ ॥

**किरातः—**(सानुनयं) अये यद्येवं दुर्दान्तजन्तुशमनकर्मसाधर्म्यात्सखा भवानस्माकं । अतः किंचिदस्ति नः प्रष्टव्यं । तदनुजानीह्यस्मानुपसृत्य सल्लपितुं ।

**अर्जुनः—**भवतु । कोदोषः पृच्छतु यथेष्टं भवान् (किरातौ उपसर्पतः)

**अर्जुनः—**(स्वगतं) अहो उदाराकृती नकेवलकिरातावेतौ ।

**किरातः—**अयि कोभवान्? केवा ते परे? येषां पराजयाय राजनीतिप्रतिपादितं शक्तित्रयमप्यनादृत्य शापायुधासादितां शक्तिमाजिहीर्षतीव भवान् ।

**अर्जुनः—**(स्वगतं) अहो परिहासगर्भोऽयं प्रश्नोपन्यासः । (सस्मितं प्रकाशं) भोशबरराज नास्ति विस्तरस्येदानीमवसरः श्रूयतां संक्षेपेण ।

वंशे पीयूषभानोः कुरुषु नृपतयः पाण्डवाधार्त्तराष्ट्रा
इत्येते सन्ति पूर्वे छलिभिरिह परैर्निर्जिताः कैतवेन ।
तिष्ठन्त्यारण्यवृत्त्या विपुलबलभृतां तत्परेषां जयार्थं
सेवेऽहं तेषु जिष्णुः पशुपतिममुतो दिव्यमस्त्रं प्रतीच्छुः ॥ १६ ॥

**किरातः—**(सोपहासं) श्रुतंश्रुतं । सर्वथापि निन्द्यकर्मा विहीनपौरुषस्सएव बीभत्सुस्त्वं? तन्न त्वया सल्लपितुमप्यर्हावयं । गच्छ गच्छ यथेच्छं तपसे । तदेव तवानुरूपं न वीरसंवादः ।

**अर्जुनः—**(सस्मितं) महात्मन् का नाम तादृशी निन्द्यकर्मता विहीनपौरुषता वा बीभत्सोः यत्सल्लपितुमपि जुगुप्सा भवति भवादृशानां ।

**किराती—**(जनान्तिकं) अम्महे! संतत्तणं वच्छस्स जंविणिंणिओवि महुरमुहं जप्पइ ।

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

**किरातः**—सुमुखि पश्य विक्षोभयाम्यस्य शान्तत्वं । (प्रकाशं) हन्त भो वक्तुमपि जिह्रेति मे जिह्वा । तथापि किंचित् शृणु ते निन्द्यकर्मतां ।

विद्याभ्यासावसाने मृगवधकुतुकी द्रोणशिष्याग्रगण्यं
मन्यस्सार्द्धं सतीर्थ्यैः क्वचन मृगयुना केनचिद्भग्नदर्पः ।
ज्ञात्वामुं द्रोणशिष्यं शिवशिव गुरवे दक्षिणाकैतवेन
छिन्नांगुष्ठाग्रहस्तं व्यधित ननु भवांस्तंवृथैवैकलव्यं ॥ १७॥

**अर्जुनः**—अयि भोस्स्वजातिपक्षपातिन् ? अत्र कोवा ममापराधः ? तस्य महावीरस्य गरीयसी गुरुभक्तिरेवापराध्यति ।

**किराती**—णाह ! जुत्तं उत्तं णेण । ता अण्णंभण जइवाअत्थि ।

**किरातः**—आ अस्त्वेतत् । अथास्माभिर्मुनिव्यञ्जनेभ्योऽस्मत्प्रणिधिभ्योवनचरेभ्य आकर्णितं किंचित् । तच्च कथयामि ।

आदावन्तकजन्मनापि च मरुत्पुत्रेण चैकां स्त्रियं
भुक्तामेवहि भुङ्क्ष एव मनुजौ नासत्यपुत्रावपि ।
हाधिक्कष्टमभूतपूर्वमिह वस्सौभ्रात्रमन्यादृशं
माता तत्र किल व्यवस्थितिकरी सापि ह्यनेकप्रिया ॥ १८ ॥

**अर्जुनः**—एवं किल तत्वानभिज्ञैरश्रुतमात्रकृतप्रलापैः प्रचार्यते किंवदन्ती प्रतार्यन्ते च महान्तोऽपि वस्तुतस्तु पञ्चाऽपि पञ्चप्राणाइवाभिन्ना एव वयं । साप्ययोनिजा सत्यमेकपत्न्येव पांचाली । देव्याअपि कुन्त्या देवजनपरामर्शो न दोषाय । अत्र च सर्वज्ञोभगवान् व्यासः प्रमाणम् ।

**किरातः**—(सहस्ततालं विहस्य) अहो "ब्रह्महत्याया गोहत्याकरस्साक्षी"ति समीचीनमेतत् ।

कस्यापि तापसविटस्य हि दाशपुत्र्यां
जातस्सुतोवरजदारजनाभिमर्शी ।
व्यासः प्रमाणमिह धूर्तजनानयाना
मित्यग्रतोमम वदन्नविलज्जसे किम् ॥ १९ ॥

**अर्जुनः**—(कोपसंवरणं नाटयन्) अयि वनेचर ! नैतत्सांप्रतं । यत्साक्षात्कृष्णद्वैपायनमपि नाद्रियसे । पश्य—



योगाचार्यस्समग्रश्रुतिविदतिमहास्सत्पुराणागमानां
धीमानष्टादशानां कविरपिच महाभारतस्य प्रणेता ।
किञ्चायं सूत्रकारः परमसुखकरे हन्त वेदान्ततन्त्रे
वेदव्यासोमुनीन्द्रः कथय कथय भोः कस्य न स्यात्प्रमाणम् ॥

तदलमतिप्रसंगेन । महन्निन्दा खलु दुरुदर्का भविष्यति ।

**किरातः**—(जनान्तिकं) प्रिये ! किञ्चिदिव विकृतिमापन्नो विजयस्य शान्तभावः कोपेन । तत्पुनरपि संधुक्षयाम्यस्य कोपस्फुलिंगं ।

**किराती** पेक्खिस्सं दाव कोवपाडलं वि वच्छस्स वअणं ।

**किरातः**—(सपरिहासस्मितं प्रकाशं) अयि कानाम दुरुदर्काभविष्यति ? तथापि तिष्ठतु तावदेषविवादः । अन्यदपि ब्रवीमि ।

स्त्रीहिंसाधृतदुग्धचौर्यविदुषो गोघातिनः केवलं
गोपस्त्रीकुलदुर्विटस्य हठतः स्वं मातुलं जघ्नुषः ।
कष्टं गोपकुलाधमस्य भगिनीं त्वं पर्यणैषीरहो
सन्यासिच्छलतस्तथापि न भवान् किं निन्द्यकर्माभवेत् ॥ २१ ॥

**अर्जुनः**—(सरोषं) अरे किमतिप्रगल्भसे यद्देवं वासुदेवमपि प्राकृतमिव पश्यसि ननु रे मूर्ख !

साक्षादेव दशावताररचितक्रीडाविधेरष्टमीं
मूर्तिं हन्त हरेर्विगर्हयसि यत्तस्याधुना पाप्मनः ।
नोचेत्तापसधर्मयन्त्रितभुजस्थेमा हठादर्जुनः
प्रायश्चित्तमकारयिष्यदिह ते मर्मातिगैस्सायकैः ॥ २२ ॥

**किरातः**—(सहासं) हन्त किमस्मास्वपि सायककथां प्रस्तौषि ? अयि भोस्तपस्विन् ! विहीनपौरुषाणां त्वादृशानां कियदस्ति सायकप्रयोजनं ? हन्त किं न विदितमेतत् ?

पञ्चानामपि वः प्रियां कुरुपतेराज्ञेति दुश्शासने
केशाकर्षिकया विकृष्य मिषतां युष्माकमेवाग्रतः ।
मध्येराजसभं मुहुर्मुहुरुरोघातं रुदन्तीमहो
वस्त्राक्षेपविनोदिनि व्यययति स्पष्टं हि वः पौरुषम् ॥२३॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

**अर्जुनः**—अरे ! किमेतेनास्मान् निष्पौरुषान्मन्यसे ? नैतदेवं ।

सत्यं नामेदं धर्मजन्मा सराजा
प्रेष्यानस्मानप्यात्मदाराविशेषम् ।
द्यूते भग्नश्चेन्नो पणेन न्यरोत्स्यत्
तत्रैवाश्रोष्यस्त्वं पुनः पौरुषं नः ॥ २४ ॥

**किरातः**—(अनाकर्णितकेन) अपि च भोस्तव पौरुषोपार्जनोपायोऽपि तादृश एव ।

हन्त त्वं वनिताहृतार्द्धवपुषः पार्थोविटस्य स्वयं
भिक्षालब्धभुजश्श्मशानवसतेर्नग्नस्य भोःकस्यचित् ।
दुर्देवस्य जलार्चितस्य बहुलक्रोधस्य संसेवया
दुर्वारारिनिबर्हणाय सुलभं यन्मन्यसे पौरुषम् ॥ २५ ॥

**अर्जुनः**—(सक्रोधोत्कर्षं) अरे किरातापशद ! किंकिं भगवन्तमष्टमूर्त्तिमप्यधिक्षिपसि ? तदयंनभवसि ।

**किराती**—(जनान्तिकं) अज्जउत्त ! पेक्स्वपेक्स्व । एसो दाणिं तुए एव्व भणिदं तुह णिंदामयं वअणं सुणिअ पअलिदरोसहुदवहणिस्सेसणिवीदसंतत्तणं झत्ति समुब्भिण्णसोणिअसंघोहसोणवण्णं भसिणभिउडिभंगभूसणं वअणं उव्वहन्तो अण्णारिसो विअ संवुत्तो वच्छभग्गुणो ।

**किरातः**—प्रणयिनि ! स्वभावएवायमस्मद्भक्तानां ; यदस्मन्निन्दाश्रवणमात्रकेप्यसहनत्वं (सस्मितं) किं च स्मारयति मामयं अनेन कोपोद्भेदेन भवत्या अपि कमप्यवस्थाभेदं । तथाहि ।

वर्णिच्छलात्तव तपोवनमभ्युपेत्य
मय्येव गर्हणविधिं मम सन्दधाने ।
आरक्तदृष्टिदरविष्फुरिताधरोष्ठ
मापाटलं स्मरसि वक्ष्यसि वक्त्रपद्मम् ॥ २६ ॥

**किराती**—(सलज्जं) एव्वं आसी ।

**अर्जुनः**—अरेरे दुष्टशबर ।



किंकिं जल्पसि सर्वलोकवपुषो देवस्य गौरीपते
र्दोषान्निर्भयमेव गाण्डिवभृतो वीरस्य संश्रृण्वतः ।
एषत्वां शरभिन्नवर्ष्मविगलद्रक्ताक्तपृथ्वीतलं
प्रत्यङ्गं परिखण्डयन् पलभुजां भोज्यं करोत्यर्जुनः ॥ २७ ॥

**किरातः**—(सस्मितं) संक्रदनननन्दन ! किमनेन वृथा संरंभेण ?

मया ननु यथार्थमित्यभिहितं किमप्येवम-
प्यहोनुखलु भोः क्षणात् त्वमिह पार्थ यत्कुप्यसि ।
तपस्विसहचारिणीसुलभकोपता वा तपः
प्रसादफलमेव वा तदपि चण्डचण्डीशितुः ॥ २८ ॥

**अर्जुनः**—अरे दुरात्मन् । तिष्ठतु तावदस्मद्विगर्हणं । गुरूनप्यधिक्षिपसीत्यपि शमप्रधानतयास्माभिः क्षान्तन्नाम पाराशरिपरीहासोऽपि भवतु नातिकोपकारणं । भगवन्मुकुन्दनिन्दनसंधुक्षितः परमेश्वरदूषणाक्रियासमभिहारसमुद्दीपितः केन पुनर्निवार्यते क्रोधाग्निसंवेगः ।

यदि परमविषह्यक्रोधभूमाप्यशक्तः
स्वयमनयकृतस्ते शिक्षणे स्याज्जनोऽयं ।
हृदयभुवि निगूढं तर्हि जीर्येत रोषः
कथमिव वद शक्तोमर्षयेच्छक्रसूनुः ॥ २९ ॥

तदवश्यमनुभूयतामर्जुनकोपस्य फलं ।

अथवा—

मौर्ख्यात् पण्डितमानिना बत मया यद्यद्दुरुक्तं स्वयं
क्षन्तव्यं तदिह त्वयेति पदयोर्मूर्ध्ना स्पृशन् प्रार्थय ।
नोचेद्गाण्डिवमुक्तमार्गणगणव्यापीतसत्वस्य ते
यावज्जीवमियं दधातु दयिता वैधव्यदीर्घव्रतम् ॥ ३० ॥

**किराती**—(स्वगतं) अह्महे अहिअदरं उद्भामिओ धणंजओ रोसेण ।

**किरातः**—(सपरिहासं) अहो महांस्ते व्यामोहः ! यदस्माभिः क्षमणीयमात्मानं मन्यसे । अथवा एतावतापि त्वमेनं जनं न जानासि ।

*

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

धवलगिरिविहारी हैमवत्याश्शबर्याः
पतिरखिलकिरातग्रामणीरेष उग्रः ।
अरिभिरटविदुर्गं प्रापितस्त्वं तपस्वी
कुपितइति भयात्किं मूढ कुर्यात्प्रणामम् ॥३१॥

अथ यदि तव युयुत्सा तत्र सज्जा एव वयं । पश्य ।

प्रागेवैतदविज्यमस्ति सुदृढं तालप्रमाणं धनु
र्दुष्टारण्यमृगद्विषश्च निशिता नानाप्रकाराश्शराः ।
किन्त्वेते चिरकालशीलिततपश्शुष्कं वपुस्तावकं
निर्भिद्याशुतरं ह्रियेव विवशाश्शंके विशेयुर्महीम् ।

अर्जुनः—( सकरुणमिव )

अरे धनञ्जये शस्त्रज्वालामालादुरासदे ।
पतङ्गपातं पतसीत्यहो मोहाद्विनङ्क्ष्यसि ॥ ३३ ॥

किरातः—अलं वृथाविकत्थनेन । ननूपस्थितस्संशयच्छेदी सङ्ग्रामः यत्र द्रक्ष्यासि विनाशोवा विजयोवेति ।

अर्जुनः—यदि समराय सन्नह्यसि त्वं तर्ह्यामन्त्रय दीर्घप्रवासायेमां किरातीं ।

किरातः—अये वीरमानिन्! आमन्त्रितदारैवेयमस्मज्जातिर्वीरव्रतचर्यासु ।

किन्तु ।

व्यात्तास्या इव गह्वरैर्गिरिणदीपातैस्सहासाइव
क्षुभ्यत्सत्वगणस्वनैर्बहुविधं मुक्ताट्टहासा इव ।
व्यावृण्वन्त इवाम्बरं निबिडितैः प्रौढद्रुमौवैरमी
भागा नैव रणक्षमा हिमशिलावल्मीकदुस्सञ्चराः ॥ ३४ ॥

तदितो निष्क्रम्य बहुलशष्पमृदुलमिममधित्यकाभोगमभिरुह्य समाराधयावो धनुर्वेददेवताम् ।

अर्जुनः—तथास्तु उभौ साटोपं परिक्रामतः ।

किराती —(अनुसरन्ती) णाह ! साहसिअ ! माविसुमरेहिचलणपज्जुवासणपराअणं इमं यणं ।



किरातः—(परिवृत्य सस्मितं) प्रिये ! माकुपः । वीरधर्मपरायणचित्तवृत्तिना मया कञ्चित्कालमनादरणीयासि संवृत्ता । तदत्रैव निवर्त्तस्व । क्षणादेवामुं भग्नदर्पं विधाय यथेष्टं प्रसादयामि भवतीम् ।

किराती—जइ एसो दे थिरो णिच्छओ; ता देव्वंतह विअ अवरन्पडिवादणमहूसदं दव्दुं पन्थेन्ती खणं चिट्ठिस्सं ।

किरातः—एष ते नन्दिशबरः प्रत्यनन्तरीभविष्यति । (अर्जुनप्रति) एहि रे धनञ्जय एहि ।

अर्जुनः—अयमयमापतित एव ।

उभौ—(अन्योन्यमुद्दिश्य) तिष्ठ रे तिष्ठ ।

एष त्वां विशिखविशीर्णवर्ष्मखण्ड
प्रत्यग्रस्रुतरुधिरार्द्रमांसपिण्डं ।
आलम्य प्रियविशितोपहारचर्यां
कैरातीमिह वनभैरवीं धिनोमि। निष्क्रान्तौ ॥ ३९ ॥

नन्दी—(शबररूपःप्रविश्य) स्वामिनी ! पश्यतु भवती । इमौ पुनः स्वामी विजयश्च विकटकोदण्डमण्डितभुजदण्डौ साटोपपादपातप्रकम्पितधराधरपीठं परिक्रम्य विशालमधित्यकाभागमधिरूढौ किञ्चिदिवापक्रम्य परस्पराभिमुखमवस्थितौ । किञ्च समरकर्मणि व्यापृतौच । तथाहि ।

यावद्व्याक्षिपति ध्वनद्गुरुगुणं देवः पिनाकं धनु
स्तावत्तत्प्रतिनादभेदि विजयो गाण्डीवमाकर्षति ।
यावद्वा विशिखान् प्रभुर्द्धनुषि सन्धत्ते सहेलस्मितं
तावद्देवि विशेषयन्निव विभुं पार्थश्शरान्मुञ्चति ॥ ३६ ॥

अहो क्षणादेवानयोर्धनञ्जयधनञ्जयाक्षयोः ।

परस्परस्पर्द्धितयेव बाणैः
गाढावगाढैः प्रसृतांशुजाले ।
परिस्रवद्रक्तविरक्तवर्णे
बालार्कसाम्यं वपुषी दधाने ॥ ३७ ॥

किराती—अय्महे दुवाणं पि एदाणं अविसेसिदपरोपरं लाहअं दंस-

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

अंताणं अविण्णादगहणसंधाणमोक्खेहिं कोअत्णगुणाव्वसूदेहिं विअ णिरंतरपसारं णिस्सरंतेहिं कलंबअकदंबएहिं पच्छादिअंविअ विअत्थळं पडिहाइ ।

**नन्दी**—स्वामिनि ! साधारणीं शरप्रयोगचातुरीं किञ्चिदिव प्रदर्श्य संप्रति दिव्यास्त्रप्रयोगपाटवं प्रकटयतीव देवः । पश्यतु देवी ।

एते कूटकिरातराजवपुषा देवेन भूषापदा
न्निर्म्मुक्ताइव कर्णमन्त्रितधनुर्ज्यासंक्रमारोहिणः ।
बाणीभूय विनिस्सृता जवमरुत्फूत्कारनिर्य्यद्विषा-
नागाः पार्थमुपाद्रवन्ति शतशो नागास्त्रमन्त्रोक्षिताः ॥३८॥

**किराती**— (सस्मितं) जंकिंचिएदं वच्छफग्गुणस्स । एसो दाणिं पडिविहाणं पडिवज्जिस्सदि ।

**नन्दी**—(साश्चर्य्यं) सत्यमाह देवी । हन्त तपोनुरूपं पराक्रान्तमर्जुनेन यतः ।

रुद्रास्त्रं सन्दधाने विजयइह धनुस्संगिनोबाणदण्डा
देते निर्य्यान्ति चर्माम्बरपरिलसिताः कालकण्ठास्मिताङ्गाः ।
त्र्यक्षाश्चञ्चज्जटामण्डलकपिशशिखाचुम्बिशीतांशुलेखा
रुद्राश्चित्रं बतैषां वपुषि परिणतं भूषणीभूय नागैः ॥ ३९ ॥

**किराती**—इदोदाव किंपि विहसिदमुहेण अज्जउत्तेण तामससरोपहिदो । जेण महविदुणा गुहागब्भादो झत्तिणिस्सरंतेहिं विअ अंधआराणिझरेहिं रअणीभूदंविअ दिअहं पेक्खामि ।

**नन्दी**—एतदपि नदुर्न्निवार्य्यं धनञ्जयस्य । हन्त प्रयोक्ष्यमाणेनैव भास्करास्त्रेण निश्शेषमापीतमिदं अन्धतमसं । किंच ।

बाणाग्रादग्नियन्त्रादिव घुमुघुमितध्वानधीरं निरन्तं
वान्तैर्मार्त्तण्डबिंबैः प्रचुरघृणिगणोद्भेददुष्प्रेक्षरूपैः ।
अक्ष्णामालोकशक्तिप्रहातिसमुदये तामसास्त्रप्रयोगा
न्नोभेदः किन्तु सर्वोपरि परिवृणुते घोरसन्तापभारः ॥ ४० ॥

अहो महती तापनशक्तिरमीषां भास्कराणां । तथाहि ।



सन्तापात्स्यन्दमाने विपुलहिमदृषत्संचये ये प्रभूता
हैमांभोनिर्झरास्ते झटिति ततइतो विस्तृतैरंशुयन्त्रैः ।
निश्शूष्यन्ते समन्तादपितु पुनरमी व्योम्नि कल्लोलमाला
विक्षोभं कुर्वतेस्मिन् प्रचरतु मृगतृष्णेति मिथ्यापवादः ॥४१॥

**किराती**—अम्महे दूसहोसंदावो । ता किं पडिविहाणं ।

**नन्दी**—देवि ! प्रतिविहितमेव देवेन यतस्सन्तापोपशमो जायते । हन्त पश्यतु देवी । संप्रति हि स्वामिना ।

अस्तास्त्रमन्त्रमभिमन्त्र्य शरे गृहीते
तस्मिन् प्रभाकरततिः प्रलयं प्रयाति ।
मात्राख्यवेत्रमुखएव महेन्द्रजाल
विद्याप्रदर्शितपदार्थपरम्परेव ॥ ४२ ॥

**किञ्च**—

आग्नेयं ननु मुञ्चति स्मरहरः पार्जन्यमिन्द्रात्मजो
वायव्यं गिरिशोऽपि पर्वतसुते पार्थ स्तथा पार्वतम् ।
दिव्यास्त्रैरिति यत् कृतप्रतिकृतप्रत्याहतप्राभवैः
कुर्वाते रणकेलिमत्र तदयं तुष्टो मुनिर्नारदः ॥ ४३ ॥

**नारदः**—(हृष्टरूपः प्रविश्य) अहो अनयोर्धनञ्जयकिरातरुद्रयोः परस्परसंघर्षभाजोरिव निरन्तरप्रयुक्तनिशितशरशतशकलितशरीरनिस्सरद्रुधिरधारयोस्संप्रहारसंप्रदायमवेक्ष्य चिरादुच्छ्वसितमिव मे चेतः । अन्यादृशीञ्च दिव्यास्त्रचातुरीं संपश्यतो मे कस्मै निवेद्यते हर्षसंवेगः । (विलोक्य) इमां किरातीरूपधारिणीं गौरीमुपेत्य दिष्ट्या वर्द्धयामि । (नेपथ्ये) अये धनञ्जय ! जानासि दिव्यास्त्रभेदान् । किन्तु किमेतैः प्रत्यस्त्रप्रतिहन्यमानप्रभावैः अकेवलपौरुषप्रख्यापकैर्ज्ञातैः प्रकटितैर्वा । अथ यद्यस्ति ते बाहुवीर्यं दर्शय केवलविशिखजालैः पश्यामि ते शौण्डीर्यम् ।

**नारदः**—(उपसृत्य) देवि ! दिष्ट्या वर्द्धसे । भर्तृपुत्रयोस्समरचातुर्यदर्शनमहोत्सवेन ।

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

**किराती** — हुंणारदो । णारद ! पेखणं पुणोवि केवलत्राणपओअवेअव्हिं एव्व पुलोइदुं इच्छइ अज्जउत्तो वच्छपग्गुणस्स ।

**नारदः**—अथकिं । अम्ब पुनरपि सफलयामो नयनयुगलं (पुनर्नेपथ्ये) अरे परमशिवदूषणमहापातकिन् किरातापशद ।

दिव्यैः कृतप्रतिकृतप्रतिहन्यमानैः
रस्त्रैर्न चेत् भवति पौरुषतत्वबोधः ।
पश्यान्यथा पुरहरप्रियशिष्यशिष्य
शिष्यत्वमद्य वरमूर्जितमर्जुनस्य ॥ ४४ ॥

**नन्दी**—अहो वचनविरामक्षणएवाकर्णाकृष्टगाण्डीवगुणनिरन्तरनिस्सरद्विपारधारासारसहस्रसंपातै स्संच्छादितस्संस्तम्भितइव देवो धनञ्जयेन ।

**किराती**—(सस्मितं) जिदं जिदं वच्छफग्गुणेण । जं अज्जउत्तोवि पज्जाउलोविअ दीसइ ।

**नन्दी**—देवि ! भक्तपक्षपातिनि ! पश्य विदलय्य विशिखसंहतिं विरचय्य विवरं तमसइव शरसञ्चयस्य कुहरात् निर्गच्छता सुधाकरेणेव विलसितं देवेन ।

**नारदः**—हन्त पुनरिदानीं ।

पुंखानुपुंखनिपतच्छरजालमाला
संघातवीचिभिरसौ कुहनाकिरातः ।
भूयोप्यदर्शनपथं विजयेन नीतः
किंताम्यतीव विकसत्करुणं विमुह्यन् ॥ ४९ ॥

**किराती**—(स्वगत) किएत्तकादव्वं जेण अज्जउत्तसमाअमे वच्छविअअस्स अण्णारिसं वि वीरत्तणं पुणोविपुलोअइव्वं । णं अत्थि उपाओ । अज्जदाव वच्छपग्गुणस्स विसिहवग्गंपुंहीकरिस्सं । तदोअएसोकिं पाडिवज्जस्सदित्ति पेक्खिस्सं ।

**नन्दी**—अहो ! आश्चर्य्यमाश्चर्य्यं ! इतः प्रबुद्धे देवे विशिखसहस्रैस्सर्मर्मघातं हन्यमानेन बीभत्सुना ।



आभुग्नभ्रूकुटीकं परिभवविलसत्कोपशोणाक्षिकोणं
तूणीरात् कृष्यमाणा विकचकुसुमतां यान्ति हाहन्त बाणाः ।
भूयो भूयोऽपि गृह्णन् प्रसवविशिखतां वीक्ष्य किञ्चिद्विलक्षो
मायाविन् ! तिष्ठ तिष्ठ क्षणमिति सपुनः पुष्पवर्षं करोति ॥

**नारदः** – (सस्मितं) अयिदेवि !

भूयो भूयः प्रसवविशिखैरर्जुनेनार्द्यमानो
नूनं स्वामी स्मरति कुसुमैर्विध्यतो मन्मथस्य ।
येनेदानीं विवलितगलं सस्मितं सानुराग
स्मेरालोकं मदनमथनः पश्यति त्वां पुरेव ॥ ४७ ॥

**किराती**—(स्वगतं) अम्महे ! साहसिअत्तणं वच्छधणंजअस्स । जं एआरिसं अज्जउत्तमुहकमलं खणव्वंपिमे णदंसेइ । हध्धि कुसुमसंचआसारेहिं पच्छादिदोएव्व मेणाहस्स वअणकलाणाहो । ताणंओहीणत्राणं करिस्सं । अह पेक्खिस्सं एसोकिं पडिपज्जिस्सदि त्ति ।

**नन्दी**—(साश्चर्यं) अहो ! अस्खलिता वीरव्रतचर्य्या विजयस्य । अनिवार्यश्च समरसंरंभः यतः ।

शून्यं वीक्ष्य शरैस्सुमैरपि निजं तूणीरयुग्मं हठात्
ज्यां विछिद्य सरोषहुंकृति मुहुर्गाण्डीवमुद्भ्रामयन् ।
किंचित्प्रोन्नतपादपार्ष्णिभुजयोर्विख्यापयन् विक्रमं
वीरः कूटकिरातमूर्ध्नि कुरुते पार्थः प्रहारार्चनम् ॥ ४८ ॥

**नारदः**—एष भगवानपि पुनः पुनस्ततइतः पिनाकपरिभ्रमणेन गाण्डीवप्रहारान् परिहरन् दृढप्रहारितया नामपार्थस्य केनचित्ताडनेन विशीर्णमुष्टिविगलिते हस्तात् निजे धनुषि ।

मुहुर्मुहुरितस्ततः करतलेन संवारयन्
मुहुर्विपरिवर्त्तनैर्विजयताडनं वञ्चयन् ।
मुहुर्दृढतराहतिक्षतशिराः क्षरच्छोणितं
मुहुर्मुहुरुदीक्षते दशदिशो विमुह्यन्निव ॥ ४९ ॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

नन्दी—(सवैलक्ष्यमेव) हन्त नितरां प्रगल्भते शुनासीरसूनुः तदहममुमभिपत्य गृह्णन् किंचित् समाश्वासयामि स्वामिनं (गन्तुमिच्छति) ।

किराती—(सहासाक्षेपं निवार्य सस्मितं) अम्महे वच्छफग्गुणस्स संरंभो । जं एसो गाढप्पहारपप्फुडंतखदप्पहाणिस्सरंतअलल्ललाअंतरुहिरसीअशसारेहिं तारइदंमिअज्जउत्तमोलिभाअं मिपुणोपुणोविवड्डिअवेअंपहरंतो दुगुणेइ मे कोदूहलं।

नारदः—(स्वगतं) अहो वात्सल्यातिरेको देव्याः यदपराध्यन्तमप्यनुकंपते । तथाहि ।

मुहुश्चलच्चन्द्रकचार्चितेऽस्मि
न्नुच्चैः प्रभोर्मूर्द्धनि ताडयन्तम् ।
मुहुर्नदन्तं मुहुरुत्पतन्त
मुद्वीक्ष्य पार्थं स्मयते भवानी ॥ ९० ॥

नन्दी—अयमहमेनन्निवारयामि यद्यनुमनुते स्वामिनी ।

नारदः—अयि नन्दिन् ! अलं संभ्रमेण । पश्य तावदितः प्रहारसमये ।

पार्थप्रहारमभिसोढुमपारयन्त्या
द्राग्गंगया हरजटाटाविगूढगात्र्या ।
रक्ताक्तवीचिभुजमीषदितः प्रसार्य
गाण्डीवमाहतमिवाद्यविलीनमेव ॥ ९१ ॥

किराती—पेक्खिस्संदावअज्जाकिंपडिवज्जिस्सदि वच्छफग्गुणोति । (नेपथ्ये)

मायाभिः कुसुमीकुरुष्व विशिखांश्चून्यीकुरुष्वैव वा
गाण्डीवंच विलाययस्व नभवेदेतावता ते जयः ।
रेरे दुष्टकिरात ! तिष्ठ भुजयोः पश्याद्यमे पाटवं
मुष्टीमुष्टितलातलिप्रकरणे सज्जोऽस्मि भीमानुजः ॥ ९१ ॥

नारदः—पश्य देवि ! महोत्साहसाहसत्वं महेन्द्रनन्दनस्य ।

## ABHIGNANA SAKUNTALA—(*Continued*).

दृष्टो विवृत्य बहुशोऽप्यनया सतृष्णं ।
अत्रान्तरे श्रवणकातरतां गतोऽस्मि ॥

"Though she has cast many a longing sidelong look at me I am now grown mighty fearful what she is going to answer."

At last he hears from her own lips a confession of love—not intended for his ears. She declares she cannot live without him. Her love is highly approved of by her friends. They prepare a love letter. Sakuntala writes and reads

तुज्झण आणेहि कशंमम उण कामो दिवाबि रत्तिमि ।
णिग्घिण तवडबली अं तुडवुत्तमणोरहाड अंगाड ॥

"How thy heart is disposed I know not. But for me, by day and night, Cupid without mercy burns my frame endued with desires pointing to thee."

When Dushyanta heard this plain, but lovely and touching appeal he could no longer control his impatience, but he must reveal himself. They are all taken aback but welcome this unexpected favour of fortune. As we say in Tamil "the God we went to worship, met us on the way." The maids therefore recommend her to his love and leave them alone.

Alone with her lover, Sakuntala was overcome by extreme bashfulness. Dushyanta wanted to marry her at once in Gandharva fashion, i. e. by a mere mutual acceptation of the lovers. But while Sakuntala's shyness delayed his object he was interrupted by an old female ascetic who comes seeking Sakuntala. With many a regret for her foolish shyness she departed as slowly as possible. Sakuntala was gone, the place was deserted, yet the king could not easily depart from the place where she had been. Another time fortune is more favourable. They are married in secret, and the pair are happy in each other.

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

But the course of true love never did run smooth. The sage Durvasas famous for his sudden bursts of anger happened to visit the hermitage. Sakuntala was oblivious of his presence her mind being fixed on her absent lord. The mild Rishi at once bestowed on her a curse:—आः अतिथिपरिभाविनि ।

विचिन्तयन्ती यमनन्यमानसा
तपोधनं वेत्सि नमामुपस्थितम् ।
स्मरिष्यति त्वां न स बोधितोऽपि सन्
कथां प्रमत्तः प्रथमं कृतामिव ॥

"Oh Outrager of hospitality !

He in thinking of whom, thou dost not regard me the spiritually rich, that am present here, he shall not remember thee for all thy remindings, like a drunkard that forgets what he did in liquor."

Sakuntala knew neither of his coming nor of his cursing. Anasuya and Priyamvada alone have listened to this and one of them ran after the sage to entreat him to mitigate the penalty. The sage relented so far at to provide that a mark of recognition such as a ring could restore the king's lost memory. Well there was a way out of it; for Sakuntala had with her a ring the gift of Dushyanta, bearing his name, and intended by him to keep her company in his absence. They agree to keep it secret, especially from Sakuntala.

को णाम अण्होदएण णोमालिअं सिञ्चेदि ।

"who would water the Nava Mallika with hot water".

The curse took rapid effect. Dushyanta forgot all about Sakuntala, except a vague inward unconscious feeling of separation from some beloved object he knew not what. He did not send people to fetch her home. He did not even send her message to comfort her. Says a Sishya of Kasyapa.

अन्तर्हिते शशिनि सैव कुमुद्वती मे
दृष्टिं ननन्दयति संस्मरणीयशोभा ।
इष्टप्रवासजनितान्यबलाजनस्य
दुःखानि नूनमतिमात्रसुदुस्सहानि ॥



"That same lily pond that was so lovely when the moon did shine, does now not please the sight in the absence of her lord, her glory being a matter for memory. Surely what tender ladies suffer through the absence of their lovers, are miseries insufferable".

Kasyapa has returned from his pilgrimage. A heavenly voice had informed him of the marriage of his daughter and her pregnancy. The sage liked the match and prepared at once to send Sakuntala home to her husband escorted by his disciples. What a parting was there! The holy sage who lives apart from all the world, he himself the great kasyapa says.

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठःस्तम्भितबाष्पवृत्तिकलुषः चिन्ताजडं दर्शनम् ॥

"That Sakuntala goes from me to-day, my heart is filled with regret, my throat is choked through suppression of tears and my eyes see not, for I am wrapt in thought".

He addressess the trees of the hermitage.

पातुं नप्रथमं व्यवस्यति जलं युष्मास्वपीतेषुया
नादत्तेप्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयंयाति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥

"She who would not think of drinking when you had not been watered, who though she loved ornament, forbore wearing your young leaves for love of thee, who celebrated festivals on the first day you blossomed— such a one is going home to her husband, let all of you give her leave".

And again, Priyamvada.

उग्गलिअदब्भकवलामिआ परिच्चत्तणच्चणामोरा ।
ओसरिअपण्डुपत्ता मुअन्ति अस्सू विअलदाओ ॥

Grass mowed drops from the mouths of deer, the peacocks have given up their dancing, and the creepers drop tears, as it were, in the shape of falling faded leaves".

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

Slowly the sage turned back homeward, his child being far out of sight.

Meanwhile Raja Dushyanta was leading an oblivious life, yet suffering something vaguely like the woes of separation. The curse prevents him from remembering Sakuntala, yet there remains some strange impresson of a happiness once enjoyed but now denied him.

He is informed that some sages from the northern hills are come to him, escorting a lady and bearing a message from Kasyapa. They are come to deliver Sakuntala into her husband's care. When the message was delivered the Raja asked what all this meant. He could not recognise his wite. He wonders who this lovely lady could be. Surely she could not be his wife. He ransacked every corner of his memory but to no purpose.

इदमुपनतमेवं रूपमक्लिष्टकान्ति
प्रथमपरिगृहीतं स्यान्नवेति व्यवस्यन् ।
भ्रमरइव विभाते कुन्दमन्तस्तुषारं
न च खलु परिभोक्तुं नैव शक्नोमि हातुम् ॥

"Thus trying to find whether this figure of faultless beauty that has come in my way, might have been once accepted by me, I am, like a bee held in suspence by a lotus but with dew within, in two minds whether I shall have her or not".

Sakuntala now calls to mind the ring he had given her. But it was no where to be found. In vain she rubs its place on her finger. What can she do? Indignation at thus being forsaken by her lawful husband, shame at the doubtful position she was thrust into, sorrow for the loss of all her fond hopes so wrung the poor soul she knew not what to do. She covered her face and began to weep. The Rishis set out homewards; Sakuntala tried to follow them. Upon this the first of them turned severely on her and forbade her to stir a foot and went away. The Raja found no way out of the difficulty but



to wait till further evidence should be forthcoming, and she was entrusted to the care of his own Purohit. But on the way a bright female figure appeared and carried her away. It was Sanumati the friend of Sakuntala's mother Menaka. When the king heard of this strange disappearence he tired to put on an air of indifference, but he was sore at heart, he knew not why.

The time soon came when he was to know why. The ring was found, by a fisherman in the guts of a fish. The king now remembered all about Sakuntala. She was his own wife who had trusted herself to his honor, and been married by him in secret. He had cruelly denied her and turned her adrift. The curse of Durvasas was now over and that undiscoverable mental ailing which was always hunting him ever since he forgot her, now burst forth, with all the combined force of remorse for his cruelty, pity for her misery, and his own woeful separation from her. He grew lean and melancholy.

रम्यं द्वेष्टियथापुरा प्रकृतिभिर्नप्रत्यहं सेव्यते
शय्याप्रान्त विवर्तनै विगमयत्युन्निद्र एव क्षपाः ।
दाक्षिण्येनददाति वाचमुचितामन्तःपुरेभ्यो यदा
गोत्रेषु स्खलितस्तदा भवति च व्रीडाविलक्षश्चिरम् ॥

"He hates pleasant things, his ministers serve him not as they did before, every day, he spends the nights in turning restlessly over the edge of his bed. When he tries, out of mere politeness, to speak words of love to his wives in the harem he stumbles and confuses names, and is overcome by shame for a long time.

A train of reflections pass through his mind. He suddenly cries out "Help! Help!!".

इतः प्रत्यादेशात्स्वजनमनुगन्तुं व्यवसिता
मुहुस्तिष्ठेत्युच्चैर्वदति गुरुशिष्ये गुरुसमे ।
पुनर्दृष्टिं बाष्पप्रसरकलुषामर्पितवती
मयि क्रूरे यत्तत्सविषमिव शल्यं दहति माम् ॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

"That look bedimmed by tears which she cast on me when, after rejection, trying to follow her people, she was sternly bid to stay by her father's *sishya* of fatherly authority, that look does burn me now like a poisoned mountain."

And will she ever come back? No, it is a fleeting dream, a short lived fruit of virtue that is never to return. He looks at the ring. He interrogates it how it could have had the heart to leave her lovely fingers. Or how could he blame an inanimate thing when he, a man, had not the sense to remember and acknowledge his own beloved wife?

कथं नुतं बन्धुरकोमलांगुलिं
करं विहायासि निमग्नमंभसि ।
अचेतनं नाम गुणं नलक्षयेत्
मयैव कस्मादवधीरिता प्रिया ॥

He draws a picture of his beloved and tries to lose his sorrows in the contemplation of it.

साक्षात्प्रियामुपगतामपहाय पूर्वं
चित्रार्पितां पुनरिमां बहुमन्यमानः ।
स्रोतोवहां पथिनिकामजलामतीत्य
जातस्सखे प्रणयवान्मृगतृष्णिकायाम् ॥

"Thus I, who rejected my beloved when she herself came to me, and do now think much of her pitcure, appear now like one who neglectfully passes a full flooded river and then tries to catch water from the mirage".

(*to be continued*.)

## NOTES AND COMMENTS.

PRINCIPAL FAIRBAIRN AND HINDUISM.—Principal Fairbairn of the Mansfield College, Oxford, has contributed a paper on 'Religion in India' to the pages of the *Contemporary Review*, in the course of which he remarks—Hinduism is not a single religion but a huge encyclopaedia of distinct and independent worships; it is not a unity either of thought or custom but an immense multiplicity of sects and their observances. It may be described as the amalgam of all the religious ideas and usages of all the Indian people through all their past. To no two classes, in no two places is it exactly the same thing. Its one permanent and distinctive feature is its social order; where caste is, Hinduism is; where caste is not, Hinduism will not condescend to be. Grant this fundamental institution and it will be tolerant beyond the wildest accidental dream of toleration.

So far Principal Fairbairn. It will be instructive to compare this view of Hinduism with that expressed in the columns of this journal a few years ago.

'Hinduism is a comprehensive term. It embraces within its fold an endless variety of beliefs and practices. It recognises the difference between man and man in the endowment of intellectual capabilities and accordingly offers a multiplicity of forms and beliefs adapted to the various grades of intellect. Such a religion alone can lay claim to universality. Any religion which not perceiving the difference in the innate capacities of several men, offers but one system of belief to all men alike cannot appeal to the almost conflicting religions instincts of mankind and is therefore psychologically faulty. And in this predicament all religions are except Hinduism. But in spite of a variety of beliefs and practices, Hinduism is one religion. The philosophy underlying them all is the same. Its aim in all cases is to take all men by the hand and lead them on, step by step, till at last freed from the association with gross matter, the soul attains its pristine purity and becomes identical with or similar to the Supreme Soul. And if, in this task, it offers different directions to differently constituted intellects, all praise is due to its psychological insight and its delicate adjustment of means to end' Sanskrit Journal Vol I.

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

*Bhartrihari*—Yet another translation of Bhartrihari's *Nitisataka*—A century of Indian Epigrams, Chiefly from the Saskrit of Bhartrihari by Paul Elmer More (London and new york: Harper and Brothers) is a work lately reviewed in the Columns of 'India', which says that the translation possesses all the fragrance and grace of Fitz Gerald's well known version of *Omar Khayyam*.

There are already two translations in the field one by Prof Tawny of the India Library and another by Mr. Wortham M. R. A. S. The other two centuries of Bhartrihari, on Sringara and Vairagya (Love and remunciation) are equally worthy of being translated into English aud have, even in a greater degree, the depth of feeling that characterises his *Niti-Satakams*. To bring out the excellence and the flovour of the originals requires perhaps greater tact here.

*Prof Max-Muller on Rebrith.*—In the course of an article contributed in Bengali to the Udbhodhana (March 99), Swami Vivekananda makes the following remarks which we commend to the attention of our readers.

Prof Max-Muller firmely believes in the doctrine of re-incarnation based on his own personal experience, which is a dread to the Christian who has identified the soul with the body; and what is more, perhaps, he believes that his previous brith was in India, and that by coming to India the old frame may break under the rush of suddenly roused recollections is the fear that now stands first in the way of his visit to this country".

This is indeed news to us. But the Swamiji is a personal friend of the veteran Professor and knows what he is writing about. The doctrine of rebirths may be termed the sheet-anchor of the Indian faiths and an utter abomination to the orthodox theology of the Christian Church, and when we hear that a *Chiristian Savant*, born and nurtured in the Chiristian faith, has come to believe in re-incarnation, all that we can say is truth *must* triumph.

## ॥ किरातार्जुनीयव्यायोगः ॥

[ पूर्वप्रकाशितात्परम् ]

**किराती**—णारद ! णखु अच्छरिअं एदं एआरिसस्स वीरस्स (पुनर्नेपथ्ये) अरे क्षुद्रायुधप्रक्षयंविषण्णपाण्डवडिम्भ ।

मा ते सम्प्रति भून्निरायुधतया चित्ते विषादोदय
श्चापं वा यदिवेषुधी तव यथाकामं प्रयच्छाम्यहम् ।
प्रत्यर्थिप्रतिपादितायुधपरामर्शे सलज्जस्य ते
बाहूबाहवि विभ्रमे यदि रुचिस्तत्रासि सज्जावयम् ॥ १३ ॥

**नारदः**—पश्य देवि सरभसमुत्तंभितकुन्तलभारौ दृढनियमितवल्कलवसनग्रन्थिबंधौ साहंकारहुंकारक्ष्वेलारवगभीरं परस्परमाह्वयमानौ किरातरुद्रमहेन्द्रपुत्रौ उत्पतनावपतनोपसर्पणापसर्पणमुखैर्म्मल्लयुद्धप्रचारप्रकारैः प्रक्षोभयन्तौ धूलिजालं, आकर्षणालोलनोत्क्षेपणावक्षेपणादिभिः कर्मभेदैः प्रदर्शयन्तावन्योन्यवैदग्ध्यं सुदृढमुष्टिघटनैस्संचूर्णयन्तौ वक्षःपठिललाटतटादिमर्मस्थलास्थिसंचयं, कठोरतरकरतलप्रहारैः पोथयन्तौ कपोलकुक्षिपार्श्वादिप्रदेशं परिहरन्तौ परप्रहारान् परिपश्यन्तौ परवञ्चनाभेदान् पश्य वारय मन्नोसिनष्टोसीत्यादिवीरवादमुखरितमुखं अविज्ञातपरस्परजयापजयमत्यद्भुतमाकर्षणं दृष्टेः आह्लादनं हृदयस्य विचित्रं संप्रहारं कुरुतः । हन्त कष्टमिदमापतितं । पश्य ।

किरातनाथेरितगाढमुष्टिः
प्रहारसंचूर्णितफालपट्टः ।
क्षतस्नुतासृग्दरमीलिताक्षो
विमुह्यतीवैषमहेन्द्रसूनुः ॥ १४ ॥

**किराती**—(सस्मितं) तपोधण ! णहोइएदिणा किंपि वच्छस्स । पेक्ख पुणो वि खणादो एसो उव्वदन्तो तलप्पहारेण अज्जउत्तस्स गंडत्थलं विअडे-

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

दि । हंधि एसो मे सामी इमिणा पहारेण उक्कंपिदो मुहादो रुहिरं वमंती ओणमिअवअणं किळंतोवि अ चिठ्ठदि ।

**नन्दी**—(किञ्चिदिव स्थित्वा सोल्लासं) अहो जितं जितं देवेन विजयेनच । पश्यतु देवी अयमसौ देवः ।

आश्वस्य क्षणमीषदुत्कटइव क्रोधेन धीरज्वलन्
दोर्भ्यां पार्थमुनिं प्रगृह्य निबिडाश्लेषेण निष्पीडयन् ।
आलोड्याकुलितं निपात्य धरणीपृष्ठे मुहुर्मर्दनैः
व्यामोह्याश्वपसृत्य निर्भरकृपानिघ्नेक्षणं वीक्षते ॥ ९५ ॥

अहो कृतार्थस्तदिदानीं वासुदेवप्रियवयस्यः ।

**नारदः**—(स्वगतं) हन्त सांप्रतमवसितस्समरविधिः । यदसौ देवः प्रसादाभिमुखो दृश्यते । तद्वरप्रदानमहोत्सवमप्यवेक्ष्य यथागतं गच्छामि ।

**किराती**—णंउपसप्पम्ह अज्जउत्तं उपट्ठिदो वरप्पदाणस्स कालो जस्सदिदे चिरं किलिटो तपाणिअमादीहिं मे वच्छो फग्गुणो । (सर्वे परिक्रामन्ति) (नेपथ्ये) ।

धिग्मां धिङ्मम गाण्डिवं धिगपिमे द्रोणस्य तां शिष्यतां
धिग्वंशं मम धिग्गुरून् धिगपि तं मित्रं मुरस्य द्विषम् ।
धिग्भक्तप्रियमानिनं गिरिसुताकान्तं धिगेतत्तपो
येषां वैभवचातुरीफलमहो व्याधेन भग्नोऽर्जुनः ॥ ९६ ॥

**नारदः**—हन्त मोहात् प्रबुद्धस्य विजयस्य प्रलापो वर्तते । (पुनर्नेपथ्ये) अम्ब ! परमेश्वरप्राणनाथे !

करुणामृतद्रवमयी त्वमपि शिवे निष्फलप्रसादैव ।
मयि मन्दभागधेये जात्यन्धे चन्द्रिकेव कथमासीः ॥ ९७ ॥

**किराती**—हंधि हंधि मंवि उवलंभइ । णजुत्तंअदोपरं कालहरणं कादुं । णिव्विण्णो मे वच्छो (पुनर्नेपथ्ये) हा किं करोमि मन्दभाग्यः क्व गच्छामि । गतस्यापि मे कुतो मनसस्समाश्वासः । कष्टं भोः कष्टं ।

मध्ये भीमादिकानां पदभुवि पतितं मामुपाश्लिष्य कश्चि
द्वृत्तैतावत्तपस्ते सफलमिति तपस्सूनुनार्येणपृष्टे ।



क्व ब्रूयामस्तुवैतत्कुरु सदसि परे कर्णदुर्योधनाद्या
एतच्छ्रुत्वा हसेयुस्सुतमपि तदिदं जीविताशां छिनत्ति ॥ ९८ ॥

तत्सर्वथापि नाहमकृतार्थः इतः प्रतिनिवर्त्तितुं शक्नोमि । इहैव प्रायोपवेशनेन दुर्यशोदूषितमात्मानमवसाययन् योगविद्यया परशिवैक्यमनुसन्दधामि ।

**नारदः**—अयि देवि ! त्वरय त्वरय वरप्रदानाय भर्त्तारं यावदयं नतदेकरूपतामासादयति ।

**किराती**—एसा साधइस्सं (सह नन्दिना निष्क्रान्ता) ।

**नारदः**—(विलोक्य)

अयमसाववधूय रुषं ह्रियं
गतमदश्शममेव पुनर्विशन्
पुरहरं विरचय्य मुदाच्युतै
स्सुममयैस्स्वशरैः पुनरर्चति ॥ ९९ ॥

(ततः प्रविशत्युपविष्टोऽर्जुनः । )

**नारदः**—तदहमपि देवं वरप्रदानपर्युत्सुकमुपतिष्ठामि (निष्क्रान्तः ।) ।

**अर्जुनः**—हन्त ! किमेतत् ?

निर्विण्णेन मया मुहुः परशिवध्यानाय संयोजितं
चेतश्चुंबति गाण्डिवाहतिदलच्छीर्षं किरातेश्वरम् ।
एषा सा किल वासनास्तु गिरिशे मृत्पिण्डक्लृप्ते पुरो
मुक्तो मे कुसुमाञ्जलिः क्वनु (पार्श्वतो विलोक्य सशङ्काश्चर्यं ।)
कथं व्याधस्य मूर्ध्नीक्ष्यते ॥ १०० ॥

(सरोषं) अरे मायाकल्पिततपःप्रत्यूह ! किरातहतक ! तिष्ठ रे तिष्ठ (साटोपमुत्थातुमिच्छन्नशक्तस्तिष्ठति । )

( ततः प्रविशति ससंभ्रमः स्वरूपमादाय परमेश्वरः किरातीरूपिण्येव पार्वती विभवनिखिलपरिवारः । )

**परमेश्वरः**—अलमलमलं वत्स क्रोधं जहीहि जितोस्म्यहं
तव सहजया भक्त्या भूयस्तपोनियमेनच ।

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

अपिच विशिखैः किंचावाप्यैर्द्धनुर्हननार्चनैः
पुनरशिथिलैर्मुष्टिक्षेपैः किमन्यदपीच्छसि ॥ ६१ ॥

अर्जुनः— (विलोक्य साश्चर्यसंभ्रमशङ्काविनयलज्जं स्तब्धइव स्थित्वा) स्वामिन्नेषते परमापराधी दासः प्रणमति (तथाकरोति)

परमेश्वरः—आयुष्मन्नेह्येहि (सकरुणमुत्थापयति) ।

अर्जुनः—भगवन्! अतिकारुणिकोऽसि यदपराध्यन्तमप्यनुकम्पसे । अथवा—

सर्वज्ञोऽसि विभो कस्ते सर्वात्मन्नपराध्यति ।
यस्य सृष्टिस्थितिलयक्रीडापात्रं जगत्रयम् ॥ ६२ ॥

(पार्वतींप्रति) अम्ब! पुत्रस्ते फल्गुनः प्रणमति (तथा करोति) ।

पार्वती—वत्स! एह्येहि (उत्थाप्य शिरसि चुम्बति

अर्जुनः—अम्ब! प्रसीद । उपालब्धाऽसि पूर्वं मया निर्वेदोन्मादसम्भ्रमेषु ।

पार्वती—पुत्रक! ननु प्रसन्नाऽस्मि प्रागेव ।

अपिच—

एतादृशउपालम्भः प्रसादायैव केवलं ।
काले वैद्यप्रयुक्तोहि विषक्वाथोऽमृतायते ॥ ६३ ॥

परमेश्वरः—(करतलेनार्जुनस्याङ्गमङ्गं परामृशन्) वत्स! क्लेशितोऽसि बहुविधैरायासैः ।

अर्जुनः—भगवन्! कइव ममैवं कृतार्थजननफलस्य क्लेशो नाम । किंचाद्य भगवत्करकमलपरामर्शामृतेनोल्लाघताञ्च नीतोऽस्मि । मया तु मूढेन महदिदं साहसमनुष्ठितं । तथाहि —

मायाकिरातवपुषि त्वयि गाण्डिवेन
योवा प्रहारविधिराचरितो मयासीत् ।
अद्यापि ते शिरसि तस्य सशोणितानि
दृश्यन्तएव भगवन् बहुशः क्षतानि ॥ ६४ ॥



परमेश्वरः—(सस्मितं) वत्स धनञ्जय! एतानि नाम मम भक्तप्रियतायाश्चिन्हानीति शशाङ्कशकलेन सह भूषणतामुपनीतानि ।

पार्वती- पुत्रक इदमपि ममानुग्रहादस्तु । किमिति—

अद्य प्रभृत्यनुदिनं शिवलिङ्गपूजा
पर्युत्सुका ऋषिसुरासुरमर्त्यनागाः ।
पार्थप्रहारपरिचिन्हितमेव लिंग
मत्यर्थमुत्तममिति स्वयमाद्रियन्ताम् ॥ ६५ ॥

अर्जुनः—अम्ब! महाननुग्रहः अथवा किमुच्यते भगवत्याः करुणातिशयः ।

यतः—

देवे मायाशबरवपुषा मां रणे भग्नदर्पं
कृत्वा पश्चात्सकरुणमिदं रूपमेवादधाने ।
भर्तृप्रीत्या शबरगृहिणी मूर्तिमात्तामिमां ता
मद्याप्युद्यद्बहुलकरुणासंभ्रमाद्विस्मृतासि ॥ ६६ ॥

पार्वती—वत्स धनञ्जय! त्वत्प्रीत्या इदमपि रूपं मे प्रियतरं जातं । तत् कियन्तमपि कालमेतादृश्येव विहर्तुमिच्छामि ।

अर्जुनः—अम्ब! भक्तवत्सले! अयमहम्—

इदं पुनस्ते त्वरितेति नाम
किरातनारीसदृशं स्वरूपं ।
स्मरामि येनैव वरं वरेण्ये
वरप्रदाने त्वरिता न्ययुङ्क्थाः ॥ ६७ ॥

तथाहि समरारम्भसमये—"णाह! साहसिअ! मा विसुमरेहि चलणपज्जुवासणपराअणं इमं जणं" इति । "जइएसोदेयिरोणिव्छओ तादेव्वं तुहविअअवरव्पडिवादणमहूसवं दव्ठुं पत्थेंती स्वणं चिव्ठिस्सं" इतिच समादिष्टंहि भगवत्या । हन्त मया तु तदा रोषावेशभ्रंशितविवेकेन स्फुटोऽप्ययमर्थो नावधारितआसीत् ।

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

**परमेश्वरः**—वत्स पार्थ ! मयाऽपि तव दर्पापशमनायैवैवं त्वां प्रकोप्य समरः कारितः ।

**अर्जुनः**—तदप्याज्ञप्तमेव तदा देवेन क्षणादेवामुं भग्नदर्पं विधाय यथेष्टं प्रसादयामि भवतीं" इति ।

**परमेश्वरः**—( सस्मितं ) समरसंरंभमध्ये अनयैव मायाकिरात्या तव पराक्रमदर्शनलोभेन कुसुमीकृताश्शून्यीकृताश्च ते सायका अक्षया एव सदा-तूणीरयुगं पूरयन्तु । अपिच ।

प्रहारकाले मम मौलिभाग
निगूढया हन्त सुरस्रवन्त्या ।
हृतं धनुर्गाण्डिवमेतदेतत्
गृहाण सर्वारिनिबर्हणाय ॥ ६८ ॥

( इत्यर्पयति । अर्जुनस्यादरं गृह्णाति )

**परमेश्वरः**—किंच ।

यल्लाभस्पृहयालवस्सुचरिता अद्यापि देवासुरा—
यत्सिध्यैव भवेन्महत्यपि सदा सङ्गमरङ्गे जयः !
अस्त्रं पाशुपतं तदद्य भवते दास्यामि पुण्यात्मने
भूभारक्षपणोपयोगि तदिदं सोपग्रहं गृह्यताम् ॥ ६९ ॥

इति यथाविधि कर्णे उपदिशति । )

**अर्जुनः**—( सहर्षोल्लासं ) अहो पाशुपतास्त्रस्य प्रभावः ।

यदहं पूतमात्मानं सर्वारिविजयक्षमम् ।
त्रैलोक्यरक्षापर्याप्तं मन्येयास्य प्रकाशनात् ॥ ७० ॥

अयि भगवन् । सिद्धार्था वयं । तथाप्यनुगृह्णातु मां देवः परपराजयशक्तिलाभाय ।

**परमेश्वरः**—( सस्मितं ) वत्स ! किमाशिषा ?

नरस्य ते पार्थ वशंवदेस्मिन्
नारायणे तिष्ठति वासुदेवे ।



जयः करस्थः खलु मत्कृतेय
माशीःप्रयुक्तिः पुनरुक्तिमात्रम् ॥ ७१ ॥

तथापि समुदाचारइत्यनुगृह्णामि । विजय नित्यमस्तु ते विजयइति किं ते भूयः प्रियमुपकरोमि ।

**अर्जुनः**—अयि भगवन् ।

जातं मे सफलं तपोपिच भवान् मायाकिराताकृति
र्युद्धेनापि मया प्रसादितइति प्राप्तं प्रथीयो यशः ।
लब्धं पाशुपतास्त्रमिष्टमरयस्सर्वे विजय्याः कृता
गौरीवल्लभ सांप्रतं तव कृपापात्रं कृतार्थोर्जुनः ॥ ७२ ॥

तथापीदमस्तु ( भरतवाक्यं )

धर्ममूलोस्तु विजयो दुःखं सौख्ये विलीयताम् ।
सर्वे भवन्तु सुखिनः सर्वत्राप्यस्तु मङ्गलम् ॥ ७३ ॥

( निष्क्रान्तास्सर्वे )

किरातार्जुनीयव्यायोगस्समाप्तः ॥

॥ शुभमस्तु ॥

——:(-*-):——

The following collection of slokas was picked up by me last January in the Library of the Jain High Priest of Chitamoor, South Arcot District.

The manuscript is written in Grantha character in the usual beautiful jaine style. I believe some of the verses may be traced to well-known authors, but others appear to be original or at least their authorship is unknown. They all have a naive simplicity and charm of their own and from their epigrammatical nature are worthy of a wide publicity. With this object I have sent the collection to the enterprising and zealous editors of the Samskrit Journal for publication.

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

As to the authorship it is not unlikely that most of the verses were by Jain poets.

V. VENUGOPAUL CHETTY, I. C. S.
*Sub-Collector, Tindivanam.*

---

॥ श्री रामो विजयतेतमां ॥

पुण्यस्य फलमिछन्ति पुण्यं नेछन्ति मानवाः ।
नेछन्ति कल्मषफलं पापं कुर्वन्ति यत्नतः ॥ १ ॥
लोके गरीयसी माता मातुरप्यधिकः खलः ।
माता मलं करेणैव जिह्वया क्षालयेत् खलः ॥ २ ॥
अदत्वा मादृशो माभूत् दत्वा त्वत्सदृशो भव ।
शिक्षयन्ति नयाचन्ते देहीति कृपणं जनाः ॥ ३ ॥
वयसः परिपाकेपि दुर्जनस्य शमः कुतः ।
परिपक्वापि माधुर्यं नोपयातीन्द्रवारुणी ॥ ४ ॥
देहीति वचनं श्रुत्वा देहस्थाः पंचदेवताः ।
देहं मुक्त्वा विनिर्यान्ति धीह्रीश्रीकान्तिकीर्तयः ॥ ५ ॥
दुर्जनः प्रथमं पूज्यः सज्जनस्तदनन्तरम् ।
गुदप्रक्षाळनं पूर्वं मुखप्रक्षालनं परम् ॥ ६ ॥
नीतिशास्त्रविनोदेन कालो गच्छति धीमताम् ।
इतरेषां मनुष्याणां निद्रया कलहेनवा ॥ ७ ॥
खलानां कटकानांच द्विविधैव प्रतिक्रिया ।
उपायमुखभङ्गोवा दूरतोवा विसर्जनम् ॥ ८ ॥
यदि चित्तं नोवित्तं भवतिच वित्तं नलभ्यते पात्रम् ।
चित्तं वित्तं पात्रं पुण्येन विना नलभ्यते क्वापि ॥ ९ ॥
अशक्तस्यापराधेन किं धर्मो मलिनो भवेत् ।
नहि भेके मृते याति समुद्रः पूतिगन्धिताम् ॥ १० ॥



श्रुत्वा विदूरे भवदीयकीर्तिं कर्णौच तुष्टौ नच चक्षुषीमे ।
तयोर्विवादं परिहर्तुकामस्समागतोयं तव दर्शनाय ॥ ११ ॥
उडुगणपरिवेष्टी नायकोप्योषधीनाम्
 अमृतमयशरीरी कान्तियुक्तोपि चन्द्रः ।
भवति विगतरश्मिर्मण्डलं प्राप्य भानोः
 परसदननिवासात् को लघुत्वं नयाति ॥ १२ ॥
परोपि हितवान् बन्धुः बन्धुरप्यहितः परः ।
अहितो देहजो व्याधिः हितमारण्यमौषधम् ॥ १३ ॥
रागद्वेषौ यदि स्यातां तपसा किं प्रयोजनम् ।
तावुभौ यदि नस्यातां तपसा किं प्रयोजनम् ॥ १४ ॥
यथा चतुर्भिः कनकं परीक्ष्यते निकर्षणाच्छादनतापताडनैः ।
तथापि धर्मो विदुषा परीक्ष्यते श्रुतेन वेदेन तपोदयागुणैः ॥ १५ ॥
कलिप्रावृषि मिथ्यादिमेघच्छन्नेषु दिक्ष्विह ।
खद्योतवत् सुदेष्टारोहिद्योतन्ते क्वचित्क्वचित् ॥ १६ ॥
उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः
दैवेन देयमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि नसिध्यति कोऽत्र दोषः ॥ १७ ॥
एष वन्ध्यासुतो याति शशशृङ्गधनुर्धरः ।
मृगतृष्णांभसि स्नात्वा खपुष्पकृतशेखरः ॥ १८ ॥
कारणं परिणामस्स्यात् बन्धने पुण्यपापयोः ।
बाह्यन्तु कारणं प्राहुराप्ताः कारणकारणम् ॥ १९ ॥
यश्च निंबं परशुना यश्चैनं मधुसर्पिषा ।
यश्चैनं गन्धमाल्याभ्यां सर्वस्य कटुरेव सः ॥ २० ॥
हेमक्लेशेन दाहेन छेदेन कषणेनवा ।
एतदेव महादुःखं गुंजया समतोलनम् ॥ २१ ॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

बाह्यश्रद्धाहीनाः दरिद्रमनुजास्स्वपपातस्सन्ति ।
पुनरम्यन्तरसंगत्यागी लोकेऽतिदुर्लभो जीवः ॥ २२ ॥

कुरुत तपसि तृष्णां भोगतृष्णामपास्य
श्रियमविकतरां चेद्वाञ्छथ प्रांचतेशम् ।
जिनमवृजिनमार्यास्तद्वचः श्रद्दधीध्वं
कुकविविरुतमन्यत् शासनं माग्रहीध्वम् ॥ २३ ॥

ऋद्धिप्राप्तावृषिस्त्वंहि त्वंहि प्रत्यक्षविन्मुनिः ।
अनगारोस्यसंगत्वाद्यतिश्रेणिद्वयोन्मुखः ॥ २४ ॥

विप्रास्मिन्नगरे महान् कथयकः तालद्रुमाणां गणः ।
कोदाता रजकोददाति वसनं प्रातः गृहीत्वा निशि ।
को विद्वान् परवित्तवंचनविधौ सर्वेपि विद्वज्जनाः
कस्माज्जीवसि भो सखे विषक्रिमिन्यायेन जीवाम्यहम् ॥ २५ ॥

वसनाशनमात्रसंभवे धनदादप्यधिकायते खलः ।
अथ वेत्ति षडक्षराणिचेदुपदेष्टुं शितिकण्ठमिच्छति ॥ २६ ॥

अल्पीयसामेव निवासभूमेः
त्यागाद्विपत्तिः महतां विभूतिः ।
अब्धेरपेताः मणयो व्रजन्ति
राज्ञां शिरः काकमुखानि भेकाः ॥ २७ ॥

व्याघ्रस्य कृत्ती रणशूरखड्गः लुब्धस्य वित्तं चमरीमृगश्च ।
पतिव्रतानाम् कुचकुम्भयुग्मम् पञ्चापि लब्धानि शरीरनाशे ॥ २८ ॥

स्वग्रामे सर्व आचारः अन्यग्रामे तदर्धकम् ।
नगरे पादमात्रं स्यात् पथि शूद्रवदाचरेत् ॥ २९ ॥

रिक्तपाणिर्नपश्येद्धि राजानं दैवतं गुरुम् ।
नैमित्तिकंच मित्रंच फलेन फलमाश्रयेत् ॥ ३० ॥

विद्यानाशायतूद्वाहः चार्थनाशाय कुञ्जरः ।
त्रिमुण्डं गृहनाशाय सर्वनाशाय मातुलः ॥ ३१ ॥



सूपकारं कविं वैद्यं मन्त्रिणं शस्त्रधारिणम् ।
स्वामिनं धनिनं मूर्खं प्रकाशे न प्रकोपयेत् ॥ ३२ ॥

अक्षराणि परीक्ष्यन्ते अम्बराडम्बरेण किं ।
शम्भुरम्बरहीनोपि सर्वज्ञः किं नजायते ॥ ३३ ॥

औदुंबराणि पुष्पाणि श्वेतवर्णं च वायसम् ।
मत्स्यपादं जले पश्येत् ननारीहृदयस्थितम् ॥ ३४ ॥

रात्रौतु दीपकश्चन्द्रः प्रभाते दीपको रविः ।
त्रैलोक्यदीपको धर्मः सुपुत्रः कुलदीपकः ॥ ३५ ॥

पठन्ति चतुरो वेदान् सर्वशास्त्रविशारदाः ।
आत्मज्ञानं नजानाति दर्वी पाकरसं यथा ॥ ३६ ॥

दीनोपार्जितवित्तन्तु भोगे भाग्यवतां भवेत् ।
दन्ता दशन्ति कष्टेन जिह्वा गृह्णाति लीलया ॥ ३७ ॥

गुरुरेकः कविरेकः सदसि मघवतः कलाधरोप्येकः ।
अद्भुतमत्र सभायां गुरवः कवयः कलाधरास्सर्वे ॥ ३८ ॥

कष्टं किं मूकत्वं कष्टतरं यौवने दरिद्रत्वं ।
कष्टात्कष्टतरं किं परगृहवसतिः परान्नभुक्तिश्च ॥ ३९ ॥

नागो भाति मदेन खंजलधरैः पूर्णेन्दुना शर्वरी
वाणी व्याकरणेन हंसमिथुनैर्नद्यस्सभा पण्डितैः ।
शीलेन प्रमदा जवेन तुरगो नित्योत्सवैर्मन्दिरम्
सत्पुत्रेण कुलं नृपेण वसुधा लोकत्रयं भानुना ॥ ४० ॥

ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति ।
भुङ्क्ते भोजयतेचैव षड्विधं मित्रलक्षणम् ॥ ४१ ॥

लालनात् बहवोदोषाः ताडनात् बहवो गुणाः ।
तस्मात्पुत्रं च शिष्यंच ताडयेन्नतुलालयेत् ॥ ४२ ॥

शूराश्च कृतविद्याश्च रूपवत्यश्च योषितः ।
यत्र यत्र गमिष्यन्ति तत्र तत्र कृतालयाः ॥ ४३ ॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

अनाह्वानप्रवेशं च अपृच्छपरिभाषणम् ।
आत्मस्तुत्यामनिन्दे च चत्वारि लघुलक्षणम् ॥ ४४ ॥

वपुः कुम्भे नवद्वारे आत्मांबुपरिपूरिते ।
तिष्ठतीत्यद्भुतं प्रोक्तं गलतीति किमद्भुतम् ॥ ४५ ॥

प्रहतडिंडिमतूर्यपुरस्सरः परिवृतस्सुजनैस्समलंकृतः ।
नचश्रृणोति नवक्ति नवीक्षते धनपतिश्शवकश्शिबिकागतः ॥ ४६ ॥

अनुयातानेकजनः परपुम्भिः धृतसुवर्णकलशयुतः ।
अधिकारस्थश्शवइव नवदति नश्रृणोति वीक्षते किमपि ॥ ४७ ॥

सुमुखोपि सुवृत्तोपि सन्मार्गावस्थितोपिसन् ।
सतां पादावलग्नोपि व्यथयत्येव कण्टकः ॥ ४८ ॥

कान्तं प्राह कपोतिकाऽकुलतयानाथान्त्यकालोऽधुना
व्याधोधोधृतचापसंभृतशरश्श्येनोपरि भ्राम्यति ।
एवं सत्यहिनासदष्ट इषुणा श्येनश्चतेनाहतः
तौ तूर्णन्तु निजालयं प्रतिगतौ दैवी विचित्रागतिः ॥ ४९ ॥

कान्ता मेमेसुता मेर्थः गृहं मे ममबान्धवाः ।
इत्थं मोहपिशाचेन सकलो मोह्यते जनः ॥ ५० ॥

विवेकवैराग्यसुपादुकाभ्यां कथं विना संचरतीति साधुः ।
ग्रामेषु खेटेषु सुपत्तनेषु स्त्रीकण्टकास्सन्ति विचित्ररूपाः ॥ ५१ ॥

यूपं विना याजनमप्रशस्तं सूपं विना भोजनमप्रशस्तम् ।
रूपं विना स्त्रीजनमप्रशस्तं धूपं विना पूजनमप्रशस्तम् ॥ ५२ ॥

पद्मे मूढजने ददासि विभवं विद्वत्सु किं मत्सरी
नाहं मत्सरिणी नचापि चपला मूर्खे प्रियानैवच ।
मूर्खेभ्यो द्रविणं ददामि नितरां तत्कारणं श्रूयताम्
विद्वान् सर्वजनेषु पूजिततनुः मूर्खस्य नान्या गतिः ॥ ५३ ॥

यं शैवास्समुपासते शिवइति ब्रह्मेति वेदान्तिनः
बौद्धा बुद्धइति प्रमाणपटवः कर्तेति नैयायिकाः ।



अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः
सोयं वो विदधातु वांछितफलं श्रीविश्वनाथस्सदा ॥ ५४ ॥

पाषण्डद्रुमषण्डदावदहनश्चार्वाकशैलाशनिः
बौद्धध्वान्तनिरासवासरपतिः जैनेभकण्ठीरवः ।
मायावादिभुजंगभंगगरुडस्त्रैविद्यचूडामणिः
श्रीरंगेशजयध्वजो विजयते रामानुजार्यो मुनिः ॥ ५५ ॥

वित्तार्जनेच यच्चित्तं यच्चित्तं स्त्रीनिरीक्षणे ।
तच्चित्तं जिनदेवे स्यान्मुक्तिस्तस्यकरस्थिता ॥ ५६ ॥

अङ्गारसदृशी नारी घृतकुंभसमः पुमान् ।
तत्समीपे नवस्तव्यं नराणां चपलं मनः ॥ ५७ ॥

व्यालाश्रयापि विफलापि सकंटकापि
वक्रापि पंकिलभवापि दुरासदापि ।
गन्धेन बन्धुरसि केतकि सर्वजन्तोः
एको गुणः खलु सहेत समस्तदोषान् ॥ ५८ ॥

उदयति यदि भानुः पश्चिमे दिग्विभागे
प्रचलति यदि मेरु श्शीततां याति वह्निः ।
विकसति यदि पद्मं पर्वताग्रे शिलायां
न भवति पुनरुक्तं भाषितं सज्जनानाम् ॥ ५९ ॥

हापापे नकरोषि पाकमधुना पापी त्वदीयः पिता
रंडे जल्पसि किं त्वदीयजननी रण्डा त्वदीयस्वसा ।
निर्गच्छ स्वगृहाद्बहिः तव कुतो नेदं मदीयं गृहम्
हाहादैव ममाद्य देहि मरणं जारस्य भाग्योदयः ॥ ६० ॥

पक्षद्वंद्वविराजितोहममलः मीनप्रसेवी सदा
पुष्टांगः सकलादिशः परिगतः चन्द्रस्समः किं मया ।
सर्वस्थाणुशिरोगतोहमिति यत् चन्द्रो बकैर्हस्यते
मात्सर्येण दुरात्मनापि सुजनो दृष्ट्वा तथाहस्यते ॥ ६१ ॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

कस्त्वं लोहितलोचनास्यचरणः हंसः कुतो मानसः

किं तत्रास्ति सुवर्णपंकजवनान्यंभस्सुधासन्निभम् ।

शुक्त्यंतर्गतमौक्तिकेन सुभगावैडूर्यबद्धस्थलम्

शम्बूकानकुतस्सुखंतिचत्रकैः आकर्णहीहीकृतः ॥ ६२ ॥

उच्छिष्टकूपे मलमूत्रपात्रे शुनः प्रियांगे बहुरोगगेहे ।

अज्ञानमूले बहुदुःखबीजे देहेऽशुभे किं नु जनस्य सौख्यम् ॥ ६३ ॥

त्वयि वर्षति पर्जन्ये सर्वे पल्लविताः द्रुमाः ।

अस्माकं अर्कवृक्षाणां पूर्वपत्रं विनश्यति ॥ ६४ ॥

नेत्रमालोकते वर्णं जिह्वा पठति लीलया ।

शृणोति श्रवणं शब्दं श्वासोच्छ्वाससमन्वितम् ॥ ६५ ॥

मनोवेत्तीति सर्वार्थं करो गृह्णाति पुस्तकम् ।

षडिन्द्रियनिरोधेन स्वाध्यायः परमं तपः ॥ ६६ ॥

तारुण्यं जरसा ग्रस्तं जीवितं समवर्तिना ।

संपदो विपदा पुंसां तृष्णैका निरुपद्रवा ॥ ६७ ॥

अहन्यहनि भूतानि प्रविशन्ति यमालयम् ।

शेषास्स्थावरमिच्छन्ति किमाश्चर्यमितः परम् ॥ ६८ ॥

कुंभः परिमितमंभः पिबति पापौ कुंभसंभवोंभोधिम् ।

अतिशेते हि सुजन्मा कश्चित् जनकं निजेन चरितेन ॥ ६९ ॥

दानानुमोदनात्पुण्यम् परेपि बहवो भजन् ।

यथासाद्य परं रत्नम् स्फटिकम् तद्रुचिं भजेत् ॥ ७० ॥

बन्धनान्यपि बहूनि भवन्ति प्रेमरज्जुविनिबन्धनमन्यत् ।

दारुभेदनिपुणोपि षडंघ्रिः निष्क्रियो भवति पंकजबद्धः ॥ ७१ ॥

रात्रिर्गमिष्यति भविष्यति सुप्रभातम्

भास्वानुदेष्यति हसिष्यति पंकजश्रीः ।

इत्थं विचिन्तयति कोशगते द्विरेफे

हा हन्त हन्त नळिनीं गज उज्जहार ॥ ७२ ॥



प्रथमवयसि दत्तं तोयमल्पं स्मरेद्धि

शिरसि निहितभारं नारिकेलं नराणाम् ।

सलिलममृतकल्पं तद्यथा जीवितान्तं

नहि कृतमुपकारं साधवो विस्मरन्ति ॥ ७३ ॥

दिवसकरः खलु तीक्ष्णो दिवसकरात् पावको महातीक्ष्णः ।

दिवसकरपावकाभ्यां दुर्जनवचनानि तीक्ष्णानि ॥ ७४ ॥

रजनिकरः खलु शीतः रजनिकरात् चन्दनोमहाशीतः ।

रजनिकरचन्दनाभ्यां सज्जनवचनानि शीतळतराणि ॥ ७५ ॥

नध्यातं पदमीश्वरस्य विधिवत् संसारविच्छित्तये

स्वर्गद्वारकवाटपाटनपटुः धर्मोपि नोपार्जितः ।

नारीपीनपयोधरोरुयुगळं स्वप्नेपि नालिङ्गितं

मातुः केवलमेव यौवनवनच्छेदे कुठारावयम् ॥ ७६ ॥

धन मिच्छतिवा नवा नरेशः

यदि कर्णे कविभारतीं श्रृणोति ।

रति मिछतिवा नवा नवोढा

यदि केलीगृहकेहलीमुपैति ॥ ७७ ॥

धुत्तूरकंटकफळं प्रतियोगिबुध्या

वैरं वृथैव कुरु मा पनसेन सार्धम् ।

सन्तो हसन्ति न भजन्ति भजन्तिचेत्वां

भ्रान्ता भवन्ति सहसैव जगत्प्रसिद्धम् ॥ ७८ ॥

राजास्ते रमणी सकिन्नु रमते विष्णोःपदेचेत्तदा

कांचीदेशपतिस्तु कः प्रियसुहृत्तस्यैव विद्वन्मणेः ।

दातावा सुमनोगणस्य विषये मृग्योऽभवन्मार्गणः

तादृक्चेन्मम दर्शयाशु लिकुचद्वद्वं करेगृह्यताम् ॥ ७९ ॥

सत्यं माता पिता ज्ञानं धर्मो भ्राता दया सखा ।

क्षान्तिः पत्नी क्षमा पुत्रः षडेते मम बान्धवाः ॥ ८० ॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

यावत्स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो
   यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः ।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्
   आदीप्ते भवने तु कूपखननप्रत्युद्यमः कीदृशः ॥ ८१ ॥

आलानबन्धनमथांकुशतीव्रपातं
   आधोरणस्य चरणाहतितर्जनञ्च ।
कंठीरवो यदि सहेत मतङ्गजानां
   पूजा कथं क्षितिपते स्सदनान्तरेषु ॥ ८२ ॥

शक्यो वारयितुं जलेन दहनः पत्रेण सूर्यातपः
   व्याधिर्भेषजसंग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषम् ।
नागेन्द्रो निशितांकुशेन समदो दण्डेन गोगर्दभौ
   सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्यनास्त्यौषधम् ॥८३॥

किमु कुवलयनेत्रास्सन्तिनो नाकनार्यः
   त्रिदशपतिरहल्यां विप्रभार्यामयासीत् ।
हृदयतृणकुटीरे दीप्यमाने स्मराग्नौ
   उचितमनुचितं वा वेत्तिकः पंडितो वा ॥८४॥

कः खेचरति कारम्या काजप्या किं विभूषणम् ।
कोवन्द्यः कीदृशी लङ्का वीरमर्कटकंपिता ॥ ८५ ॥

जीवनग्रहणे नम्राः गृहीत्वा पुनरुन्नताः ।
किं कनिष्ठाः किमु ज्येष्ठाः घटीयन्त्रस्य दुर्जनाः ॥ ८६ ॥

---

## ABHIJNANA SAKUNTALAM (*Continued*).

These thoughts flit rapidly before him one after another. Under their influence, he forgets the present. All his thoughts are of the past and he begins in imagination to live over those old days again. The picture before him is no longer a picture. It has life and reality. It appeals to him as vividly as Sakuntala's own dear self. He beholds her as he saw her the first time, in the naive enjoyment of the watering of her beloved vegetable friends, with her playmates around her. Soon his eye settles on the bee that harassed his love, by attempting to sip the honey from her cherry lips. The sight though seen in a picture, revived all his former animosity for the vile intruder. He fires up, and rates the poor honey-sucker like the stern repressor of evil-doers that he was. He would have gone on thus, happy in this clear illusion, but for the unlucky fool, who rallied him upon the folly of getting into a passion with an innocent picture. Ah is it really a mere picture? Must there be an end to this fond dream that I have been dreaming? Dear friend, why did you remind me of the reality? How happy was I in the illusion?

दर्शनसुखमनुभवतः साक्षादिव तन्मयेन हृदयेन ।
स्मृतिकारिणा त्वया मे पुनरपि चित्रीकृता कान्ता ॥

"Oh how happy was I enjoying the sight of my beloved, and not a whit doubting the reality of it. But you by bringing back memory, have nerved my love into a picture again." His Sakuntala had returned to him during that short while, not a mere picture, but his very Sakuntala, and his friend, by the magic of telling the truth, had turned her into a picture. Oh the loss of it! The profuse tears fill the eyes and dim the sight. Does fate deny him even the poor consolation of looking at her picture?

प्रजागरात्खिलीभूतस्तस्या स्स्वप्ने समागमः ।
बाष्पस्तु न ददात्येनां द्रष्टुं चित्रगतामपि ॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

"Oh sleeplessness frustrates all hope of being united with her even in a dream; and these cursed tears would not let me see her even in a picture." How cruel a destiny !

And chance brings to his notice that supreme happiness of progeny, that security of his house, which he had so cruelly turned from his very door. There occurs a case of a merchant drowned in a voyage without leaving children to inherit his name and property, and this causes these remorseful recollections, so harassing to the distressed soul of the king.

All this while, the nymph Sanumati, friend of Menaka the mother of Sakuntala, had been a witness of this scene. Her heart is profoundly touched at the genuine sorrow and sufferings of the king and she makes up her mind that this shall be no longer; for the gods have so ordered it that the bereaved king shall find his lost wife and be happy.

The Gods had found great difficulty in dealing with giant Durjaya son of Kâlanêmi, and they have therefore ordered that Dushyanta is to have the honor of slaying him, and this was the pretence for making him come across his wife and child on his way back.

The king is too distracted by his sorrows to be fit for such a heroic enterprise as was preparing for him. Mâtali the charioteer of Indra, who came to fetch him found that he had to rouse the dormant valour of the king, before he could break to him the message of the Gods. And for this purpose he took hold of the poor innocent fool whirled him invisibly upwards and down again, all this while making as if he were going to eat him up piecemeal. The shrieks of the poor victim rouse up all the old fire in the king, and he takes up once more his invincible bow. Matali now casts off his disguise, and accosts Dushyanta in the friendly tone of the messenger of the Gods, and in the end the king gets into the aerial car heavenward bound.

He is thoroughly successful in the war that ensued with the giants, high honors elate his soul in heaven, the lordly Indra making him share his very throne, and he is sent on his way home crowned with glory. The wild magical descent soon



brings him to the peaks of Himavan, in the vicinity of the hermitage of the renowned Mâricha. The scene, so grand, so unwordly like, so calm, so full of holy associations, naturally elevates his soul, and he longs to see his holiness the son of Marîchi and the father of the gods. There was the hoary sage, absorbed in beatific meditation of the Supreme, his mortal prison absolutely forgotten, half overgrown with anthills, abounding in serpent sloughs, his neck almost strangled by decayed creepers, his *jatâ* hanging down his shoulders, a strange mess of bird's nests —this holy sight was in view. What strange indifference to the good things of the world in the midst of such a rich profusion of them. The almost fabulous beauties of Himavan had not the least attraction for the holy men there living, the gold lotus ponds, the diamond-seats, the bevies of divine nymphs—these were treated by them as if they were not.

यत्काङ्क्षन्ति तपोभिरन्य मुनयस्तस्मिंस्तपस्यन्त्यमी ॥

"What other holy *munis* hope to attain by heavy penance, these they do penance among." उत्सर्पिणी खलु महतां प्रार्थना "High pitched are the aspirations of the great" remarked Matali.

Matali left him alone for a while to seek an opportunity for the audience of the sage. Thus left alone to his reflections, he is attracted by the voice of a female hermit rebuking a child. He looks round, and what a sight greets his eyes! what a diminutive Hercules. This child here of unchildlike strength.

अर्धपीतस्तनं मातुरामर्दक्लिष्टकेसरम् ।
प्रक्रीडितुं सिंहशिशुं बलात्कारेण कर्षति ॥

"drags by main force for a play thing with relentless grasp of the dishevelled mane a helpless lion cub in the act of sucking" while the wretched mother looks piteously on. The good women of the hermitage stand aghast at this rough treatment of their pets. They try to frighten him and to coax him but all in vain. One of them looks about for help, and seeing Dushyanta standing near, calls to him to release the lion cub from the relentless grip of the child. He mistook the child for a Rishi's son, but is at once corrected. The lady is greatly astonished at the close resemblence of the features of the

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

stranger to those of the child. The king is informed that the child is of Puru's line. He is further told that the mother of the child was born of an Apsaras in these same forests. The king's mind begins to think upon possibilities. Here opens the door of hope. He asks to know the name of the child's father, and he receives for answer "Who would mention by name the deserter of his lawful wife." This is a much surer sign to hope by. He comes to learn that the mother of the child was called Sakuntala. But he combats resolutely against all risings of hope "It may be a mere concidence of names. Let me not build on that and suffer doubly." Hope clearly pointed towards re-union with his wife. But he had suffered so hard he could not believe there was hope for him too. He so dreaded that hope would deceive him he did not run forward to meet it. But fate proceeds on her own lines. One of the women suddenly find that the talisman that was tied round the child's neck is missing. The king proceeds to pick it up. The women object to his touching it; but before he could be prevented he had already picked it up. "And why are we forbidden to touch it" the king asks. This talisman or *Rakshâ* was given by Marîcha at the ceremony of name giving, and it had such virtue that if it fell to the ground none might touch it but the child or his parents; if any stranger did touch it, it would at once turn to a serpent and bite him. Thus it was clear to the hermitwomen that this stranger was none other than the father of the child the great hero Dushyanta. Sakuntala is called in and the king prostrates himself at his wife's feet and earnestly begs for forgiveness of the cruel wrongs she had suffered. Ah *!* he is forgiven already. They are all happy — a happiness which shines in silent love. No rank outward effusions mark the scene of reunion; the bliss is the deeper seated. The happy family now goes to pay its respects to his holiness Maricha. He blesses them all, reveals the curse of Dûrvâsas as the cause of all the misery and foretells the future glory of their son. The last cloud has been dispelled. And that holy love, calm, deep and invincible, has succeeded in proving itself and triumphed over the chapter of accidents.

---

## VISÂKHADATTA'S CHARACTERS.

First we deal with Visâkhadatta as a thinker, an evolver of ideas. What knowledge he has of nature, we can best gather from his portraiture of character. We are thus led to study the worth of his conceptions of character. We shall see whether they involve high and noble thoughts.

Visâkhadatta's conceptions can claim a high rank of perfection. His characters are so perfect as portraits, that in spite of his inferiority as a poet, they appear so nearly adjusted to truth, so true to human nature, as to be taken for the reality. Most authors of Sanskrit Literature, the great Kâlidas certainly excepted, allow themselves to fall into that great error which takes the life out of all works of art, rendering them mere mechanical presentations,—and this is known as conventionalism. Most dramatists have by their side certain exact exquisite moulds formed according to very stringent rules and into these they pour the melted conceptions of their characters in order to give them shape and existence. These then acquire shape, but, the Lord bless us, no existence, save a very crude and fantastic one. Visâkhadatta is far from being such a dried-up author. He does not allow literary red-tape to throttle his characters and take the life out of them entirely. His characters are true to life, and can excite our sympathy and our curiosity. They are simply such as would fit into the plot with life-like readiness. It is natural to find in most dramas, an upside down relation between characters and incidents, the latter giving an existence to the characters and allowing their peculiar features to be inferred not from the presentation of characters, but from the incidents. Visâkhadatta makes his characters animate the incidents in the play. Their very manner of speech reveals their vital force and peculiarities.

For instance, the lofty and sweeping personality of Châṇakya, the very animating soul of the play, whose mighty

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

influence is felt at every step the play makes in its onward progress towards the goal, who dashes through difficulties with the ease and the impetuosity of a soul brimming with potent life, who is besides all wise, is blinded by no prejudice even in hatred, who is in short a great man all round—such an all-in-all man no Shakespeare ever conceived. What could the reader do but allow himself to be completely mesmerised by the great personality as birds are by the glistening cobra's eyes. What wonder if all tremble in his presence, and even in his absence miles away from him his servants cannot shake off for a moment their strongly rivetted fidelity to the demigod. And yet this lofty potency, with a rare but truly admirable want of prejudice, falls into the most rapturous admiration of his deadly foe. His deep-felt admiration of Râkshasa is the very spring that is at the bottom of his superhuman labours of policy. And when he witnessed the truly heroic self-sacrifice of the low caste Chandanadasa, "Who but Sibi could have done this" said Chanakya. and yet this lover of greatness sent him to jail. But there is no inconsistency here. For duty was not to be forsaken, and he could very easily reconcile his admiration for Chandanadasa, with the course duly prescribed. Suffering to that great heart he knew, was nothing and he meant to use that suffering for a noble purpose. Besides he felt a secret satisfaction in putting his heroism to the test. And to crown all, he was the greatest of sages untainted in the midst of all his intrigues by lust of the good things of the world so profusely heaped around him in his days of omnipotence, who worked not for selfish ends, but to reward the good and punish the wicked, who, when his life's work should have been accomplished, longed for release from the trammels of office, content to retire to the woods saying—

"Well, my vow fulfilled, I shall tie up my hair" This is an ideal to which Shakespeare has no parallel. His Coriolanus would shrink to the dust before such a stupendous conception.

We have an ideal of a different sort in Rakshasa. We saw in Chanakya what impetuous intellectual greatness can do. We see in Rakshasa the type of Indian loyalty. His



unshaken devotion to the memory of his lost royal patrons has a peer only in that exquisite portrait of the western observer, namely Shakespeare's right honourable Kent the faithful servant of King Lear. The Nandas dethroned, aye dead, were as loyally served by Rakshasa, as Lear forsaken, mad, was by Kent.

"With untiring devotion to the Nandas dead and gone, he bears the burden of avenging them, the foremost of the living examples of the principle of loyalty to one's lord." But see how consistently the Sanskrit dramatist works out his ideal. Sorrow for his lost patrons so completely overwhelms him, almost unhinging his intellect, depriving him of his quickness of action, that we clearly infer how deep the passion works in his heart.

"Cruel Fate has snatched away the Nandas, famous for the valour and the policy that quieted their foes. And I sleepless with thinking, seem hence to be trying to paint on the blank air." The same unbounded loyalty was seen in his relations to his friends. They might be lowcastes or even his own servants, but that was no barrier to his love. Think how he behaved towards Siddharthaka and Chandanadasa, and you shall find how absolutely he effaced self. To sum him up, he was living Duty.

The author is quite as perfect with the minor characters. Chandragupta appears to be shrewd and self contained, yea modest and faithful to his benefactor, and acts his part quite consistently. Malayaketu, on the contrary, is full of childish interference into things he knows naught about, vain of his स्वायत्तसिद्धित्वम् (self-maintained state) and with the weakness common to meagre minds, trusts to the nearest adviser. The inferior characters show a blind obedience, the result of a high sense of duty. Thus Visakhadatta's conceptions are founded on the vital principles of Ethics, and we can sum them up in one word, the principle of Duty.

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

## 'News and Notes.'

*Rare Monuscripts.*—In the course of his recent journey to Nepaul in search of Sanskrit Manuscripts and inscriptions for the University of Cambridge, Mr. Cecil Bendall made some discoveries of early manuscripts of great interest and value in relation to the literary history of India. For instance the extant Puranas have been pronounced by most critical scholars to be quite modern compilations, the oldest of them not earlier than the 9th Century A. D. and in this connection it is of great importance that a manuscript of a considerable portion of the Skanda Purana, written not later than the 9th Century A. D. has come to light in Nepaul and has been acquired for the collection of the Asiatic Society of Bengal. Mr. Bendall was able to spend many days in the examination of the Maharaja's splendid collection of manuscripts and he came across two old copies of the poems of Vidyapati, whose works have hitherto been chiefly known from poor modernised editions of no account for the linguistic student. The new manuscript will probably prove of great value for settling the difficult problem as to what the language used by Vidyapati actually was. Mr. Bendall also discovered about 15 new inscriptions, most of which are of considerable antiquity and importance for the history of Ancient Nepaul.

The Next Oriental Congress— It is said that the Bengal delegate to the next Oriental Congress to be held in Rome will be Mr. Brogendra Nath Seal M. A. Principal of the Victoria College Cuch Behar. The Maharaja of Cuch Behar has signified his willingness to pay the expenses for Principal Seal's voyage to Rome. Mr. Seal is known to be a man of vast learning. He has made a special study of Metaphysics and Theology and the paper he proposes to read before the congress will deal with the Metaphysics of the Hindus and the evolution of religion in India—subjects on which Mr. Seal is expected to throw new light.

2. Dr. Bourgess once the Superintendent of the Archeological Survey in India goes to the International Oriental Congress as the delegate of the Edinburgh University.

---

श्रीरस्तु ।

# ॥ आवीक्षितचरितम् ॥

ब्रह्माण्डघटकुलालं पाञ्चालीपटकुविंदमवलंबे ।
अध्यापकं विधीनां आम्नायकविं क्रियाफलनिदानम् ॥ १ ॥
चेतनजाति र्बोधात् उच्चा नीचाच भवति शक्तेश्च ।
यत्रोच्चता ननीचा परिमाणवदेव तन्नुमः कमपि ॥ २ ॥
पेया श्रवणपुटाभ्यां कथानदीयं पुराणगिरिजाता ।
गद्यरसैः परिपूर्णा पद्यद्वीपैः क्वचित्क्वचिद्रुचिरा ॥ ३ ॥

आसीत् किल राजा करंधमोनाम । तस्यच धर्मेण परिपालयतो महीमजायत महिष्यामात्मजश्चिरादीप्सितो वीराभिधानायां । स राजा तस्य जन्मनि विवित्सुश्शोभनतामपृच्छदनेकशो मौहूर्तिकान् । तेच तं प्रोचुः । "देव देवगुरुरवेक्षते जन्म जातस्य । तिष्ठतिच सप्तमे नंदनो भृगोः । चतुर्थेऽपि रमणस्ताराणां । एकादशे च तनय श्शीतभानोः । एवमवस्थिताश्शुभा ग्रहा जन्मसमयं भवत्सूनोः अयमवीक्षितो भौमेन भानुनाप्यवीक्षितो भानोरप्यवीक्षितः पुत्रेण" । इति । ततः सराजा सुतस्य तादृशेन जन्मना तुष्ट स्तस्य नामाकरोदवीक्षिदिति । यदयमसकृदुक्तो दैवज्ञै रवीक्षितोय मशुभै र्ग्रहै रिति । तदसावर्हति तादृगेव नाम । नखलु दैवज्ञानामननुसृत्य वचनमन्यन्नाम स्वैरं युक्तं कल्पयितुमिति । ततः स ववृधे साकमेव प्रकृतीनां हर्षैः सहच विषादै र्द्विषतां । जग्राहच पूर्वपक्षशशीव कलाः क्रमेण सकलाः। ततस्सनियुद्धेषु गदापरिघयोरसिचर्मणो र्धनुषिच लेभे भृशमितरेषु प्रहरणेषु सौष्ठवमनितरसाधारणं । अध्यैष्टच वेदान् सोपवेदान् व्यचीचरच्च शास्त्राणि निखिलानि । तत्रापि विममर्श विशेषतस्त्रयीं वार्तामान्वीक्षकीं दण्डनीतिमपि । यतस्ताएव राज्ञां स्वाविद्यास्ततस्तासु परामवाप निष्ठां । अथ समुनेः कण्वसुतादस्त्रग्राममवाप कार्त्स्न्येन । एव मधिगताखिलवेद्यो

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

युवा मनोहराकृतिः महाप्राणश्शस्त्रास्त्रवित् संप्रतिपन्नोऽसौ बभूव सदसि राजकुमाराणाम् ।

यच्च कुलं यदपि बलं शस्त्रज्ञानञ्च शास्त्रविज्ञानम् ।
यद्रूपं यदपि वयः समुदितमेतत् किलोन्नतिः पुंसाम् ॥

अथ विदिशाधिपतिर्विशालोनाम नृपतिस्सुतायास्स्वयंवरहेतोर्लिलेख राज्ञामाह्वानपत्राणि । प्राहिणोच्च सन्देशहरान् । अवीक्षिदपि दिदृक्षुस्स्वयंवरं जगाम विदिशामेकेनैव रथेन । तत्र सा विशालसुता सहसखीभिस्स्वयंवरसभामाससाद पितुरादेशात् । ताञ्च भुवमवतीर्णामिव वरामप्सरसमालोक्य सर्वेऽपि नृपाश्चक्रुरस्यां ममतां । ततस्सा धात्र्या निवेदितान् अभिजनरूपवयःपराक्रमैर्विलोकयामास नृपतीन् । अत्रान्तरे जहार तामविगणय्य नृपानवीक्षिदात्मबलावलेपात् । आरोप्य तामात्मनो रथं धनुषिच ज्यामियेष गन्तुं निजमसौ निषयं । अथ तेन बलादपहृतायामस्यामवमत्य नृपानवापुरमर्षस्य वश मेतेज्वलतः । आहुश्च तत्र केचिदितरान् । "ननु सत्सु सर्वेषु क्षत्रजातीयेषु शस्त्रधरेषु कथमेकः कन्यां स्वयंवरगतामर्हति हर्तुम् । अथवासावपहरतु नाम तामनात्मज्ञः । कथमेनामपहृता मुपेक्षन्ते भवन्तस्सर्वेऽपि भूत्वा पुरुषमानिनः । मुधा किल भवतां वन्दिजनः पुरः पठति भुजबलालम्ब मपदानं । यामिमां जानीम स्वयंवरादनेन हृतां कन्यां । सा किल कीर्तिस्सर्वेषान्नस्समागताना मपहृता तेन कन्यारूपा" इति । श्रुत्वा तु ते समुत्तेजनवचनं निसर्गादुत्सिक्ताः पुनरावहन्तस्समधिक मवलेपं समनह्यन्त योद्धुं सह तेन राजसुताः । ततस्ते विदिशेश्वरसेनया सह सम्भूय रुरुधुस्तं करन्धमसुतं । आहुश्च, "भोराजन्यप्रसव कथमियतो राजकस्य पश्यतः कन्यामिमामपहृत्य जिगमिषसि सुखीसन्निजविषयं । किं नपश्यसि बाहून् बाहुजानामायुधिनां । पश्यन्नपि वा प्रतारितोसि निजबलापदानेषु विस्रम्भात् । ज्ञास्यामश्च संप्रति ते शौर्यम् । येनास्मानगणयन् हृतवानसि कन्यां" इति । ततस्सवीरातनयस्सर्वेषामपि वीरवादांश्चकार नैव श्रवणयोः । श्रुतानामप्यनुक्त्वोत्तरं कर्मणैव संपादयामास सम्यगुत्तरं । अलङ्कारोहि तन्नितरां शौर्यस्य । यदेतद्विकत्थमानेषु रिपुषु स्वयमविकत्थनस्य पराक्रमणं नाम । यदाहुः । "अनुक्त्वा परुषं किञ्चिच्छरैर्व्यापारितं धनुः" इति । तथाहि । स कस्यचिदिषुणा चिच्छेद कार्मुकं सहदर्पेण । इतरस्यच समनोरथमच्छिनद्रथम् । अपरस्यवाहाननाशयत् सहयुद्धश्रद्धया । अन्यस्याप्यवधीत्साकमेव जयाभिसंधिना यन्तारम् । सर्वेषां पुरतः प्रकाश्य निजशौर्यमसंभ्रान्त एव वाहयामास निजविषयगामिना मार्गेण स रथं । तथा तेन विजितास्सम्भूय ते नरपतयस्सामर्षाः पुनरपि योद्धुमकुर्वन्नप्रशस्तं मन्त्रं "अयं खलु धर्मेण युध्यतामजेय एव नः करंधमसूनुः तद्यथा तथा प्रतिकर्तव्यस्संप्रति त्यक्तभयै रस्माभिः । पश्यतास्य बाहुबलोत्सेकं । येनैष न स्सर्वानपि तृणाय मन्यते हर्यक्ष इव क्षुद्रमृगान् । नह्यस्य गच्छतः प्रतिपक्षबाहुल्येऽपि दृश्यते मनागपि संभ्रमः । तदनेन परिभूतानां वरं युधि नस्तनुत्यागो नपुनस्सावमानं जीवितं । ततोयतध्वमधुना सर्वेपि वटोरस्य युगपदेव निग्रहाय"इति । ततस्ते धराधरमिव धाराधरास्तं परिवव्रु रभितः करन्धमसुतं । अयुध्यत सोऽपि सर्वानेकएव राज्ञस्सामर्षान् । तेच पुरेव सर्वे तस्याग्रतस्स्थातुं नकथमपि यदाप्राभवन् तदा यथामन्त्रितं विहाय धर्ममकुर्वन्रणसमुद्यमम् । तथाहि । केचित् कृतसमया बभंजुरेव ध्वजमस्य प्रहरणैः । अपरे तु तथैव सहसारथिना जघ्नुरस्य तुरगान् । इतरेच चिच्छिदुरस्य शरासनं । अन्येऽपि बिभिदुरस्य शरीरमापादचूडं शरनिकरैः । एवमनादृतधर्मान् संभूय युध्यतस्समीक्ष्य सर्वानसंभ्रान्तएव जग्राह खड्गं सहचर्मणा वीरातनयः । ततश्चरन्तमेव श्येनवन्नानागतिभिस्ते संभूय न्यघ्नन्नभितस्सर्वेऽपि विविधैरायुधैः । स तथा सर्वांगेषु निखातशरनिकरस्समन्तादभिहतश्च मर्मसु गदापरिघतोमरप्रासपरशुप्रभृतिभि र्निपपात मातुरंक इव रणमध्ये । तं तदा बहुभिरेकमधर्मेण पातितमत्रनौ ते बबन्धुस्सुदृढं नानाविधैः पाशैः । बध्वाच तमनयन्निमे विशालस्य बन्धनागारमनपत्रपाः । ततस्स राजा विदिशाधिपतिर्न्ययुक्त तनयां पुनस्स्वयंवरहेतोः । सातु मुहुर्नियुक्तापि पित्रा नैव स्वयंवर मनुमेने मानिनी । अथ सविशालस्समागतेषु नरदेवेषु कस्मैचिदभिरूपाय दित्सुस्तनूजा मादिदेश पुरोधसं । "आर्य विचारय वत्सायाश्शुभमप्रत्यूहञ्च विवाहस्य मुहूर्तं" इति सोऽपि बहुधा विचार्य प्रोवाच विशालं । "राजन्, नाधुनास्ति सुलभो विवाहस्य समयस्ते तनयायाः कथंचिदसौ नि-



Digitised by Ajit Gargeshwari For Karnataka Samskrita University

रूपितोऽपि नोपयोक्ष्यते दुहितुस्तव विवाहविधौ । तथाहि दैवज्ञानामैकमत्ये-
न बभूव शास्त्रदर्शनं। यतोदुहितुस्ते विवाहविधेः प्रतिकूलाएव संप्रति ग्रहाः।
तद्लमद्य विवाहप्रसंगेन" इति,

स पुरोहितवचनं तत् निशम्य तरुणीं निशाम्य तनयाञ्च ।
चिन्तामाप दुरंतां कन्यापितुरस्ति किन्नु नैश्चिन्त्यम् ॥

अत्रान्तरे शुश्राव करंधमोऽपि निगृहीतं विशालपुरे निजतनयं । अ-
स्यच सर्वान्तःपुरप्रधानभूता महादेवीपदभाजनमासीन्महिषी वीरा नाम ।
प्रासूत या तमेनमवीक्षितम् । सा तु सामंतानामाकर्णयतामिदमाह राजानं ।
यदेतद्वीक्षितोवृत्तं युधि निग्रहणं विदिशायाम् । नात्र तस्य पश्यामि किं-
चिदपि वाच्यताम् । यत् पाक्षिकएव युधि योधानां दृष्टो विजयः । यश्च
संभूय बहुभिरेकस्य निग्रहस्सोऽपिनैव भजति निग्रहपक्षे निक्षेपम् । तेनहि
धर्मादपेतेन कर्मणा निग्रहीतारएव निगृहीताः । श्रुतंहि बहूनां मध्ये रथि-
नामेकरथेन सजहार कन्यारत्नम् । सहस्रञ्च राज्ञामुत्सिक्तानामे-
कएव सजिगाय लीलया । नहि तेषामेकोऽपि पुरस्तादवीक्षितस्स्थातुं
प्राभवदिति । यच्च पश्चादपाकृतसमयास्सम्भूय बहवो बबन्धुरेकमिति तदेत-
न्महती नश्श्लाघैव कुमारस्य । परन्तु परानिव संप्राप्ता पितरमकीर्तिरनिवा-
र्या । यतो निगृहीते तथाविधे तनूजे तूष्णीमबलयेव स्थीयते पित्रा नातः
परमस्ति त्रपाबीजं क्षत्रजातेः । यदात्मजमरिभिर्निबद्धमाकर्णयतोजनकस्या-
नुद्यमः " इति । तत्सर्वथा ससामन्तैस्सबलैस्स्वबलैश्च युक्तरूपस्संप्रत्येव
विपक्षक्षपणाय यत्नोभवतां " इति । सच तस्यावीरायास्समुत्तेज-
नवचनात् द्विगुणीकृतामर्षस्सन्दिदेश जैत्रयात्रां सेनायाः । अथासौ महता
सामर्षेण चतुरङ्गिणा बलेन बलावलिप्तेन च राजकेन सह रुरोध विदि-
शानगरं। प्रवृत्तेच सङ्गरे तेऽपि सर्वे समापेतु र्विशालस्य युधि साहाय्यहेतोः ।
ये पुरा स्वयंवरे राजानस्समागताः । येच बबन्धुरवीक्षितमेकमनेके निरप-
त्रपाः । ततोवीरापतेः प्रतापेन दह्यमाना नापश्यन् शरणमरिभटा रणे मर-
णादन्यदपसरणाद्वा । अथ सर्वेष्वपि जितेषु राजसु विदिशाधिपतिः प्रक्षीण-



बलस्समुद्धृत्य बाहु मुच्चैरवदत् सान्त्ववचनम् । ततोमन्दामर्षास्सर्वेऽप्युपसंहृत-
शस्त्रास्तस्थुरचलाइव योधाः । विशालोऽपि बन्धनान्मुक्तं स्नातानुलिप्तमलंकृ-
तञ्च तमवीक्षितमारोप्य दन्तावळमभिजगाम स्वयमतिविनयात् करन्धमम् ।
करन्धमोऽपि सङ्गम्य तनुजेन महतीमवाप मुदं । अथ विदिशाधिपतिर्दुहित-
रमवीक्षिते दातुकामः प्राह करन्धमम् । "राजन् दुहिता भवतस्सुतस्य
भार्या सङ्कल्पिता तत्पाणिमस्यागृह्णातु तनयो भवतः ।" इति । एतदाक-
र्ण्य प्रीतमनाः प्राह करन्धमः पुत्रं । "वत्स, राजासौ विदिशाधिपतिर्दि-
त्सति तुभ्यं निजतनयाम् । तदत्रैव निर्वर्तितोद्वाहा गच्छामस्स्वपुरीम् । श्ला-
घ्योहि जगति सम्बन्धो विदिशाधिपेन राज्ञा साकमस्माकम्" इति । श्रुत्वा
स पितुर्वचनमतिमात्रमपत्रपमाणो वक्तुमवीक्षिदुपचक्रमे पितरम् । "तात,
नाहं तामथवा नकामपि स्त्रियमर्होऽस्मिपरिणेतुम् । यदहं तस्याः पुरः पश्य-
न्त्याः स्त्रीवदेव भुवि पातितः पराभूतोऽस्मि भृशमरिभिः । कथं किल स्त्री-
समक्षमबलावत् केशेषु गृहीत्वाकृष्टस्य स्त्रीपतित्वं युक्तं । तदहं नकामपि
परिणेष्ये जगति स्त्रियं नाम । तत्तातेन परिणयहेतोर्नादेष्टव्योऽहं कदाचि-
दपि" इति । विदित्वा स तस्य राजा हृदयमात्मजस्य विशालमप्यधिगतार्थं
अकरोत् । अथ विशालेन परिणयाय पुनःपुनरर्थ्यमानोऽपि स यदा नकथ-
ञ्चिदपि सम्मेने परिणयम् । तदा विशालमाह करन्धमः । "राजन्नवीक्षिद-
सावहार्यनिश्चयः । तदन्य एव तव दुहितुस्समीक्ष्यतां वरः" इत्युक्त्वा
जिगमिषति स्म निजविषयम् । विशालोऽपि दुहितरमाह सप्रणयम् । -'व-
त्से, 'पराजितस्य विपक्षैः कानाम मे पुरुषता ? कश्चासावपुरुषस्य सतो दा-
रपरिग्रहः' इति भृशमपत्रपमाणो न त्वामवीक्षिदिच्छति परिणेतुम् । तदन्यं
कमपि साभिलाषं मृगयामहे वरम् । न खलु प्रशस्यते प्रीतोदासीनयोर्वधूव-
रभावः । सन्तिहि पुरा स्वयंवरे समागतास्साभिलाषा वरास्सदृशाः । तेषां अ-
न्यतममनुरूपं वृणु कमपि राजसुतम् । अथवा स्वयमेवाहमभिरूपाय त्वां
दास्यामि राजन्यकुमाराय" इत्युक्ता प्राह सा पितरं । " तात, नतस्य स-
दृशः कश्चिदस्ति जगति पुमान् । यस्य तदा सञ्चरतो युधि पराक्रमाणां सा-
क्षिण्यहमेकैव । बहूनां खलु मध्ये स नृपाणां मृगाणामिव मृगराडपजहार मां

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

विजहार च रणभूणवगणयन् प्रतिभटान् । यदि ते पालितरणसमयास्सह तेन युधिसमागता भवेयुर्नैवते क्षेमेण प्रविशेयुर्निजगृहान् । तदास्तामिमे परित्यक्तक्षत्रचरिता नृपाभासाः । तदा किल रणभुवि धर्मेण प्रकटितविक्रममवलोकयन्त्या मे बभूवतुः सफले नयने प्रीतिश्च प्रतिचेष्टित मवाप महदौत्कस्थम् ।

एकैकमरिभटानां एकोऽनेकइव यः प्रतिचकार ।
अभयमसंभ्रमवचनं ह्यधर्मविधुरं ततः प्रियः कोमे ॥

तदेनमेव भुवनवीरमभिजनबलरूपशौर्यप्रभृतिभिरसदृशं सदृश मस्मि मनसा वृतवती पतिम् । तन्मदभिसंधिमजानतेऽस्मै विनिवेद्य मत्प्रतिग्रहप्रतिरोधिनी तच्चित्तवृत्तिरपाकर्तव्या तातेन । एवमप्यनंगीकुर्वति मां तस्मिन्नस्तु मे शरण्य मरण्यं ' इति । अथ विदिशेश्वरस्स्वेनापि सर्वमस्यामन्त्रितं सखीमुखेनापि प्रापितवानवीक्षितं । सखीपुनरस्या विशालदुहितुर्नृपकुलसंवासप्रगल्भा कलासु चतुरभाषितेषु च प्रतिपन्ना कौशलमाससाद रहसि तमवीक्षितम् । सा किल तस्य प्राभृतीकृत्य पुरश्चन्द्रकचन्दनमाल्यतांबूलानि विज्ञापयामास सविनयम् । "महाभाग, सखी मे प्राणसमा विदिशेश्वरतनया । विलिखितमेतदुद्दिश्य महाभागं तया पत्रमित्युक्त्वा समर्पितवती लेखं । स तु समुद्घाट्य पत्र मवाचयन्नृपसूनुः ।

भूत्वा रम्या भवतः संप्रति मे तनुरुपेक्षणीया चेत् ।
अनवस्थितां तदेनां का बहुमन्येत नियतचारित्रा ॥
बलरूपविक्रमाणां त्वयि सुन्दर समुदयं समीक्ष्याहम् ।
चरणपरिचारिकाणां एका तव भवितुमाशासे ॥
यदि वपुरहारि तदिदं कुतो न विद्वन्नहारि भवता प्राक् ।
यद्यनिमित्तं हरणं शरणं तव चरणतः किमन्यत्स्यात् ॥

इत्यनुवाच्य लज्जाविनम्र एव तामाह वीरातनयः । "भद्रे, नाकामस्य सतः स्वयंवरादुपपन्नं हरणं कन्यायाः । अनुपपन्नञ्च हृताया बलादनन्यचित्तायास्सुतरामनुद्वहनम् । तथापि परिभूतपौरुषः कथमेना मुद्वोढुं पुरुषो भ[illegible]येवं । यस्या एव पुरस्तथा परिभूतश्शत्रुभिः । कथमिव तामेव पुरुषाभिमान-



मावहन्नुद्वहेयमहम् । तत् कश्चिदेव तया केनाप्यपरिभूतचरो वरः प्रार्थ्यतां" इत्युक्त्वा मुहुरनुनाथ्यमानोऽपि स तया बभौव जोषंभावं । अथ सा विशालसुता विदित्वा तस्य निश्चयमनन्यचित्ता जिहासुरात्मानं तपसा जगाम तपोवनमवधीरितसर्वसुखा । शुश्राव तदपि चेष्टितमवीक्षिदस्याः । ततो महत्या ससेनया प्रतिनिवृत्तः प्रविवेश निजां राजधानीं सपुत्रः करंधमः । तदा प्रकृतीना मासीदतिमहानुत्सवः । यद्राजा विजितामित्रः समुन्मोचितपुत्रः क्षेमेण समागतो निजविषयं । सातु विशालसुता बालाच सुकुमाराच्च महार्हशयनासनाशनपानादिभिराभिवर्धिताच भूत्वा सुमहदवाप वने दुःखम् । ततस्सा चकार मनसि निश्चयं । "यदिद मुपेक्षितमासीन्मे प्रेयसा । किंतेन मे-भूतेन शरीरेण ? तदद्यप्रभृति उपवासैस्त्यक्ष्यामि निष्प्रयोजनान् प्राणान्" । इति । समतिक्रामत्सु निराहाराया बहुषु तस्या दिवसेषु सन्निदधे देहन्यासस्य नेदीयानवसरः । ततस्सा प्राप महतीं कृच्छ्रदशां । अत्रांतरे तेजोमयेन वपुषा ज्वलन्निव कश्चिन्महाप्रमाणः पुरुषो गगनतलादवतरन् समदृश्यत लक्षितो देवलक्षणैः । स तामिदमाह सांत्वपूर्वं प्रसन्नगंभीरेण ध्वनिना । "तत्रभवति, दूतोऽहमस्मि देवानां । ननु भवतीमाज्ञापयंति मन्मुखेन देवा जगदीश्वराः" । अर्हति भवती देवकार्यहेतोरात्मानमवस्थापयितुं । प्रसोतव्योहि भवत्या चक्रवर्ती च सहस्राश्वमेधयाजीच महायशा देवकार्यकृन्महाराजः" इति । आकर्ण्य सा कर्णामृतंच तदसंभावितार्थंच वचः प्रत्युवाच दूतं देवानां । "एषाहं प्रणमामि देवान् जगदीश्वरान् । कथमिव मे भविता तनयः प्रत्याख्यातायाः पत्या ? जातावस्थां खलु नव विना तमवीक्षितमन्यो मे मनसापि चिंतनीयः पुमान् । तदसंभावितार्थमिव तर्कये वचस्सत्यवचसामपि देवानां" इति । अथ सपुरुषः दिविषदां प्रोवाच तां । "भद्रे, भद्राशंसिषु किन्नाम जन्तोर्नसंपद्येत देवेषु । तद्यथानिदेश मवस्थापयितु मात्मान मर्हति" इति । "यथाज्ञापयन्ति साक्षिणो जगतां" इति तया विनीतयाभिहितः सजगाम तावददर्शनम् । ततः प्रभृति पुपोष सा शरीरमवीक्षित्समागमप्रत्याशया । अत्रान्तरे राज्ञी करंधम माह वीरा भर्तारम् । "आर्यपुत्र, श्रूयते ननु व्रतानां किमिच्छकन्नामत्रतमुत्तमम् । यत्रसाक्षादीश्वरा जगतां देवताश्च निधीनां राजराजश्च पूजनीयाः ।

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

अवसानेच यस्य किमिच्छसीति व्रतिना तदनुबन्धिना वा पृष्टाना मर्थिनां य- द्येन प्रार्थ्यते तत्तस्य संपाद्यैव भवेद्व्रतस्य परिपूर्तिः । तदहमस्मि कर्तुकामा तद- नुज्ञानात्वार्यपुत्रो मां व्रतस्यास्य पारणाय" इति । अथ "देवि, व्रतेऽस्मि- न्यावदपेक्षितं तावतो मां जानीहि दातारं द्रविणस्य । शरीरेण चेत्संपाद्यम- पेक्षेत कश्चिदर्थी तदा यतते तत्र तनूजेऽस्मिन्नवीक्षिति" इत्युक्तवति करन्ध- मे "शरीरसाध्यमभीष्ट मर्थिनां स्वोभागः" इति प्रतिजज्ञे मातुरवीक्षित् । ततो यथाविधि व्रतमारेभे सा कर्तुम् । प्रथमं ईश्वरां मङ्गळदेवतां सहनिधिदे- वताभिरभ्यर्च्य ततो धनदश्च समापिते व्रते सोऽप्यवीक्षित् द्वारि स्थितः प्रो- वाच सर्वानेवार्थिनः "यःखल्वर्थिनां मे शरीरनिष्पाद्यमिच्छति किञ्चित् तदस्मि कर्ता दुश्शकमपि" इति । अथ स राजा करन्धमस्सहसंमन्त्र्य सचिवैः विनिश्चित्य कार्यं आजगाम समीपमवीक्षितः प्राहच "अहमर्थी पूरय मे म- नोरथं" इति । सोऽपि पितुराकर्ण्य वचनं अवीक्षिदिदमाह जनयितारम् । "तात, केनवा भवानर्थी? उच्यतां अवधार्यताञ्च संपादितमेव" इत्युक्ते तेन प्राह पिता परितुष्टः । "दर्शय मे पौत्रस्य मदङ्कगतस्य मुखं" इति । तथोक्ते च तेन चिन्तितवानवीक्षित् । "एकएव खलु तातस्यास्मि पुत्रः । प्रत्या ख्यातश्च मया दारपरिग्रहः । कथमेवंस्थिते भावित्री मे पुत्रनिष्पत्तिः । विना च मे पुत्रनिष्पत्तिं तातस्य कथं नु पौत्रमुखदर्शनं । नच मया विशालदुहि- तरमपहाय काचिदप्यन्या परिणेतव्या यतस्सा मदलाभात् विससर्जैव जीव- लोकसुखं । तथाहि । सा पतिताविव तत्याज पितरावतिवत्सलौ । अवमेनेच दुःखमिव पितुस्तद्राज्यसुखम् परिजहारच दुरादेव दुर्जनमिव स्वजनम् । अत्र- स्यच्च प्रहारादिव सखीभिस्सहविहारात् । अज्ञासीच्च भूषणानि भीषणानि । अभावयच्च प्रसाधनं बाधनं । किंच ।

वनमवनं मत्वा सा पितुरुत्सङ्गञ्च तरुतलं ज्ञात्वा ।
वनवल्लीश्चापि सखीः योगदशां वेद मद्वियोगदशाम् ॥

यदिचाहमन्यां कन्यां उद्वहेयं वहेयमेव हेयं जगति नृशंसत्वम् । अ- थ तामेव परिणेतुं यतेय तत्रापि समुत्पद्यन्ते विशयाः । तथाहि । किन्न सा सुकुमारा बालिकाच विपन्ना वनवासक्लेशैः । किंवा धृतदेहापि संशुष्कतनु-



स्तपसा बभूवानर्हा । यद्वा । किं तपसो वैभवात् सतीगुणेषु वैमुख्ये परमवा- प प्रसङ्ख्यानम् अथवा सर्वमप्यवगच्छन्ती सामान्यात् परिणतिविरसं गृही तवती किं प्रव्रज्यां । आस्तां तावदिमे सुदूरगोचरा विचाराः । नन्विदानीं अर्थी तातस्समाधेयः । संपादनीयाच मातुर्व्रतपूर्तिः । प्रतिज्ञाच मे निर्वर्तनी- या" इति विचार्य विनिश्चित्य प्राह पितरम् ।

मातुर्व्रतनिर्वर्त्यै तातस्याभ्यर्थनाविषयमर्थम् ।
संपाद्य दुश्शकमपि प्रतिश्रुतं निर्वहामि निर्लज्जः ॥

इत्युक्तवति तनये जहर्ष सराजा करंधमः ।

अथ वने निवसन्ती सा विशालसुता कदाचिदवततार सिष्णासुरसुरस- रितं । तस्याञ्च सा केनापि वृद्धनागेन गृहीता नीताच पाताळम् । तत्रच संभूय सर्वास्तमुपाचरन्नागाङ्गनाः । काश्चिदेनामवीजयन्व्यजनैः । काश्चन चक्रुरस्यास्संवाहनं चरणयोः । अपराश्च जगुरस्याः पुरतो मधुराणि गीता- नि । अन्या अप्यवादयन् वीणावेणुमृदङ्गादिकमातोद्यम् । इतराश्च वंदिवदे- नामतितरामस्तुवन् । ततस्तत्र जराहारिभि र्नवयौवनहेतुभिर्लावण्यावहैः रसायनै रमृतबिन्दुसंभिन्नैश्च भक्ष्यै र्निर्वर्तितपानभोजनां दिव्यैः पाताळभवैश्च रत्नविभूषणैः प्रसाधितां महार्हदुकूलपरिवीताञ्च विधाय तामावृत्य समन्ततो नागयोषितः प्रावोचन् ।

ऐककं सापत्या पत्या सह विधुरितान्यया गत्या ।
तव तनयाज्जातभया शरणं त्वां व्रजति देवि नागवधूः ॥

इत्येतदाकर्ण्य विशालसुता विनयावनताः प्राह भुजगीः । नखलु सः मा- मवीक्षिदभिलषत्यङ्गीकर्तुं न विनातं अहं चिन्तये कमपि पतिमन्यम् । भवि- ता कथमेवं सति मे तनयः? कथंवा तस्माज्जातात् संभाव्यते भयं भवती- नां? इत्युक्तास्तया ताः प्रत्यूचुरिमां । "देवि विदितैषा भाविनी वस्तुगति रार्षेण किल चक्षुषा भुजगैः । तदवश्यं भाविनि भये दातुमर्हत्यस्माकं आत्मजादभयं भवती" इति । सातु तथा ताभिराराधिता भृशमार्थिताच ददावभयम् । "यद्यहं साकमवीक्षिता भवेयं सङ्गता यदिच मयि तस्मादु- त्पद्येत तनयः तस्माच्चेत् भवतीनां आपतेद्भयं दत्तमभयंवो मया निस्संशयं"

※

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

इति। अथ हृष्टाभिर्भुजगवधूभिः आशिर्भिः अभिनमन्दिता पुनस्स्वमेव प्रापिता निवासं सा मनस्येवमकरोत् । "किमयं मया स्वप्नोऽधुनाऽनुभूतः? दृष्टा किंवा माया? अथवा सत्यमेव तत्सर्वं यन्मया तावदनुभूतं। दृश्यन्ते हि प्रसाधनानि साभरणानि सांप्रतमिमानि शरीरेऽस्मिन् । इदमपरं महदाश्चर्यम्। यदभिनवतमं मे संप्रति संवृत्तं तारुण्यं । लावण्यञ्च दुर्लभमिदं मानुषीणां । नूनं मे प्रसीदन्ति देवाः । यदहमीदृशीमगमं सिद्धिं । अस्तु सर्वमिदं अविचारितसम्भवं यथातथावा । एकन्तु मे महन्मनसो हर्षस्थानम् । यत्तनयान्मामकान्नागीभिरभयार्थनम्" इति चिन्तयन्ती निजाश्रमे सा तस्थौ । अवीक्षिदपि तदानीमाबद्धखड्गतूणश्शरासनपाणिस्तुरगमधिरूढः चकारानुवनं मृगयां । सर्वेषु च सवनेषु माभैषीरिति असकृदेव वदन्नचरत् करन्धमतनयः । क्रमेणच प्रविवेश तदपि विपिनं निवसति यस्मिन् सा विशालसुता । अत्रान्तरे तत्र कश्चन दनुजस्तां तथा विलसन्तीं अभिनवयौवनामालोक्य विशालसुतामादित्सुरुपाययौ मदनविवशमनाः। ततः सुभगरूपो भूत्वा स तामभाषत विलासिनीं । "सुतनु, किमर्थमिदं वनवासक्लेशमादृतवती भवती? कुतोवा मृदुळास्तरणसञ्चरणोचितौ चरणाविमौ सञ्चार्येते शिलाशकलेषु कण्टकेषुच? किंनिमित्तञ्च वयः कुसुमसुकुमारमिदं अनुपभोगमेव सुदति वंच्यते मुधा? तदिमं तव सर्वथा चरणपरिचरणोचितं पश्य दासजनम् । क्रियतां यौवनमेतत् सफलं ।" इति विविधानस्य विदग्धालापान् मत्वैव सा दग्धालापान् ययावन्यमुद्देशम् । अनुसरन्तं च तमवज्ञायैव सा प्राह विशालतनया । "अपेहि मे दूरादविनीत पतिव्रतायाः । नाथवती खल्वहमप्रतिबलेन भर्त्रा । यदि ते जीविते पराङ्मुखता कामं वद वचांसि पुनरीदृशानि" इति तस्यास्समाकर्ण्य परुषं वचस्सजहार तामतिमहत्तरमास्थाय शरीरम् । ततः सा केशेषु तेन गृहीता मुहुरकरोदरण्यरुदितम् । चुक्रोश सा त्राणमपश्यन्ती तारस्निग्धेन ध्वनिना । "कष्टमनार्योऽय मपहरति मां । अहं किल स्नुषा करन्धमस्य महीपतेर्लोकवीरस्यास्मि महिषी कुमारस्यावीक्षितः । ननु मे भर्तुश्श्वशुरस्यच बाहुच्छायामाश्रितास्सन्ति सुखिन्यः प्रकृतयः । तावेतौ भवतः शरणं शरणार्थिनां ताभ्याञ्च नाथवतीमशरणामिव



मां हरति दुरात्मासौ दनुजः । श्रृण्वन्तु मे सर्वा एव वचो वनदेवताः । याः किल वहन्ति वनेऽस्मिन्नभिमानं साक्षिण्यश्च मे पतिभक्तेः यद्यहं चिरसंवासवशादनुग्राह्यास्मि भवतीनां हरणं अनेन श्रावयितव्यो मे भर्ता" इत्यदूरादेव निकुञ्जपुञ्जान्तारितायाः परिदेवितमश्रृणोदविक्षिदस्याः । श्रुत्वा च असावचिन्तयन्मनसि । "कथमरण्येऽस्मिन्नमानुषे मानुष्या बालिकाया इव परिदेवितस्य सम्भवः? कथं चेयं तातस्य स्नुषा? कथं वा मम भार्या? सर्वथा मायाविनां भविष्यति दनुजानां किमपीदं संविधानकं । भवतु यथातथावास्तु तदिदं । श्रुतार्तवचसा खलु नोदासितव्यं क्षणमपि क्षत्रियेण । कदाचिदावयोर्नाम संवादस्स्यात् कयोरपि पितापुत्रयोः । ननु विचित्रेऽस्मिन्विधातुस्सर्गे क्वाचित्कस्संवादोऽपि सम्भाविता नामरूपयोः । तत्समुपसृत्य सर्वमवगच्छामि निपुणमेव निरूपयन्" इति । ततस्समुपसर्पिततुरगस्सन् । "नभेतव्यं" इति प्राह सगभीरस्वरेण वचसा । सा च भयानिमीलिताक्षी प्राह पुनरपि तामेव परिदेवनानुपूर्वीं । अथासाववीक्षिदतथ्यमस्या वचनं मन्यमानः क्रुद्धोऽपि वीक्ष्य बाला मभूत् करुणादृतमनाः । अचिन्तयच्चैवम् । "अहो रूपातिशयस्सुतनोः । आश्चर्यमनितरसाधारणं लावण्यम् । यन्ममापि हृदयमवधीरितविषयं विमोहयति । नूनमेषा भविष्यति मायैव । नखलु क्वचिदपि वास्तवञ्जगति दृष्टं ईदृशं सौन्दर्यं किंच वचनमस्यास्सुतरामसम्बद्धमश्रद्धेयञ्च । तथाप्येनामतिमात्रमनेन पीड्यमानां नशक्नोम्युपेक्षितुं । आर्तपरित्राणहेतोर्हि धारयन्ति शस्त्रं क्षत्रियाः" इति समुपसृत्य प्राह स तं दनुजम्। "रे रे! दुराचार मुञ्च मुञ्च बालिकां शासति भुवं करन्धमे कथमेवमतिक्रामति मर्यादां तदनुभूयतामाविनयस्यास्य फलं" इत्युक्त्वा तुरगादवातरत् अवीक्षित्। तं तथा प्रतिषेद्धारमुपलभ्य विसृज्य तामुपाद्रवत् स तमेव दानवस्सामर्षम् । प्रववृतेच तयोस्सुमहद्युद्धम् । ततो मुहूर्तमात्रं नानाविधैश्शस्त्रैरस्त्रैश्च परस्परं प्रवृष्टौ तौ नयनोत्सवमप्सरसामजनयतां देवानाञ्च । तदा तयोरेवमात्मनः कृते युध्यतोरचिन्तयत्सा मनसि । "अस्तु ममास्मै परमोपकारिणे स्वस्ति । कोऽन्वयमकारणसुहृन्मे वनेऽस्मिन्नुपागतः । निरूपयामि तावदुन्मीलितनयना कोऽसावित्येनमनिमित्तवत्सलं ।

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

यद्वा नकामये पुमांस मवीक्षितोऽन्यं द्रष्टुं । ईदृश एवहि पतिव्रताना मा
चारः । तथाप्ययमात्मत्राणान्मे संवृत्तो गुरुः । आत्मा खलु रक्षणीयस्स
मागमहेतोरवीक्षितः । तदहमुपकारिणमेनं पश्यामि गुरुमिव निर्विकारमनाः"
इति विचार्य सा विलोकितवती तमवीक्षितं । अथ संमुखमापततः प्रहर्तुमह
रदस्य शिरश्शिलीमुखेन राजसूनुर्दनजस्य । निहतेऽस्मिन्नुपर्यवीक्षितस्सस
र्जुर्देवाः कुसुमासारम् । अभिवृष्टस्सकुसुमैः लेभे मुदं अतिमहतीम् । तत
सा विशालसुता प्राह तमतिविस्मिता । "महाभाग भवताहं समुद्धृता महतो
दुःखसागरात् । प्राणप्रदस्य भवतः किन्नु मया शक्यं प्रत्युपकर्तुम् । उप
कर्तार एव हि भवन्ति भवद्विधाः । नोपकार्यास्तन्निरपेक्षानुद्दिश्य भवादृशा
नबलाऽहमस्वतन्त्रा केन कथंदा शक्नोमि प्रत्युपकर्तुम् । तदेतत् एव मया श
क्यमुपपादयितुम् । यदात्मना शुभाशंसनं नाम । तथा हि ।

धर्मद्रुहां निषेद्धा शरणं शरणार्थिनां अवीक्षिदिव ।
भूया विकस्वरयशाः येनोपकृतं करन्धमगृहेऽ पि ॥

अवीक्षिदपि तच्छ्रुत्वा पप्रच्छ तां कन्यां । "भद्रे, कासि? कथञ्च वश
मस्यासादितवती ? कश्च करन्धमो नाम? कोऽसाववीक्षित्? भवत्याश्च का
वेतौ भवतः" इति । तथोक्ता सा प्राह राजपुत्रम् । "महाभाग, त्रिलो
क्यां विश्रुतस्सराजा करन्धमः । यस्य प्रतापावनतास्सर्वेऽपि भुवि करमा
हरन्ति राजानः । तस्य च साक्षादिव कुसुमायुधस्त्यक्तकुसुमायुधः कुमार
कुमारइवाप्रतिबलो विख्यायते जगत्यवीक्षिदिति । तस्य मां जानातु महाभा
गो भार्याम् । अयञ्च दनुजस्समागत्य मामेकाकिनीमवोचदसदालापान्
अवधीरितश्च मयाऽसौ जहार मां अदीर्घदर्शी" इति । पुनरप्याह ताम
क्षित् । "भद्रे, प्रख्यातं हि ब्रह्मचर्यमवीक्षितः कुतश्चन हेतोः । तदा
हत मेतद्यत्तस्य भवती भार्ये"ति । तदस्य वचश्श्रुत्वा तं प्राह सा विशाल
ता । "महाभाग, किमुक्तेन बहुना? सत्यमस्मि तस्याहं लोकवीरस्य भा
र्या । महाभागं तु जिज्ञासते हृदयं आत्मप्रदं" इत्युक्ते तया तां प्रति
हुधा सन्दिहानस्स यदा नकञ्चिदपि प्राप निश्चयं तदा देवास्सर्वेऽपि तुष्टा
नुजवधात् प्रादुरासन् पुरस्तादवीक्षितः । प्रणमन्तञ्च तमवोचन्वरग्रहणहेतो



स च वव्रे तनयमात्मनस्सदृशमसदृशमितरैः । ततो देवास्तमूचुः । "राजपुत्र
पुत्रस्तव सप्तद्वीपाधिपतिः सप्तसप्तिसमः सप्ततन्तुसहस्रकृच्चक्रवर्ती भविता
भवता मोचितायामस्यामेव कन्यायां" इति । श्रुत्वा स गिरं देवानां आह
तान् नृपसूनुः । "ननु प्रसादात् भगवतां भविता मम चक्रवर्ती तनयः ।
परं विना विशालसुतामन्या मे नकाम्या कन्या । मत्कृते खलु सा तत्याज
सर्वजीवलोकसुखम् । न तां अपहाय भजति स्वर्गोऽपि मम स्पृहणीयताम् ।
न खलु करन्धमसुतो विहाय विशालसुता मन्यां कन्यां विलोकयेदपि ।
तद्यदि मयीश्वराः सानुग्रहा भूयान्मे विशालसुतायां एव तनयो नास्यां क-
दाचिदपि । यद्यपि मयैवेयं मोचिता भगवद्भिरपि समनुज्ञाता भार्यात्वेन
निरुपमसौन्दर्याच । तथापि किंकरोमि रमते मे मनस्सानुशयं विशालदुहि-
तर्यैव । नखलु साक्षादपि सौन्दर्याधिदेवता सुखयेच्चक्षुरवीक्षितः इति सा
लोकसाक्षिणां पुरस्समाकर्ण्य तस्य वचस्तमेव जानन्ती सम्यगवीक्षितं प्रत्य-
भिजानन्ती च प्राप वाचामगोचरं आनन्दम् । अपश्यदेनं आपिबन्तीव न-
यनाभ्यां सानुरागं मुहुस्सलज्जञ्च । ततः प्रणम्य सा देवान्मनसा प्रार्थितवती
भद्रमस्यावीक्षितः । अथ देवाः प्राहुरेनम् । "ननु भोराजपुत्र, सैवेयं वि-
शालसुता या खलु भवता सततमेव सबहुमानं प्रशस्यते प्रसङ्गेषु प्रेमवती-
नाम् । यथेयं त्वय्येव निबद्धहृदया भवानपि तथैवास्यामिति सुश्लिष्टमेतद्यु-
वयोः एव दांपत्यम् । तथाहि ।

एकं विना यथैका नपरं गणयति तथा यदि विनैकाम् ।
एको गणयति नान्यां मान्यमवन्यां तदेव दांपत्यम् ॥"

इति वचस्सदेवानां शृण्वन्नपि विलोक्य तामभिनवयौवनां नैव यदा म
नागपि लेभे प्रत्यभिज्ञां देवानेव तदा प्रार्थितवान् । "ननु भगवन्तः, सा
विशालसुता स्वयंवरसमय एव तन्वा पस्पर्श किंचिदिव मध्यावस्थाम् । ए-
षा पुनरद्य नातिक्रामति मुग्धतां लावण्यं अपि ततोऽधिकमस्यां पश्यामि
बालिकायाम् । तच्छ्रद्धेयवचसामपि भगवतां मीमांस्यो भवत्यादेशः ।"
इति सुतरां सन्दिहान मवीक्षितमनयैव पृष्टया भविता भवतस्संशयच्छेदः
इति सन्दिश्य जग्मुस्ते यथागतं त्रिदशाः । ततस्तामवीक्षिदप्राक्षीत् ।

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

"भद्रे, यदि भवती सत्यमेव विशालसुता कथमवस्थाच तनोर्लावण्यसंपच्च ततोऽपीमेरमणीये? यद्यपि सुखयासि मे चक्षुस्सौन्दर्येण लावण्यसंपदा च । तथापि परमार्थतो विशालसुतां त्वां अनध्यवस्यन्नबध्नामि हृदयं त्वयि सानुशयम् । तत्कर्तुं अर्हसि संशयस्य सम्यगपाकरणं" इति । सातु तस्य प्रेमातिशयं आत्मनि विचिन्त्य हर्षभरं अशक्नुवन्ती वोढुं वक्तुं उपचक्रमे प्रेयांसं । "आर्यपुत्र, सैवाहं अस्मि विशालस्य राज्ञः तनया । या पुरा मन्दपुण्यमात्मानं अज्ञासिषम् । अथवा कृतं अतिकृच्छ्रदशां स्मृत्वा । यत्सं प्रति जानामि पुण्यवतीनां आत्मानं प्रथमोदाहरणम् । धन्याहमस्मि कृतकृत्याच । यदवधीरितायां प्रागार्यपुत्रेण दर्शितस्सांप्रतमेतावान्मय्यनुरागः । अधुनाऽहमस्मि भाजन माम्नायपठिताना मखिलानामेवाशिषां । यदेवमार्यपुत्रो मां बहुमन्यते परोक्षेऽपि । दिष्ट्या नाहमार्यपुत्रस्यानभिमतेति समुत्सृष्टवती तनूमेतां । दिष्ट्याच देवा दूतमुखेन मा माश्वासयामासुरार्यपुत्रसमागमसूचकैरपत्योदयादिभाविवृत्तान्तैः । दिष्ट्याच नागलोकं नीताया मे तनुरेषा रसायनादीना मुपयोगादाश्चर्यतमं रूपातिशयं प्रापिता ।

दिष्ट्या नागवधूभ्यः दत्तं सम्यङ्मयाऽभयं तनुजात् ।
यद्भवेन दनुजात् भयं निवृत्तं ममार्यपुत्रेण ॥

इति स्वात्मनो भागधेयं बहुमन्यमानाया वचसैव विनिवृत्ते संशये सप्रणयं सबहुमानञ्च वीक्षांचक्रे मत्वा स तां स्वामेव कांतां विशालसुतां । इति तयोरन्योन्यसमागमप्रीतयोस्संवदतोरेव समाजगाम गन्धर्वराजस्साकमप्सरोभिरनेकैश्च गन्धर्वैः । स तमवीक्षितमुपचरन्तं प्राह सप्रणयं । राजपुत्र सेयं मम तनया भामिनी नाम । कन्यैव सती कारणान्तरे शप्ताऽभूदगस्त्येन "भव मानुषी" इति । ततो विशालस्य गृहे जगृहे जन्म सैषा । तदिमां मम तनयां प्रतिगृह्णातु भवानद्य मया दत्तां । अज्ञासिषं प्रभावादलोकसाधारणमहिमान मस्यां भवान् जनयिष्यति पुत्रं इति । तथा तेन संदिष्ट स्सराजसूनुर्निर्वर्तिते तुंबुरुणा विवाहविधौ मुमुदे स तया सह समानुरागया भामिन्या । तदा वनभुवि बभूव महानुत्सवो गन्धर्वाणामप्सरसाञ्च । ततस्तत्र सर्वेऽपि तरवस्समपद्यन्त गन्धर्वमयाः लताश्च सर्वा निर्विशेषमासन्नप्सरोमय्यः ।



गान्धर्वमयमासीत् अखिलमपि गगनतलम् । नाट्यमयीच बभूव भूमिः कृत्स्नापि आतोद्यमयाश्च सर्वेऽपि ग्रावाणः । मैरेयमय्य स्सर्वाअपि सुस्त्रवुस्स्रवन्त्यः । एव मतिक्रान्तेषु क्षणवदेव सुखातिरेकादुत्सवदिवसेषु निनाय वधूवरौ गन्धर्वराजस्स्वमावसथं । तत्रापि रेमे स तया गन्धर्वराजपुत्र्या सह रम्येषु देशेषु नृपसूनुः । असूत सा गन्धर्वगृहे पुत्रमप्रतिमं । तस्य जन्मनि देवास्सर्वेऽपि समागत्य सम्यगनुबभूवुरुत्सवम् । चक्रे च तस्य तुंबुरुरभिधानं । यदयं मरुद्भिरभिरक्षितः । त'न्मरुत्त'इति । अथ राज्ञा गन्धर्वाणा मनुगम्यमान स्सकुटुम्बस्समेत्य नगर मवीक्षदसौ न्यधात् पितुरुत्संगे निजतनयं। प्राह च सविनयं पितरं । "तात, किमिच्छके व्रते ममांबाया नन्वस्मि भवताऽभ्यर्थितस्सन्दर्शय पौत्रस्य मे मुखं" इति । सएष पौत्रस्तातस्य । पश्यत्वेनं तातः" इति । करन्धमोऽपि सावरोधस्सपौरजानपदः ससामन्तस्समीक्ष्य पौत्र मवाप मुद मपरिच्छेद्यां । मरुत्तोऽपि क्रमेण जगृहे सर्वा एव विद्याः । विनीतश्चासीदखिलेष्वपि शस्त्रेषु तावदस्त्रेष्वपि । करन्धमोऽपि परिणतवया गन्तुकामस्तपोवन मुवाच पुत्र मवीक्षितम् । "वत्स वयं कस्मिंश्चित् कर्तव्ये तव सन्देष्टारः भवताच तत्र पुरस्कार्या वय मभ्युपगमवादैः । नखलु सतामृते पितृवाक्यपालनादन्यदस्ति पावनं कर्म । तदिदानीं ।

जरसा परिभूतानां शरण मरण्यन्नचेतरद्दृष्टम् ।
अनुजानीहि तदस्मान् तपसे धृत्वा स्वमेव राज्यभरम् ॥

इति पितुराकर्ण्य वचनमवीक्षिदाह जनयितारं । "तात, बद्धोऽहमरिभि र्मोचितोऽस्मि भवता खलु बन्धनात् सोऽहं कथं तु पुरुषमानी सन् भवेयं राजा यन्मे बद्धस्य तदा जातं शस्त्रं । मुथा नटस्येव त्रातुं प्रकृतीस्स कथं तात वहेयं तदेव निर्लज्जः । तदन्यमेव कमप्यवस्थापयितुमर्हति राज्ये तातः । यस्य न वन्ध्यं शस्त्रं । यश्च परैरपराभूतः । येनच नोपजीव्यते परस्य शौर्यं" इति । अथ पित्रा तैस्तैरुपदेशैः पितापुत्रयोरव्यतिरेकं दर्शयद्भिर्विबोधितोऽपि स यदा नसंमेने राज्यं तदा तस्यैवानुमते मरुत्तमभिषिच्य सराज्ये जगाम तपसे महदरण्यं । तत्र स राजा पत्न्या सह वीरया बहून् वर्षगणांश्चचार नियतस्तपश्चर्यां । ततस्सनृपति रहिंसासत्यादिषु असंकुचितेषु जाति-

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

देशादिभिरवाप सम्यगेव प्रतिष्ठां । यामाचक्षते महाव्रतमार्गमिनः । ततस्समुपचितात्तपस्स्वाध्यायाध्ययनैश्शुक्लादेव धर्माद्विगळितरजस्तमसा चित्तेन प्राप ब्रह्मण्यैकाग्र्यं । यत्तत् प्रशान्तपावनमालंबनं मनसः । ततः तत्र विन्यस्य कळेबरं सजगाम विरजसो लोकान् । मरुत्तोऽपि लीलया राज्यधुरमुवाह पितामहैः प्रयत्नभृतां । तस्य किल द्वीपेष्वपि सप्तसु केनाप्यप्रतिहतैवासीदाज्ञा । अथ कदाचिद्वीरा तपोवनगता प्रेषयामास कमपि मरुत्तं प्रतितापसं । सोऽपि समागत्य मरुत्तमवादीत् । "अस्ति तपोवने राजन्य, पितामही भवतो वीरानाम । संदिशति यत् सा मन्मुखेन भवन्तम् । तदर्हति भवानवहितेन मनसा श्रोतुं । ननु तपोवनेऽस्मिन् सप्तकुमारा भुजगैर्दष्टानष्टाः कष्टमृषीणां हवींषि च ते शरीरविकारैर्दूषयन्ति अनुदिनं । राजाहि शास्ता समुल्लङ्घितमर्यादानां प्राणिनां । स यदि प्रमाद्यन्नधिकारे सज्जेत विषयेषु ग्राम्येषु को नाम कृत्याकृत्ययोः कुर्वीत परीक्षां । प्रायः प्राणिनां नैसर्गिकी स्वच्छन्दप्रवृत्तिर्विगीतेषु यदि तेषां राजानाम न स्यात् कश्चन शास्ता ! तर्हि कस्य के दाराः किन्तु कस्य स्वमिति भवेदेव सर्वमव्यवस्थितं । विधात्राच सर्वानपि देवानेकीकृत्य सृष्टो जगति नरदेवः । सच यदर्थमात्मोदयः तं चेन्न विजानीयात् मुधा किल तस्य प्रसवात् क्लिष्टा जननी । तदधुना मुनिबालद्रुहो विनेतुमर्हसि सर्वान्"इति । इति तन्मुखात्पितामह्यास्समाकर्ण्य संदेशं समुत्तेजितशौर्यो जग्राह शस्त्रं मरुत्तः । तं तथा रथमारुह्य नागशासनहेतोः प्रस्थितममन्यन्त दृष्ट्वा सर्वेऽपि नागान्तकम् । ततस्सजवनैस्तुरगैरुरगै दूषितमवाप तपोवनं । तत्रच मुनिबालानालोक्य विपन्नान् पन्नगेषु चक्रे क्रुधमतिमहतीम् । अगर्हयच्च तेषां अरक्षितारं आत्मानम् । ततः भुवनवीरो वीरामवन्दत पितामहीं महीयस्या भक्त्या । सापि तमयोजयदुचिताभिराशीर्भिः । उवाच सा तदा किल पौत्रम् । "वत्स, राज्यं नाम चारचक्षुषा समीक्ष्यमाणैर्नृपतिभिश्शक्यम् परिपालयितुम् । अनवधारितयोर्गुणदोषयोः प्रचारयेत् कथन्नु स्थानेषु राजा नयविनयौ । तत्प्रकृतीनां असमञ्जससमञ्जसयोर्भवितव्यमवहितेन भवता । तत् सांप्रतं अमर्यादेषु भवानुरगेषु सन्दिष्टोऽसि गाढं प्रणेतुम्"इति ।

## SRISUKTAM.—(*Continued*).

In the Râmâyaṇa (*Yudhakânda* Sarga VII, Sl 4 and 5) the councillors of Râvana advise him to fight with Rama, and while reminding him of his glorious achievements thus remark:

**कैलासशिखरावासी यक्षैर्बहुभिरावृतः ।**
**सुमहत्कदनं कृत्वा वश्यस्ते धनदः कृतः ॥**
**स महेश्वरसख्येन श्लाघमानस्त्वया विभो ।**
**निर्जितः समरेरोषाल्लोकपालो महाबलः ॥**

'The bestower of wealth, (Kubera) living on Mount Kailâsa encircled by Yakshas, was vanquished by thee in a great battle: that powerful *Lokapâla* (Kubera) was wrathfully defeated by thee, though he boasts of the friendship of Mahâdeva !'

2. *Kîrtih.* The commentator thinks that the term may refer either to the Goddess of that name, daughter of Daksha Prajâpati, the presiding Deity of Glory, or to the treasury of Kubera, which is known by that name.

3. *Mani* may mean, according to the commentator, either the *Chintâmani*, the jewel that confers all wishes, or *Manibhadra*, the younger brother of Kubera and guardian of Kubera's treasury.

4. *Pradurbhûtah* &c. The author of the *rik* prays that the God of wealth may deign to grace the fair land, wherein the author lives, with his presence and make the country prosperous and himself wealthy.

The southern reading, which the commentator follows, has "प्रादुर्भूतोस्मि राष्ट्रेस्मिन् " which would mean 'Here I am (the author), born in this land (and may the lord of wealth be pleased to come and bless me)!'

5. Rama himself, thinking of all the conjugal felicity, peace and prosperity that he enjoyed in the company of his faithful spouse Sitâ, finds none to compare her to, other than "स्फीतांश्रियं"

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

'the plentiful Goddess *S'ri'* (*Yuddhakânda*). The present *rik* states that wealth and the fame are the outcome of the favour of this God Kubera who with attendants ever waits on the devotees of Srî.

RIK VIII.

क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहं ।
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ॥

(Meaning). (With thy grace) do I do away with Evil Fortune, the eldest born, stained with hunger and thirst; Oh thou Srî, do thou remove from my home all poverty and want.

(Notes.) *Jyeshtâm.* The goddess of Evil Fortune is traditionally represented as the elder sister of Lakshmi. The idea seems to be that poverty and want are the natural lot of men and prosperity is a later condition owing its existence to the favour of a benignant Providence that shapes our ends.

RIK IX.

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्

(Meaning). I invoke that Srî whose characteristic is smell, who is unassailable, who is eternally crowned with plenty, who is covered over with dry cowdung and who is the support of all living beings.

(Notes.) *Gandhadvârâm* &c. The Earth is here invoked as one of the forms of Srî. Smell is the defining property of Earth—the property that distinguishes it from air, fire, water or ether.

This fair Earth, firm established and immutable as the laws of Heaven, graceful with fertile meadows 'browsed by deep-uddered kine' and blessing her children with wealth and plenty is fitly regarded as an expression of the unbounded Love of God to man, one aspect of Divine Grace whose several forms have been as already remarked, represented by the comprehensive conception of Srî.



RIK X.

मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥

(Meaning.) May we obtain our heart's wish, our desires, truthfulness of speech, the essence of cows (i. e. milk) and the several sorts of food. May prosperity and fame come to me.

RIK XI.

कर्दमेन प्रजा भूता मयि सम्भव कर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥

(Meaning.) Srî is blessed with a good son in Kardama. Oh Kardama, do thou live in me (*i. e.* my home), and do thou make thy lotus-wreathed mother Srî live (for ever) in my family.

RIK XII.

आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
निच देवीं मातरं श्रियं वासय मे कुले ॥

(Meaning). May the waters bring into existence things that require moisture (*i. e.* may timely rains fertilise the Earth). Oh Chiklîta (son of Srî) do thou live in my home and do thou make thy mother S'rî live in my family.

(Notes). It is difficult to understand the conceptions that are embodied in *Kardama* and *Chiklîta* the sons of S'rî. The commentator remarks, at the opening of the commentary that Ananda, Kardama, Mâruta and Chiklîta, the sons of S'rî are the *Rishis* or sages that gave out this Sûktam to the world. One of the slokas found at the close of the Sûktam says nearly the same thing. The commentator throws no further light on the point, nor do later traditions as far as we are aware.

RIK XIII.

आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

(Meaning) Oh thou all-wise Agni, for me do thou invoke Lakshmi wet with (water from) the tip of the trunks of (the eight) elephants (said to guard and preside over the eight cardinal points), Lakshmi, the embodiment of prosperity, yellowish-complexioned, lotus-wreathed, resplendent as the moon and having a body made of (molten) gold.

(Notes). *Ardrâm pushkarinim.* The elephants which are represented as upholding and guarding the cardinal points are said to take up fresh water with their trunks and pour it over Lakshmi. Pictorial representation of Lakshmi in the attitude of enjoying such a delightful bath is very familiar to Indian readers.

RIK XIV.

आर्द्रां यःकरिणीं यष्टिं सुवर्णां हेममालिनीम् ।

सूर्यां हिरण्मयीं लक्ष्मीं जातवेदोम आवह ॥

(Meaning). Oh thou all-wise Agni for me do thou invoke Lakshmi wet, bearing a wand in her hand (as an emblem of her sovereignty), the embodiment of the rod (as a symbol of authority and punishment), bright-complexioned, wearing a gold necklace, resplendent as the sun and having a body made of (molten) gold.

RIK XV.

तां म आवह जातवेदो लक्ष्मीमनपगामिनीं ।

यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्विदेयं पुरुषानहम् ॥

(Meaning) Oh thou all-wise Agni! Do thou invoke for me that Lakshmi who, once she comes, goeth not away, through whom (invoked) I shall obtain abundant gold, cows, maid servants, horses, and men (children, friends, and servants).

(Note). This *rik* is merely a repetition of the second *rik* with some slight change.

(*to be continued*).

## THE LIFE AND TEACHINGS OF SADASIVABRAHMA.

(*Continued.*)

Sadasiva soon became an adept in Yoga under his master's guidance. He composed about this time a short but very sweet poem on the glory of self-realisation. This poem—Atmavidyâvilâsah—consists of 64 stanzas in Arya metre and describes the greatness of a Yogin who has realised 'Self,' his conquest over the passions, his indifference to praise or censure, his overflowing sympathy with all living beings and his revel in beatific bliss. Such a glorious life was now his ideal and he expresses in the poem, his ardent thirst for the realisation of the ideal, which was not long in coming.

Another work, entitled Sivayoga-Dîpika in five chapters and dealing with the several aspects of Yoga, is also believed to have been composed by him but on insufficient evidence. In the Atma Vidyâ Vilâsa, Sadasiva tells us that his Achârya's name is Paramasivendra but the author of Sivayoga-Dipika refers to his preceptor as one Sadasiva Yogin. Again, we miss in the latter, the charm and simplicity, the indefinable sweetness and a melodious flow that characterise the former work. Sivayoga-Dipika is rugged in style and here and there betrays an incoherency that is out of keeping with the traditions of Sadasiva. Moreover it purports to be taught to a disciple; but the subject of our sketch was himself a disciple at the time when he could have written any work and when his apprenticeship came to an end, he went out a Yogin, with a vow of life-long silence.

Tradition has it that when Sadasiva had nearly undergone the preliminary Yoga training under his Achârya Paramasivendra, he one day launched out into a literary discussion with his preceptor and in the vehemence of the intellectual trysting was betrayed into undue warmth. The teacher was a bit annoyed and exclaimed 'Sadasiva, when will you learn to preserve a becoming silence'. The student saw his folly and to effectually prevent the transgressions of that unruly member his tongue, took thenceforth a vow of life-long silence. He prostrated himself before his teacher, begged forgiveness for his fault, took final leave of his master and went out a homeless, speechless mendicant trying to realise in himself the lofty ideal he had set forth in the "Atmavidyavilasah."

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

Henceforth he lived the life of a wanderer, never staying anywhere for any length of time, never once opening his mouth but when absolutely necessary expressing his thoughts by gestures or by writing on the ground. Little by little he was trying to gain mastery over his naturally fiery spirit. Tradition has it that one morning he was found lying down in the fields resting his head on the embankment that divided field from field. The labourers that passed by went on their way remarking that one who had given up the world still found it necessary to have a support for the head. Next morning the labourers passed by the same way and saw Sadasiva lying down but without any support for his head this time. Thereupon one of them wondered how one who professed to scorn all earthly things could still be so sensitive to criticism. This incident was soon after related to Sri Venkatesa who is said to have given vent to his thoughts in the following couplet.

तृणगणिताखिलजगतामपि करकलितत्रयीरहस्यानां ।
श्लाघावारवधूटीघटदासत्वं तु दुर्निरसम् ॥

"Even to those who hold the world (as valueless as) a straw and who have mastered the secrets of the threefold Veda, even to such it is difficult to cease to be slaves to the strumpet Fame."

Such little failures as these were however simply stepping-stones which led him to the highest heights of psychical progress. He now finally left these scenes of his youth and spent some time on the lovely banks of the Amravati and the Kaveri in the Coimbatore District. Many a time and oft would he be seen wandering aimlessly as it were like a mad man, with a strange, unearthly, far off look in his up-turned eyes, his mind perfectly unconscious of what passed around him and his energies concentrated on Self; and the simple people of Karur, Kodimudi, Nerur and other villages, strangers to the scoffing spirit engendered of modern thought, looked up to him with awe and reverence and knew him for a *mahatma*, whose 'soul was like a star and dwelt apart'. Now would he be seen to plunge into the groves, far and wide, that lay stretched on either side of the sacred streams and lost to view for many a



day; Now would he be seen lying on the fine, white undulating sands of these rivers. Once, it is said, while thus reposing on the sands of the Amrâvatî, one of those sudden floods that often rush through the wild stream without notice, came and carried off the unconscious yogin and buried him in the sands in its onward sweeping course. Days passed and the river shrank into narrow proportions. One day a labourer coming for a cart-load of sand, plunged his spade deep into the bed and lo! it came into contact with some obstruction. The surprised workman drew out the spade and beheld with consternation a few drops of blood trickling down his tool. A group of astonished spectators now gathered round him and dug out the buried man who turned out to be our Svamin. Thus roused into consciousness, the Svamin looked about him as if just risen out of a deep slumber and after a few minutes went his way as if nothing in the world had happened to him.

It may be hard to believe all this; but the anecdote persists in living. It may be here noted that mainly perhaps on the strength of some experiments conducted by Ranjit Singh, the Lion of Lahore, in the presence of the English Resident and under conditions which precluded all possibility of deception, Dr. Bain than whom it is hard to find a more cool-headed thinker says: "There appears to be unexceptionable testimony to the practice of the Indian fakeers in allowing themselves to be buried for a number of days, after which they are dug out alive. This would be wholly incredible, but for the knowledge that we have of such states as trance or lowered animation, which dispense with food altogether for a time, and require only the minimum of Oxygen." It may be remarked that the aim of yoga at the outset is the suppression of breath and the bringing of the vital functions to all but a perfect stand-still and the tradition that is persistently believed in of such an adept as Sadasiva has doubtlessly a foundation of truth.

Our Svami now went to Tinnevelly Tiruchendur, Madura, Ramnad and other places in the south and he is said to have performed certain miracles not for making a name and exciting the idle curiosity and admiration of the public, but for relieving the sufferings of his fellow-creatures.

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

It was about 1738 A. D. that Sadasiva came over to the forests adjoining Tiruvarangulam a few miles off Pudukotah. While wandering in these extensive forests he was seen by the ruler of the Pudukotah State—Vijia Raghunatha Tondaman (1730—1769) who was known by his more familiar name Sivajnâna Puram Dorai. This Tondaman was a devout and religious man and spent much of his time in pious meditations in the forests adjoining a lake which still bears his name. Pleased with the single-minded devotion of the Tondaman who clung to the ascetic with a steadfastness that precluded all chance of evasion, Sadasiva wrote down on sand certain religious instructions and by the same method directed him for further information to his fellow-pupil Gopalakrishna Sastri who was then living in Bhikshandar Kovil in the Trichinopoly District. This Sastri was invited to the court and, by a copper-plate *Sâsana* dated 1738 A. D. that still exists, grants of land were made to him and other Brahmans who came with him into the State. The Dusserah celebrations as well as the worship of Dakshinâmurti in the palace chapel were now instituted on the lines laid down by Sadâsiva. The sand on which the ascetic had written the instructions was carefully brought to the palace shrine and is still preserved there with religious veneration. From the advent of Sadasiva followed a bright and prosperous period for the State, learned scholars were invited to the State and grants of land made to them, and the Tondamans trace all their glory and eminence to the spiritual influence of the sage.

Sadasiva soon left these forests and wandered on wherever his feet led him, spreading sunshine and happiness wherever he went. After a long life of silent meditation and unostentatious benevolence he attained beatific union with the Supreme Being at Nerur in the Coimbatore District on the Jyeshta S'uddha Dasami in the month of Mithuna, on which day his anniversary is still celebrated by the descendents of his disciples. The Tondamans have built a shrine over the buried remains of the sage at Nerur and have made an extensive grant of lands for the performance, in a suitable style, of the religious services in the sacred shrine dedicated to him at Nerur.

॥ श्रीरामोविजयतेतमाम् ॥

## ॥ श्रीराममहिमा ॥

यो व्योमन्यतिनित्यवासरसिकस्सर्वं जगद्व्याप्नुवन्
सर्वात्मा सकलेश्वरश्च भगवान् श्रीवासुदेवोवनौ ।
सन्दृष्टो वरकोसलेश्वरपदं संप्राप्य सीताधनम्
सर्वेषांच समस्तभाग्यमदिशत् श्रीराममीडेऽनिशम् ॥

क्वाहं मन्दमतिः परात्परतरं क्वास्तेच तद्वस्त्वहो
श्रीरामाभिधमत्र मित्रजनतातद्धर्मसारोदयम् ।
आज्ञासीदभिधातुमन्धइह किं चन्द्रोदयं वर्णयेत्
तत्राप्येष तथा यते ननु सतां हासाय मोदायच ॥

वाल्मीकेर्मुखपङ्कजोद्गाळिततद्रामापदानामृतम्
स्वादंस्वादमिहैव मुक्तपदवीं संजग्मुषां श्रीमताम् ।
पादाब्जे प्रणिपत्य तद्बहुगलन्माध्वीमधुप्रस्रवैः
संसिक्तोऽधिरसज्ञमस्मि रघुराट्धर्मामृतास्वादकः ॥

ब्रह्मणआरभ्य जिष्णवः केचन विष्णवंशाः अनेके क्षत्रियाः शक्तित्रयदिराजितमहाशक्तयः वसुन्धराधिपाः पूर्वं सर्वामप्यब्धिमेखलां पालयामासुः । तेहि वैवस्वतमनुप्रभृतयोऽभवन् । जगतीमिमां समस्तामपि पर्यपालयन्नपि । तदधिष्ठितप्रधानो जानपदः कोसलनाम्ना चकाशे । तेषांच राजधानी विश्वविख्याता अयोध्या नाम नगरी तत्राबोभवीत् । सतां मनुः किलादिमः स्वसंकल्पेनैव निर्ममे । साखल्वायता द्वादशयोजनानि । वितस्तारच त्रीणि ॥ सर्वथा स्वस्तिकरी स्वर्णगरीसौभाग्यपारंपरीसम्पूर्णा स्वतिदुर्धर्षाच विजयतेस्मतराम् ॥ मन्वनन्तरं स्वसमाख्ययाद्यापि समलंकृतसर्वमहीमण्डलः राजाधिराजमहाराजः नाम्नेक्ष्वाकुर्महीपतिः राज्यं चिरंवशं कारयामास । स

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

खलु महान् तपस्समाराधितपितामहः स्वोज्जीवनार्थोपदेशतः सकललोकसमुज्जीवनार्थं संगृहीतपरमेष्ठिपरमगृहार्चो बभूव । तद्गृहार्चाच्युतोह्यत्र श्रीरङ्गेशइति संज्ञायते विश्रूयतेद्यापि । तस्यावनीपतेरन्वये त्रिलोकविश्रुतः निहताभित्रो जितेन्द्रियः महर्षिकल्पः राजर्षिरतिरथः नित्याहिताग्निः दशरथोनाम जगतीपतिर्जगदपात् । तस्य अष्टौ अमात्याः महाशुचयः धृष्टिजयन्तविजयसिद्धार्थार्थसाधकाशोकमन्त्रपालसुमन्त्रनामानो नयविदितभूमानोऽभवन् । तस्य द्वौ प्रियतमौ ऋत्विजावभूताम् । मन्त्रकर्मण्यपि तावनुग्राहकौ । तयोर्वसिष्ठोहि तस्य पुरोधास्सर्वत्र महादेशिकश्च । तस्यातिशयितप्रभावस्य दशरथमहाराजस्य अन्वयकरो नतनुजो जज्ञे महतापि कालेन । तत्र चिराय संचिततपाः गुरूपदिष्टं हयमेधाभिधानं महाध्वरं यथाविधि अन्वतिष्ठत् । पुत्रीयामपीष्टिं यथाशास्त्रमयाक्षीदनन्तरमेव । तत्समनन्तरएव सौम्ये समये तत्तत्सप्ततन्त्वधिदैवतमहाप्रसादानिव कौसल्यासुमित्राकैकेयीनामसु मान्यचरितासु प्रोष्ठपदोपमान् चतुरस्तनयान् प्रसुषुवे । तेतु चत्वारोपि परमात्मनः नारायणस्य परमांशपरिपूर्णाः । सपरमेश्वरो महाप्रळये नित्यमुक्तवत् परमे व्योमनि स्वांघ्रिसरोरुहयुगपरिचर्यास्वरूपयोग्यतावतोपि बत तद्विहीनान् महाप्रळये प्रकृतिविहीनान् जीवानालोक्य जडायितान् दयार्द्रदिव्यमनाः महदादिसर्गनियमेन स्वाराधनोचितानि करणकळेबरादीनि ददौ । तैरेव करणैः विषयान्तरप्रवणेषु तेषु स्वशासनरूपं वेदशास्त्रं तदानुकूल्याय प्रवर्तयामास ॥ तस्मिन्नपि तेषु अप्रतिपत्तिविप्रतिपत्त्यन्यथाप्रतिपत्तिभिः मोमुह्यमानेषु सत्सु स्वाज्ञातिक्रामिणां जनपदं साधयितुं स्वयमेवाभिजिगमिषुरिव जगतीपतिः स्वाचारमुखेन तच्छिक्षयितुकामः श्रीरामादिरूपेण चतुर्धावततार इति महान्तस्सदा सर्वथाच वदन्ति । अप्राकृते यत्तानवच्छिन्नसर्वमङ्गळगुणोपेतस्य सर्वेश्वरस्य लीलामानुषविग्रहस्य दिव्याः गुणाः कथं मया पतंगोज्वलज्ञानाभासेन वर्णयितुं शक्यन्ते । ते च गुणाः परब्रह्मात्मकसामवेदसन्ततगायिना श्रीनारदेन भगवता वल्मीकसम्भवाय



तन्नामध्यानामृतसदापानसमुल्लसितदिव्यात्मने समुपादिक्षत । तद्गुणमणिगणाधिगमवन्तो बहवो वसन्तोऽत्र सन्तः सर्वानवद्यलक्ष्मीरत्नाकरानितरां समेधन्ते । इक्ष्वाकुवंशप्रभवो रामो नामेत्यादि । सत्येधर्म इवापरः । इत्यन्तं श्रीवाल्मीकिदृष्टरामायणप्राथमिककाण्डप्रथमसर्गे सर्वेपि गुणास्तस्य श्रीरामस्य उनलक्षणनीत्या व्यक्तमुदाहारिषत । तदेव गुणप्रतिपादनं सर्वात्मनानर्हस्य मम वागापतितं सत् रसिकराजानां महतां धुरि परमप्रहसनाय वैस्वर्यविघूर्णितन्यूनातिरिक्तश्रुत्या निर्भरमुद्भवेत् । क्वचनापि व्यक्तमनुक्ताहि विषयाः येनकेन च न यदा कदा वा प्रतिपादनदशामाश्रयन्ते । अथापि सङ्ग्रहेण सहृदयानुदेशमनुसृत्य यत्किञ्चिद्विवक्षोरस्य क्षन्तुमर्हन्ति महान्तः गुणैकग्राहिणः । श्रीरामोनाम सप्रभुः विभुरपि परिच्छिन्नभूमिकः चिरं भुवं पुरा शशास । तस्य वीर्यन्तु दोषैरुपाधिभिः अवधिना साम्येन च अतिशयेन सत्यं विवर्जितम् किंच सगुणैरेव वशीकृतजनः । अत एव हृषीकेशपदवाच्यः । यस्सर्वज्ञस्सर्ववित् इति श्रुत्यैककण्ठ्येन सर्वज्ञः शरणागतरक्षणैकधर्मः ।

मित्रभावेन संप्राप्तं नत्यजेयम् कथञ्चन ।
दोषो यद्यपि तस्य स्यात् सतामेतदगर्हितम् ॥

इत्यत्र इदमन्वर्थतां न्यदर्शयत् विभीषणशरणागतौ । स्वभावतः स्वरूपतः च सर्वविषयकज्ञानशीलः आश्रितरक्षणैकचिन्तावान् पुरुषकारभूतया श्रियेव सीतयाऽविनाभूतः आचरणप्रचारणाभ्याम् सकलधर्मव्यवस्थापकः उन्मार्गगामिनोपि चिकित्सकनीतेरनघयिता । धर्मोपदेशसमये जनास्सर्वेपि पण्डिताः । तदनुष्ठानसमये मुनयोपि नपण्डिताः ॥

इति स्वधर्मानुष्ठानात् नैव स्खलति । सर्वेषामिष्टप्रापकः अनिष्टनिवर्तकः सीताविवाहमुखेन स्वाश्रमयोग्यधर्मं यद्यप्यन्वतिष्ठत् । हरधनुर्भङ्गजामदग्न्यजयादिना परत्वमपि स्वकीयमदर्शयत् । सकलवेदवेदाङ्गमर्मज्ञः यदा कदा-

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

चिदपि ज्ञातांशान् न विस्मरति अतिगभीरप्रकृतिः । सर्वैरपि ज्ञानवद्धैर्वयोवृद्धैश्च सदाच मुदाऽभिगतः स्वाश्रितविषयागःकरणे ज्वलदनलइव निसर्गतः शिशिरशिशिरेपि हृदये कोपमावहति यथा ज्वलति कालानलो जले। स्वस्मिन्येनकेनचन आश्रितेन अपकारकरणे तिष्ठत्यचेतनवत् नस्मरत्यपकाराणां शतमप्यात्मवत्तये इत्युक्तेः । तादृशं सर्वेषामपि गुणानां आधारबलेन गौरवास्पदं सत्यपराक्रमं गुणैरपि ज्येष्ठं श्रेष्ठैः यौवराज्यपदे नियोक्तुमियेष प्रायेण गलितषष्टिवर्षसहस्रोऽद्य दशरथचक्रवर्ती । अहह किमेष ज्येष्ठसुतः अहह यौवराज्यनियोगादर्वागेव कथं सर्वेपि जनास्सुखम् निवसेयुः इत्येवं सर्वदा लोकसन्धुक्षणैकचिन्तापरः शत्रुविषयेपि प्रियभाषणशीलः नैवानृतकथः प्रजानुरक्तः प्रजारंजितश्च । तद्यौवराज्याभिषेकार्थम् सम्भृतान् अखिलानपि सम्भारान् कैकेयीनाम चक्रवर्तिमध्यमहिषी सुमध्यमा नसेहे न-नाथेच तद्राज्यं निजात्मजायैव भरताय । द्वैतीयिकप्रार्थनतया विवासनंच श्रीजानकीजानेः । साखलु लब्धवर्णा लब्धवरद्वयाभूत् शंबरासुरमृधे पालितवती पतिम् । भूजानिस्तु दशरथो सत्यपाशेन नियतमभिसंयतः प्रेष्ठमपि ज्येष्ठं कुमारं सत्या सीतया समनुविहितं श्रीरामानुजेनच विवासयितुं अस्पृहमेव सत्यमुररीचक्रे । अभिषेक्ष्यमाणोपि सपूर्णकामः कामकामो राजकुमारः पितरं सत्यसन्धं अकलङ्कं विधित्सुः सुकुमारकुमारीमपि जनकमहाराजस्य निजप्राणकान्तामनाघ्रातकृच्छ्रलेशां सहजसौहार्दं सहजमपि लक्ष्मणं गहनगहनाभिगमने सहात्मनैव भेजे । पौराः केवलमनुबद्धा श्श्रीरामचन्द्रे सर्वात्मना पुरतः श्रीरामापसरणं नैवाभिमेनिरे । ततस्सर्वेपि ते नागरा नैगमा आबालवृद्धमभिसङ्गताः अनुजग्मुरेतं महीपालसुतं प्रस्थितमुदारं सदारानुजं अतिदुर्गमहारण्याय चतुर्दशाब्दान् तत्रैव वस्तुम् । दशरथोपि सकलधराधरेन्द्रचक्रवर्ती स्वस्यापि हस्तगतं वस्तु स्रस्तं मत्वा विकलविकलेन्द्रियः सर्वत्र विरागः श्रीरामभद्रैकानुरागः महारण्यमभियान्तं तमेव अभि-



दुद्राव । तामनुव्रज्यां चिरमनुसर्तुं परमाप्तैः परब्रह्मवेत्तृभिः श्रीवासिष्ठादिभिः प्रतिरुद्धः प्रतिजगाम अवरोधमेव निजम् । इतोपि कियन्तं दवीयांसम् श्रीरामभद्ररथं समनोरथाः अनुसरन्तोपि सर्वेपि पौराः अतितरां संहिता अपि अतिसंहिताबभूवुः अध्वानुधावनपरिश्रान्तिश्लथमानकरणकलेबराः अत एव निशीथे सुतीव्रसुषुप्तिविलीननष्टान्तःकरणाः । तत आश्रृङ्गिबेरपुरम् सोऽतिरथः श्रीरामः सुमन्त्रविश्रुतसुमन्त्रचोदितसदश्वैनैक्ष्वाकरथेन अञ्जसा यथाशयं समभिगम्य तत्र तं विसर्जयामास अधिगङ्गाकूलम् । मृगघातकजीवानामधिपः कश्चित् गुहनामा श्रीरामे मैत्र्याः परमां काष्ठामभक्त। तस्यैव साहाय्येन श्रीरघुनन्दनोयं सहसीतानुजस्तीर्त्वा इह विष्णुपदीं तत्तीरनिवासितपोविराजमानभरद्वाजाशासनात् चित्रकूटं नाम सुमेरुसमानं महागिरिमनुप्राप्य बह्वीश्शरदः कृतरमणीयावसथः तत्रैव प्राचेतसादिपरममुनिपदन्यासपूते भृशम् अवात्सीत् । तदा अयोध्यायां किल कृछ्रलब्धपुत्रविवासनशोकातुरः राजा दशरथोपि स्वरियाय । एवमन्तरे चिरादर्वागेव मातुलकुलं सशत्रुघ्नम् अध्यूषिवान् भरतोपि अत्याहितश्रवणेन उद्विग्नमना सरभसम् सहसानीतस्साकेतपुरीम् । अभिज्ञाय च सर्वम् यथावस्थितं परेतं च पितरं अवितर्कितं प्रदर्श्य शोकातिरेकविदीर्णहृदयसन्धिः व्यधादखिलमपि और्ध्वदैहिकं पैतृकम् । तिरश्चकार नियुज्यमानोपि वसिष्ठादिभिः पित्र्यं राज्यभरणम् । निरणैष्टच राज्यस्थापनमग्रज एव । तत्क्षणात् रथगजतुरगपदातिमुखैः सर्वैरपि राज्याङ्गैः सकलैरपि विषयवासिभिः वसिष्ठवामदेवजाबालिकात्यायनसुमन्त्रमार्कण्डेयकाश्यपसुयज्ञप्रभृतिभिः मुनिभिः श्रेणीमुख्यैरपि नैगमैः साभिनिवेशं परिवृतः केकयीतनूजो भरतः सौभ्रात्रसमाकृष्टमनाः कैकेय्या निजजनन्या पराभ्यामपि ज्येष्ठमातृभ्यां परमगुणाभ्याम् सहितः श्रीराघवमग्रजं प्रसाद्य तं प्रत्याजिगमयिषुः पितृमण्डलपट्टाभिषेकमंगीचिकारयिषुश्च हार्दानुरागग्रथितसौहार्दगुणाकृष्टः वायुवेगानुसारियानाधिरूढो जगाम श्रीरामनिवासधन्यं महीधरं चित्रकूटं मध्येसरणि समात्तगुहातिगभीरसौहार्दः ।

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

शरणमगात्तत्रोर्जितवासं सीताजानिं साशासनमुवाचच । ज्येष्ठे त्वयि विद्यमाने सकललोकसाम्राज्यालंकर्मीणे कथं त्वत्कनीयसो मम त्वत्पादाश्रितस्य त्वदेकप्रतीक्षिभद्रासनाधिरोहणं युज्यते । अतः राजासनं लोकानप्यखिललोकपालान् मामप्यनुरक्तमनुरञ्जयस्व सानुग्रहं इति । तदा श्रीरामोपि परमोदारः नैवेयेष प्रतिज्ञाभङ्गं । ततः कथमप्यात्मस्थाने यथाभगवद्वसिष्ठादेशं पादुके निजे न्यासं दत्वा न्यववर्तत् भरतं साकेतपुरमेव । सोपि भरतः शिरसा प्रतिगृहीतश्रीरामपादुकः धन्यमत्मानं नितरां मन्वानः आससाद तामेव रघुवरपालितामयोध्याम् । संक्षोभमखिलमपि तत्र राजपुत्रप्रवासजनितं अभिसमाधाय श्रीपादुकानयनेनाभिशाम्यच अनुमान्यच गुरुजनान् अयोध्योपशल्ये नन्दिग्रामे सकलजनानन्दकरं श्रीरामपदत्राणे जगत्त्राणे अभिषिच्य राज्यमशात् तदादेशेनैव । श्रीरामोपि भरतनिर्बन्धेनापि अविचालितप्रतिज्ञः पितृवचनपरिपालनैकदत्तावधानो दण्डकानविक्षत् चित्रकूटं विहाय तत्र मित्रकूटमागत्यात्मानं निबध्नीयादिति। ततस्सराजीवलोचनो महानुभावः श्रीरामः मध्ये पश्यतोहरमिव सीताहृतं विराधं अहन् । न्यक्षैप्सीत् कस्मिंश्चन खाते महाश्वभ्रे । निक्षेपणं च अवटे प्रावर्तत विराधप्रार्थनया यदवटनिहिता राक्षसाः सनातनान् लोकान् भजन्ते । ततोऽजिहीत शारभङ्गमाश्रमं तत्र सर्वकर्मसमाराध्यो भगवान् श्रीरामचन्द्रः शरभङ्गार्जितान् अखिलानप्यक्षयान् नाकपृष्ठ्यलोकानिदानींतनमुमूर्षुणार्पितान् प्रतिजग्राह । तत्प्रदिष्टं सुतीक्ष्णाश्रममपि ततो जगाम। तत्रागतैः विविधतपोवैभवैः वैखानसैः भगवन्नखजातैर्वालिल्यैः भगवद्रोमजातैः संप्रक्षालैर्मरीचिपैः अश्मकुट्टैः पत्राहारैः दन्तोलूखलिभिः उन्मज्जकैः शिरोमात्रमुद्धृत्य सदाजलावगाढैः गात्रशय्यैः उरसि पृष्ठे अंसयोर्वा शिरःकृत्वा शयानैः अशय्यैः अभ्रावकाशकैश्च वर्षातपादिष्वनावृतदेश एव वर्तमानैः सलिलाहारैः वायुमात्रभक्षैः वृक्षाग्रादिनिलयैः स्थण्डिलशायिभिः व्रतोपवासानिरतैः आर्द्रवसनवसनशीलैः सदाजपशीलैः



स्वाध्यायपारायणरूपतपोनिष्ठैः पञ्चाग्निमध्यस्थैः तैस्तैर्ब्रह्मवर्चसपरमोज्वलैः समाहितैः दृढयोगैः रक्षोऽविरतविहितामात्मबाधां बहुधा उपपादयद्भिः शरणागतैः अत एवात्ताभयैः पंपापगानिवासिभिः चित्रकूटालयैश्च महर्षिसत्तमैः ब्रह्मविद्भिः सहितः तद्रक्षैकसङ्कल्पः सहभार्यः ससोदर्यः सुतीक्ष्णस्याश्रमपदमयासीदयापयच्चैकां निशां नितरां सत्कृतः । तदा मृगेभ्यो नबाधान्तरमिति विज्ञापितो रघुकुलतिलकः तान् हन्यां शरेणाशनिवर्चसा किन्तु भवानभिषज्येतेति सङ्कोचामि ततो नात्र चिरं वासः रोचते ममइत्युवाच । ततोनुज्ञापितसुतीक्ष्णः असौ रघुवीरः धर्मनित्यैस्तैस्तैरगस्त्याश्रमपदमुपजगाम । श्रीरामतृतीयेषु मध्ये मार्गमायातेषु सत्सु तेषु धर्मायितश्रीरामसहधर्मिणी मिथ्यावाक्यपरदाराभिगमनविवर्जितं स्वप्राणदयितं वैरं विना नोपपद्यतयिति अनुयुक्तवती युक्तमुत्तरयां बभूव पत्ये। रक्षोभिरनवरतमुपद्रुतानां दण्डकारण्यवासिनां महर्षिणां रक्षाकृत एवात्रागतास्स्मः इति तदभयं प्रतिश्रृण्वतः तत्पालनमेव गरिष्ठो धर्मः प्राणप्राणदयिताबहिश्चरप्राणायितलक्ष्मणापेक्षयेति । आनृतिकनृशंसकामवृत्तानां दुर्निवासं यक्षत्वामरत्वादि सर्वाभीष्टप्रदायकम् । तदाऽगस्त्यमाश्रममुपागतो मैत्रावरुणिना तेन सलक्ष्मणाग्रजस्सीताजानिः ऐन्द्रशरासनखड्गतूण्यक्षयसायकादिदानादिभिः प्रत्युत्थानादिसर्वसत्कारैः सत्कृतो बभूव । तदा तदाश्रमोत्तरेण द्वियोजनाभ्यां परतरे बहुमूलफलोदके पञ्चवटीदेशे तेन ऋषिणाहितस्वस्तिवाचनः क्वचन पर्णशालायां वासं सुखेन आततान । तत्र जनस्थानवासिनी काचन शूर्पणखानाम राक्षसी स्वामिनं कामयमाना कामरूपं सन्दधार ततो रघुस्वामी लक्ष्मणेन तां विरूपयामास कर्णनासिकाच्छेदेन । ततस्सावमानिता स्वभ्रातरं खरं त्रिशिरोदूषणसहितं चतुर्दशसहस्ररक्षोगणपालकं रोषयामास प्रेषयामासच श्रीराममास्कन्दितुं । सर्वानपि तान् सनाथाननाथान् कृत्वा मुहूर्तेनैव पदातिरेव परेतान् प्रणिनाय श्रीरघुनन्दनः । ततो रक्षोधिनाथसार्वभौमोपि लङ्काधिपः

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

ज्ञातिवधसंमूर्छितक्रोधः वृतमारीचसाहाय्यः जहार कालचोदनेन नृपात्मजौ सुदूरमपवाह्य तां जनकात्मजां । जघानच जटायुषं गृध्रं श्रीरामार्थमागतवन्तं । अद्य आश्रितदोषासहिष्णुः श्रीरामचन्द्रः मैथिलीमदृष्ट्वा निहतं च गृध्रं दृष्ट्वा बहु विललाप शोकाकुलसर्वेन्द्रियः संभ्रकारतं मृगयामासच मृगाक्षीं तां अपरिमितानुरागेण । तदा कबन्धो नाम घोरदर्शनो विकृतो दारुणः पिशिताशनो ददृशे । जघ्नेच श्रीरामेण सानुजेन तद्धस्तगतेन । सोपि कबन्धो भगवद्धस्तांबुजजनितविलक्षणसंस्कारतो दिवं प्रपेदे । तेनैव महात्मना यक्षेण धर्मचारिणीमभिगच्छेति निर्दिष्टो दशरथात्मजः शबर्याश्रममगमत् तयापूजितः हनुमताच संजग्मे । तद्वचनात् सख्यमपि सुग्रीवस्य वालिनिन्कासितस्य विज्ञापिताद्यन्तवृत्तान्तस्य पस्पराशयनिवेदनेन संप्रतिपेदेच अग्निसाक्षिकं प्रत्यज्ञासीच्च सुग्रीवार्थे तद्वेषिवालिवधं । किंस्विदयं वालिनं हन्यादिति शङ्कमानस्य सुग्रीवस्य प्रत्ययार्थं तद्दर्शितप्रेतदुन्दुभिकायं महासारं हेलयैव दशयोजनान्युदक्षिपत्पादांगुष्ठेन । एकेनैवेषुणा सप्तापि सज्जकतरून् तत्समीपस्थं गिरिं पाताललोकञ्च एकदा बिभेद । ततोतिमानुषचरित्रेण अयमवश्यं वालिहननाय क्षमतयिति विश्वसन् रुमेशः तदैव सन्तुष्टात्मात्मानं कपिराजं मन्यमानः श्रीरामसहितस्तस्मिन्नेव काले किष्किन्धाभिधानगुहावदद्रिमध्यनिर्मितां पुरीं जगाम । जगर्जच वालिनमाह्वयमानः । ततो हरीश्वरो सुग्रीवाग्रजो वाली तारां तारहितोपदेशामपि प्रसभमनुमान्य सुग्रीवेणाभियुज्य नियुद्धमाचरन् एकेनैव राघवबाणेन निजघ्ने । ततो लब्धराज्यस्सुग्रीवमहाराजः वानरान् सर्वानपि सागरमेखलासतः समानीय स्वप्रतिष्ठापकस्य रघुराजो विनष्टां जनकात्मजां प्रति प्रातिष्ठिपत् सर्वाअपि दिशः । ततो दक्षिणान्वेणपराणां दक्षिणानां अङ्गदमुख्यानां मध्ये हनुमान्नाम महावीरः जांबवता प्रोत्साहितसंपातिवचनानुसारी सीतां सन्द्रष्टुं शतयोजनविस्तीर्णं लवणसमुद्रं विलङ्घ्य लङ्कापुरमभिगम्य अवगाह्य तत्र शोकपरायणां सीतां सन्दृश्य अंगुलीयकदानप्रवृत्तिनिवेदनादिभिस्तां विश्वस्य समाश्वास्यच लङ्कां मथित्वा पंचसेनाग्रगान् अक्षकुमारंच परासून् कृत्वा



स्वोपरि प्रयुक्तमपि ब्रह्मास्त्रं पितामहार्थे सोढ्वा यन्त्र्यभियोगानपि मर्षयित्वा शणवल्कलादिबद्धोऽभिकृष्टो बहुळनीतपटैरतिदृढनियन्त्रितवालसमर्पितानलः तद्वालहस्तानलज्वालाभिः लङ्कामखिलां सीतां विना भस्मसात्कृत्य रावणमपि दृष्ट्वा बहुनीतीरपि तस्मा उपदिश्य अनवद्य एव गृहीताभिज्ञानः प्रियमाख्यातुं रामं पुनराययौ । विज्ञापयामासच दृष्टा सीतेति यथायथम् । अथ वानरपृतनापतीश्वरसहितः रामः सरित्पतितीरमासाद्य प्रथमं तमविधेयं शरैः परिक्षोभ्य भीषिततममनुमान्य नलं सेतुं कारयित्वा तेनैव लङ्कां रावणराजधानीं गत्वा रावणमप्याहवे समूलं हत्वा सीतां संप्राप्य परगृहवासापवादभीत्यैवाह्रैषीत् । ततो जनसंसदि ज्वलनप्रविष्टा सा सती पुस्फोर विगतकल्मषैव अनुजगृहेच श्रीरामेण पुनः परिगृहीता सर्वदैवताभिनन्दिता । अतो लङ्काराज्ये विभीषणमभिषिच्य कृतार्थतया भृशममोदिष्ट देवताभ्यश्च लब्धवरः सीतापतिः वानरानुत्थाप्य प्रतस्थेऽयोध्यां पुष्पकारूढः सर्वैरपि सुहृज्जनैः मध्येपदवि भरद्वाजाश्रममवतीर्य विसर्जयामास मारुतिं भरतोपकण्ठं प्रति । वन्दितभरद्वाजः सुग्रीवसहितः पुनःपुनः आख्यायिकां भरतविषयिकां भक्तिबन्धुरां प्रवदन्नेव नन्दिग्रामं भरतस्थानं तेनैव पुष्पकेण समाजगामच । सम्यगनुष्ठितपितृवचनोद्य निरस्तसमस्तव्यसनः श्रीरामभद्रः ।

कदान्वहं समेष्यामि भरतेन महात्मना ।
शत्रुघ्नेनच वीरेण त्वयाच रघुनन्दन ॥ इतिवत्

अधिगतमनोरथः विसर्जितविशोधितजटः विशिष्य स्नातानुलिप्तः महार्हवसनः श्रियाच सीतया ज्वलन् रत्नमयपीठमैक्ष्वाकम् अध्यास्य दिव्यपट्टाभिषेकं जगन्मङ्गलहेतुं समालब्ध । ततो भूरिदक्षिणैः अश्वमेधशतैः इष्ट्वा अनेककोट्ययुतं गवामसंख्येयधनञ्च ब्राह्मणेभ्यो वितीर्य स्वधर्मे चतुरोपि वर्णान् स्थापयित्वा एकादशसहस्रसंवत्सरान् जगतीमिमां ब्रह्मैकपाद्विभूतिभूतां परिपालयामास । भूमाववतीर्णस्य परमात्मनः श्रीरामस्य दुष्कृद्विनाशद्वारा साधुरक्षणमेव प्रधानाशयः । किन्तु कृतपुत्रकामेष्टेः दशरथस्य उदरे जननं तत्कालानुगुणानुषङ्गिकवृत्यवलम्बः । श्रीरामः ताटकां हत्वा स्त्रिया अपि लोकोपद्रवकारिण्या वधो नदोषायेति धर्मं स्फुटं निदर्शयामास । दिव्यमपि

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

शैवधनुः भङ्क्त्वा जनकपुरे स्वपरत्वं प्रदर्शयामास । यथास्वाभिप्रायं ज-
नकाहूतस्वजनकाज्ञानुपालनेन विवाहेऽत्र स्ववीर्यैकसाधिते पित्रभिमतं पु-
त्रकर्तव्यं प्राददर्शत् । सुवासिन्यासह अयोध्यां प्रति प्रस्थानकाले जामद-
ग्न्यदर्पनिर्वापेण परत्वमेवात्मीयं प्रकाशयामास । श्रीरामाभिषेकश्रवणतुष्टा कै-
केय्या कलहकारिण्यै मन्थरायै पारितोषिकमदायि श्लाघाप्यकारीति यत्
व्यनक्त्यस्माकं श्रीरामस्य कौसल्यानिर्विशेषम् सपत्न्योरपि मात्रोः सपुर-
स्कारवृत्तिं । सर्वजनसम्मतम् पितृप्राप्तराज्योऽपि दाशरथिः कैकेयीवचनवा-
गुरापतितम् पितरम् सत्यसन्धीकर्तुं वनमवगाह्य पितृवचनपरिपालनरूपं
प्रथमं धर्ममुपादिदेशास्मभ्यम् । निषादाधिपतौ गुहेऽप्रीयतेति अनेन महा-
कुलप्रसूता अपि प्रभवः अकुलेऽपि धर्मसंपन्ने रज्येरन्निति चकाशे । स्वस्य
अयोध्यानयनाय आगतवन्तं भरतं प्रति भाविराज्यरक्षणौपयिकतया राज-
नीतिशिक्षणमस्माकमधिचकार । मृतं दशरथमुद्दिश्य सलिलदानसपिण्डीकर-
णादिकं दत्वा कृच्छ्रदशायामपि यथाविधि कर्तव्यं पैतृककर्म कार्यमिति द्योत-
यामास । परावरवेदिना जाबालिना राज्याङ्गीकरणमभ्यर्थितोऽपि नास्तिक्य-
वादैः नानुरुध्य तं वैदिकमतमेव स्थापयामास । महदुपदेशोप्यनर्थकोऽशा-
स्त्रीयो निग्राह्य एवेति धर्मम् प्रकटयामास । श्रीरामहतेन विराधे-
न तद्रामपादस्पर्शजनितज्ञानेन स्वपूर्वजन्मोदन्तकथनं द्योतयत्यस्माकं
श्रीरामपरतत्वं । निर्वैरं निखिलराक्षसवधोऽधर्म्य इति रामं स्मारयन्त्याः
सीतायाः प्रत्युत्तरं दत्तवान् श्रीराघवः स्वाश्रितविरोधिन एव स्वविरोधिनः
तन्निरसनमेव स्वधर्मः इति विशेषधर्मं उदाजहार । चतुर्दशसहस्रसंख्याक-
रक्षःप्रधानान् मुहूर्तकालेनैव तृणलवनीतेः उच्छिद्यच प्रलूयावलीलया स्व-
परत्वं व्यानक् । सकृदनुभूतरामपराक्रमोऽपि मारीचस्य सीतापहरणे साहा-
य्यमपेक्षितवते रावणाय श्रीरामस्य अपौरुषेयवैभवकथनात् श्रीरामोऽप्राकृ-
तासाधारणचरित इति व्यक्तं भवति । एवमेव हि कबन्धसमागमे
परत्वं तस्याविरास । श्रमणीसत्कारं प्रतिगृहीतवताऽपि तेन श्रीरामेण
न कुलं केवलं मान्यमपि सुगुणा हृदयं चेति निरधारि ।
अविदितवृत्तान्तेन हनूमता सह स्वसहचरानुजपूर्वकं सम्भाषोपक्रमेण



श्रीरामोऽपरीक्षितेन न कोप्युत्तमः सहसा भाषेतेति न्यायं सूचया-
मास । श्रीरघूद्वहः सख्युः सुग्रीवस्य चतुर्दिशमनीकप्रस्थापनाय जातेपि
किञ्चित् कालातिपातकरणागसि तं चक्षमे । निरपराधमपि वालिनमवधीदिति
प्रामादिको यद्याश्रितानामपराधः सः क्षन्तव्यः एव निरपराधोप्यनाश्रितः न
मन्तव्यः किन्त्वतिक्रमेऽवमन्तव्यः हन्तव्यश्चावश्यकतायामिति धर्मः स्फुट-
मुल्ललास । जटायुषमपि यथाविधि समस्कार्षीदिति निर्विशेषं सर्वभू-
तपश्चात्तापम् अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं ममेति उक्तरीत्या संप्रद-
शयां बभूव । प्रायाध्यासिकाहि तस्यातिवेलं अम्बुधिवेलायां न पराक्रमशून्य-
तया किन्तु भगवच्छासनरूपसर्वशास्त्राणां कल्पादीनां प्रादिदर्शयिषया ।
स काकुत्स्थोयोध्याधिपः वानरपरिवृतः मध्येजलराशि सेतुमचीकरन्नलमिति
तत्परत्वमेव तत्परं व्याख्याति । सुग्रीवादिभिः परमाप्तैः भूरि-
शः अदेशकाले संप्राप्तः साक्षाद्रावणानुजो नग्राह्यो नानुग्राह्यः
इति प्रतिषिद्धोऽपि श्रीरघूद्वहः शरणागताय तस्मै परमकारुणिको
भूत्वा शरणं प्रदाय सकलामपि लङ्काराज्यलक्ष्मीं रावणबाहोः
तत्क्षणमवरोप्य तदंसावलंबिनीं मनसा संकल्प्य हनुमदादिभिः प्राज्ञैः सा-
मुद्रजलैः तमभिषेचयामासेति यत् तस्य रघुकुलमणेः सर्वलोकशरण्यत्वं धी-
राग्रणीशिरोमणित्वं च निरूपयामास । परमाहवे रावणं परिश्रान्तं ज्ञात्वा
श्रान्तोऽसि व्यपेहि त्रायस्व चात्मानं सुदृष्टां कुरु लङ्का यत्तो भव ततोभि-
याहि मां युयुत्सुरासि यदि इत्येतावती मसृणोक्तिररावप्यन्तःपुरद्रुहि
सन्ततं तस्य दशरथात्मजस्य साधारण्यपदव्यतीतमहाकृपालुत्वं धर्मश्रियां
विहारैकतानभूमिं स्पष्टं व्याचष्टेस्माकं निदर्शननयेन । अतिक्रूरवैरिणोऽपि
रावणस्य वधानन्तरं रावणानुजेऽपि विभीषणे तत्संस्कारकरणे तदपचारश-
ङ्कया संकोचति सति भरताग्रजोयं श्रीरामचन्द्रः भरितानुशयो भूत्वा
यद्यंजसा नकर्तासि च चरमाक्रियाः संस्कर्तास्म्यहमेव तं कर्तास्मि च सदु-
चिताः क्रियाः इति सौभ्रात्रमनुदर्शयामासेति यत् तत् सर्वभूतेषु तस्य
सौभ्रात्रं निदर्शयामास । रावणोन्मूलनानन्तरं अशोकवनिकागता सीता
कंचुक्यभिरक्षिता कमनीयवेषधारिणी अखिलजगदीशकान्ताऽसूर्यपश्या

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

समानेयोपनेयाच्च समीपं इति विभीषणाशासने समुल्लसिते सति ततो जनसमक्षं सानीयतामिति यद्वदितं तत् श्रीरामस्यातिगभीरमतिरमणीयमनवद्यं हृद्यं अस्पष्टडम्भं अनधिगतगर्वं मुहुरभिव्यञ्जयति। प्राणकान्तामपि सीतां अकलङ्कां चिरं परगृहवाससमुदितदोषकल्पनशङ्कातो लोकापवादात् बिभ्यत् ज्वलनज्वालावगाहमन्वमन्यतेत्यनेन स्वजनानपि दोषदूषितान् पृथग्जननिर्भेदं अंगुलीमिवोरगक्षतां दण्डनखण्डनाद्युचितप्रतिक्रियाभिरदोषीकृत्य परिगृह्णीतेति धर्मः प्रचकाशे । दारान् भोगान् राज्यं च विहाय अनन्यप्रयोजनं स्वपदाश्रिताय विभीषणाय निरीहाय श्रीराघवसिंहः प्रसभं लङ्काराज्यं चिरजीवितं च प्रादितेत्यनेन अनन्यप्रयोजनतया भगवदाराधनपराणां आनुषंगिकतयैहिकसुखानि सर्वाण्यपि समुत्पद्यन्त इति सूक्ष्मधर्मः प्रकटितो भवति । श्रीजानकीजानिः सहमारुतिः सानुजः निखिलानपि वानरान् सजायान् पुष्पकमारोप्य जगामायोध्यां । प्रपेदेच साम्राज्यपट्टाभिषेकं तैः परिवृतः इत्यनेन विपद्युपकुर्वाणा न संपदि त्याज्या इति धर्मं अस्मानलम्भत् । श्रीसीताकूतानुगुणं मारुतये मुक्तभवाय मुक्तामालां प्राददात् इत्यनेन अनुग्रहीष्यमाणाय भगवदनुग्रहलिप्सुः लक्ष्मीपुरुषकारसंपत्तिं लभेतेति प्रदर्शयामास । श्रीविभीषणाय श्रियःपतिमिक्ष्वाकूपज्ञं पूर्वैरप्यात्मनाप्याराधितां कुलदेवतां प्राददादित्यनेन इतरानपेक्षं भगवदाश्रयणपरायणो जनः भगवदनुग्रहजनितानुषङ्गिकसुखसमनुभूतिकाल एव पारत्रपरमानन्दलाभानुरूपवृत्यापि सममेवानुगृह्येतेति लोकोत्तरधर्मः प्रादर्शि । श्रीरामादयः परमात्मनः चतुर्धाकारा अपि विलक्षणैकपाद्विभूतेर्भुवः अन्तर्दधुः इति जगदतिशयितजगन्मान्यलोकोपकाराणां महात्मनां संस्कारप्रक्रिया तादृश्येवेति नीतिं स्फीतमुपदिशत्यस्माकं । मिथिलायां जनको नाम कोप्यमेयमहिमातिमान्यगण्यसद्धर्मः कोऽपि राजासीत् । तस्य आहिताग्नेः यज्ञक्षेत्रात् सीताकृष्टात् सीतेति काचन निखिलजगन्मान्या उदपद्यत । तां किल सभूजानिः उपादाय तदानपत्यतया तदौरससुतानिर्विशेषं अवर्धयत ।

क्रमशः

## ॥ आवीक्षितचरितम् ॥

[ पूर्वप्रकाशितात्परम् । ]

---

सच सत्वेषु द्रोग्धृषु निसर्गादेव सामर्षः विशेषेण मुनिजनापराधिषु । तथा मान्यया तस्मिन्नर्थे सन्दिष्टश्च सन्दधे धनुषि संवर्तं नाम नागसर्गसमुच्छेदहेतोरस्त्रम् । प्रागेव नागा विदितभाविगतयः सदारापत्याः समेत्य भामिनीमापेदिरे शरणं दीनतराः । सापि स्मृताभयदाना माभैष्टेति तानुक्त्वा प्राह भर्तारम् । "नन्वार्यपुत्र, पुरैव विवाहादभयमासीन्मया दत्तं उरगाणां संप्रतिच स्मारितपुरावृत्ताः शरणं पुनर्मामुपगताः भुजङ्गाः । तदावयोरपृथग्धर्मतां अनुचिन्त्य पुत्रात् त्रातुमर्हत्यार्यपुत्रस्सर्पान्" इति तथोक्तः प्रत्युवाच तामवीक्षित् । "प्रिये, सत्यं तव शरणागता मयैव त्रातव्याः । स्मरन्ति हि 'आत्माहि दारास्सर्वेषां' इति । परं विचिन्त्य मरुत्तं सामर्षं भवत्येषां त्राणे महती नश्चिन्ता । न खलु जगति सकश्चिदस्ति पुमान् । यस्सप्रतिघं तं निवर्तयेन्मरुत्तम् । तथापि यथामति यतिष्ये तन्निवर्तयितुम् । अथ सचेदुल्लंघ्य वचनं अस्माकं निगृह्णीयान्नागान् योद्धव्यमेव मया स्यात् पित्रापि सता सह तेन पुत्रेण । तद्भवतीमपि तन्निवर्तनहेतोराह्वयामि साचिव्यं कर्तुं' इत्युक्त्वा सहैव भामिन्या प्रायादेकरथेन तं देशम् । यत्र समरुक्तस्तिष्ठति सर्पेषु सामर्षः । ततस्तत्र संवर्तमस्त्रं मरुत्तेन समायोजितमिषौ दृष्ट्वा प्राह तं पिता तनुजम् । 'वत्स, शरण मस्मानुपगतास्सर्वे भुजगाः । तन्निवर्तस्व निग्रहादमीषां दीनानां । तथाहि । 'धर्मज्ञसमयः कामं स्वात्मान मुपरुन्ध्यान्नकथञ्चिच्छरणागतं' इति तच्छ्रुत्वा जगाद पितरं मरुत्तः । 'तात नमर्षणीयस्सर्वथैषामविनयः । यदेतैश्शिशवस्तपस्विनां निहता हतमतिभिः । ननु, ब्रह्मघ्नाश्शिशुघ्नाश्च भूत्वा नैते जीवित मर्हन्ति पापाः । तदधुना सर्वानपि सर्पान्निर्दहेयं महास्त्रतेजसा' इति वचः पुत्रस्य पिता समाक्षिप्य पुनरपि प्राह तनयं । यदिमे शरणागता नागाः तदेषामात्मव्ययेनापि मया कर्तव्यं त्राणम् । निषेद्धव्याश्च यथाप्राणमेषा मुपरोद्धारः । तद्विरमास्माद्विहिंसनादहीनां । यदि ते शासन मस्माक मनभिमतं तदा योद्धव्यमेव त्वया पुत्रेण सह मया

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

पित्रापि सता धर्मस्य त्राणहेतोः ।' इति वचस्स पितुश्श्रुत्वा बभाषे पितरं मरुत्तः । राजा खलु जगति विनेतुमसतः परित्रातुञ्च सतः सृष्टस्स्वयम्भुवा । तदधुना मामुभयस्मिन्नपि कर्मणि व्यापृतं नार्हति ततः प्रतिषेद्धुम् । तादृशे च कर्मण्युभयस्मिन् यदि राज्ञः कश्चिदाचरेदुपरोधं तर्हि तमपि विनयेदेव शास्तासौ निर्विचिकित्सं इति राज्ञा मयमेव स्वोधर्मः । तस्मादर्हत्यस्माद्विरतिमवाप्तुं तातः न्याय्ये पथि विचरन्त मर्हति कथंनु मां तातो योद्धुं निषेद्धुं वा ।' इत्येवमुक्त्वा विचकर्षैव मरुत्त स्संहितमिषुं । अथ वीरासुतस्संदधे धनुषि कालास्त्रं संवर्तप्रतिघातहेतोः । एवमनयोः पितापुत्रयोस्सम्मर्दे धर्महेतोरुदिते विचिन्त्य धर्मदृशो धर्मकृच्छ्रमासेदुरुभयोर्मध्यदेशं मुनयः । आहुश्च ते सबहुमानमेतौ समुद्यतशस्त्रावुद्यम्य भुजान् । "ननु धर्महेतोरुभावपि क्षत्रियावास्थितौ यत्नम् ।

त्रातरि धर्मस्य सुते न पिता नसुतश्च तादृशे पितरि ।
अर्हत्यनयं द्रष्टुं प्रत्युत गुणमेव धर्मबहुमानात् ॥

भवद्भ्यां खलु धर्महेतोरशक्यपरित्यागः त्यक्तस्संप्रति पितापुत्रयोस्सतादृशस्स्नेहः । येन जगति स्वात्मानमप्यनादृत्य पिता पुत्रं पुत्रश्च पितरं रिरक्षिषति परीक्षकोपि सन् । तद्युवामनेन धर्मत्राणसमुद्यमेन संप्रत्युपचितवन्तौ महान्तमक्षयं धर्मम् । यः किल वीतरागैः महाव्रतेनापि नशक्यस्सम्यगुपेचतुम् । तदधुना परितुष्टा वयं अवतारयामो विद्याभिः ओषधीभिः विषापहारैश्च विष मेषां बालानाम् । जीवन्तु बालेषु जीवन्तु नाम नागा निरपराधाः । एवं सति भामिन्या अपि निर्व्यूढमेव भवेदभयदानम् । " इत्यनतिक्रमणीयवचसां उभावपि श्रुत्वा वचनमुपसंहृत्य सह संरम्भेण स्वं स्वमस्त्र मवन्देतां तपोधनान् । ननाम स मरुत्तः पितरं । सच परिषस्वजे निजमात्मजम् । अथ सञ्जीवितेषु मुनिभिर्मुनिबालेषु प्राह वीरा सुतमवीक्षितम् । "वत्स, मयैव ते पुत्रः प्रोत्साहितोऽभूदुरगाणा मविनीतानां विनयहेतोः । तन्नार्हसि पुत्र मन्यथा सम्भावयितुम् " इति । आहच भामिनी वीरां "आर्ये, ननु मया तव पुत्रो नागेभ्यः दत्ताभयया समुत्साहितो धर्मरक्षायै । तन्नार्हत्यार्य्या पुत्रमन्यथासम्भावयितुं



इति । ततस्तौ वीरया मुनिभिश्च संयोजितावाशीर्भिरेकं रथमारुह्य सहभामिन्या निज मवापतु र्नगरं । ततस्समतिक्रान्तेषु हायनेषु बहुषु तपोवनमेव जगाम भामिन्या सार्धमवीक्षित् परिणतवयाः । मरुत्तोऽपि संवर्तेन गुरुणा समधिष्ठितानानेकान् ईजेयज्ञान् । यत्र सर्वे सौवर्णाः वेदिप्रभृतयः परिच्छदाः । साक्षादेव विश्वे देवा बभूवुर्यत्र सभासदः । मरुतश्च यत्र द्विजानामासन् परिवेष्टारः । यत्र देवा हविर्भिरिव द्विजास्समतृप्यन्त दक्षिणाभिः तदा किल समृद्धेषु सर्वेषु यियक्षुषु बभूवुरेव मृग्याऋत्विजः ।

एतदवीक्षिच्चरितं पातिव्रत्यानुबंधि भामिन्याः ।
अस्तु सतां संप्रीत्यै चरितैर्हृद्यं मरुत्तस्य ॥

---

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

## SAKUNTALAM—(*Continued*).

The curtain has fallen! what has been all this while? A tale so lovely never was listened to by mortal man. What curious incidents, yet so naturally brought together! why, we take it all as a matter of course and do not think of asking the poet why his story should follow this course rather than that. The least startling of incidents is taken hold of to introduce us into the world of imagination, and hence we are taught to be at ease in the study of the situation. We follow the king Dushyanta with calm participation in the chase. Every minute (I mean every second) we get better and better acquainted with our hero. We see his glowing enthusiasm in the pursuit of the swift antelope, his truly royal pride in his skill at shooting, and we fully sympathise with him, and learn also to admire him. Our vision is greatly extended when the hermits come into the scene. There, when we see the proud royal head bent in reverence to the piety of the forest-dwellers, we conceive a love for our hero, who knows what honor is due to holiness. Henceforth our sympathies are so absolutely enlisted in his favour that it may be aptly said, we lose our individuality in him. Truth duly presented never fails to accomplish its object. Kalidasa knows the spirit of truth, and loves it and can give it us so genuine that it takes us captive at once. The ideal presented is real and effective though the fact related is nought but imaginary.

The very Goddess of Nature presides when the link is forged—the link of which this is the history. *The exquisite and the perfect ever strain to meet.* How softly, yet how rapidly the tie is tied within a second! We are inwardly conscious (but vaguely) of this new element in this poet's world, and yet we question not how it came there. Here are two minds, each irrevocably bound to the other. We have been told (Mathew Arnold) that poetry is truth, And we proceed to observe that Kalidasa is the poet of Truth; for he knows nature, as if its very perfection were embodied in him. Love, that most powerful of the

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

world's forces, the very attribute of God, has here mainfested itself (in however human a degree and even greatly mixed with dust). And love if it is truly such, never empties itself in lectures. It is an active quality which seeks to do work, to unify. And such we see it in the world of Kalidas.

True love is spiritual, a high perfection of the human mind. We never think of attributing love of such a nature to *pamaras* nor do we confound love which is possible in the higher man with the lust of the brute, however universally they may co-exist. The task of such love is to forward the soul on its progress towards the highest unity. And this force is always opposed by the tendency to separateness, the power of matter. This appears in various shapes, in the material necessities of the flesh, in the ignorance that clouds the most perfect mind. Love achieves its end when all the opposition of this adverse element ceases. Such is truth, and so we expect to find it in Kalidas.

The moment the *Mukhasandhi* is at its zenith, we see the matter of fact world coming rudely in to interrupt the holy scene of love's inception. The distracting element first takes the form of a horrid ravage of the fair hermitage by infuriated wild beasts. But True love is immortal. We see it again in all its vigour in the *Pratimukhasandhi*.

The altar of Love burns high. Love seeks to weld and so long as this, its function is delayed, it feels all the tortures of impatience. Love is a moral force as impossible to hold in check as its physical counterpart electricity. Yet duality is imposed by the nature of society. The human mind is so absolutely circumscribed by materialistic limits that two minds, really at one, very rarely succeed in finding it out; and if by the faculty of intuition they do find it out, the accidents of social situations present an impassable barrier. Such intuition did teach the lovers here that they were formed for unity, but they found themselves in this very manner debarred from verifying and fulfilling the truth perceived. What can they do? The woman can but suffer with passive fortitude which does not shield the sufferer from pain, though it precludes all



attempts at a remedy. The man, less restrained, and quite as impatient, goes boldly about and conceals himself in a convenient bush. He verifies his intuition, and for him all difficulties are at an end. He naturally takes the initiative and breaks the ice. One other restraint of social discipline remains and it holds out as bravely as a dying hero, though in a false cause. And when this is overcome, Love finds a momentary triumph.

How often in life have we found ourselves very near achieving the much longed-for ideal and yet the very next moment it had snatched itself away from our grasp, and flown, God knows where?! And so it was here. This complex world presents not a smooth and ready path of progress, so that we are often driven devious, and when we least expect it are led down deep chasms, and up high cliffs, before we verily find the object of our search. The curse of Durvasus came down upon the lovers and all was lost. The happy bond of Love seemed snapped. But it was not so. Even plain reason cannot unseat true love. The misery was endured but it failed to work any mischief in the structure of love.

Meanwhile, time has been working a change in the lovers. There comes in next a resignation, not a giving up of the ideal but a touching self-sacrifice. There appears a calmness in their life. Is their old yearning gone? No, it has only learned patience. And this is highly significant. For it testifies to the high moral elevation of the heroes herein idealised. And when the lost happiness is restored it is received not with the empty effusions of triumphant rapture but in a pious submission to the Almighty that presides over the evolution of all.

Life is an evolution. Evolution is a vast process extending over a wide extent of time. Millions of births, the sages have declared, are not enough to complete the evolution of one man. Evolution is a continuous act of the soul sustained by the essence of all, the divine energy. All that leads towards this high goal is so far divine.

This evolution begins with man in love. Love has a mission to fulfil. It is midway between pure materialism, and

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

spiritual unselfishness. Its task is therefore to set man on the way to the highest ideal. Man always progresses solely because an ideal stands afar off and invites him to itself. Ideals too are progressive for are they not creatures of man's own mind? At each stage of evolution the human mind creates or rather finds for itself a new ideal. The earliest of these ideals is Love. For in love it is seen that man escapes from materialistic environments, and first comes to know the value of a higher part of himself, the mind.

Since it is the earliest of these ideals that works at the evolution of the soul, we should inevitably find it in the beginning very apt to be confounded with lust. But lust is of the flesh, and can never work against the more potent love. It may coexist with love, but it is essentially perishable, and in the end Love alone survives—the force that makes for absolute unselfishness. Kalidas is our authority.

## THE STUDY OF SANSKRIT.

The fact that Sanskrit is the language of the sacred literature of India ought to fill all intelligent Hindus with a sense of the importance of a study of this ancient tongue. There are other considerations, however, which point to the importance of a study of Sanskrit, and it will be my object in the present paper to call attention to some of these.

But first I must say a few words regarding an objection that might be brought against the study of other ancient languages than Sanskrit. It might be urged that the study of any dead language is a barred study, that in the keen struggle for material advancement into which contact with Western civilisation and acquaintance with Western ideals of living have plunged us, the market value of the knowledge of a dead language is at a discount, and that the time and labour devoted to the study of a highly developed and obsolete language might be better utilised in learning modern languages and gaining a knowledge of practical arts and sciences. Such has for a considerable time been the contention of many educationists in Europe, and opinion is somewhat divided on the subject. Yet



I believe that most people are agreed that a knowledge of Greek and Latin, the classical languages of Europe, should find a place, and that no unimportant one, in a scheme of liberal education, and that a study of the humanities refines the mind and develops the æsthetic faculties of man. What is true of Greek and Latin is equally true of Sanskrit. Arts and sciences and modern languages are eminently practical and very useful in the struggle for existence; but we ought to bear in mind that the *summum bonum* of life is not the amassing of wealth, but the perfection of our whole nature, intellectual and spiritual. Any study that prepares the emotional nature in us for a rational appreciation of the true and the beautiful in life should not be set aside as toilsome and useless.

Sanskrit possesses many attractions. In the first place, she has given birth to two modern sciences—the science of language and the science of comparative mythology. The discovery of the affinity that exists among the various languages of the Aryan race is looked upon by Professor Max Muller as one of the greatest discoveries of modern days. The clue thus given by Sanskrit has greatly helped to unravel the past history of man. Similarly a knowledge of the rise and growth of mythological conceptions is due to a study of the Vedas. It is by a study of the Vedas that we see how later Puranic ideas have sprung from the simple nature-worship of the *rishis*, how, for instance, the traversing by the sun (called Vishnu in the Vedas) of earth, air, and the lower regions in one day—alluded to in a well-known Tristub of the *Purushasukta*—has given birth to the Puranic legend of Vishnu's measuring of the three worlds in Vamana form. The legends of Vritrasuravadha and Ahalya's seduction similarly show distinct traces of a Vedic origin. Scholars like Cox and Max Muller have taken up such hints, and, enabled by this means to trace early Greek mythology to a similar source, have sought to construct a science of comparative mythology. Surely a language that has brought into existence two such useful sciences has some claim on our attention.

Secondly, the study of Sanskrit is a source of mental discipline. The mental training furnished by a course of study in Panini, for instance, is little inferior to that acquired by a

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

study of geometry. But it may be contended that our pandits who spend years in the study of Sanskrit are but sorry specimens of humanity,—snail-like beings who cannot divest themselves of their shell of ignorance and superstition. The fault lies in the system and not in the studies. Memory is almost the only faculty the pandits exercise, and it is no wonder that many of them turn out to be what they are. A few classical poems and bits of legends picked up from the Puranas are not likely to broaden one's views, and if under such a course of studies our pandits prove failures, we can hardly lay the blame at the door of the language. And our pandits are not all failures.

Thirdly, the science of archaeology in this country yields many of its most valuable results only to those who know Sanskrit. Indian literature is a fruitful field for the study of ancient history and gives promise of a rich harvest. If the history of ancient India is ever to be written, it must be written chiefly from the coins and inscriptions in which this country abounds. And he who would undertake the work of deciphering these coins and inscriptions must prepare himself by acquiring a knowledge of Sanskrit. Already India has produced a few men who have taken an honourable part in this work, to which it is most fitting that educated Hindus in affluent circumstances should devote some of their spare time.

In spite of the scepticism of the modern scientist there can be no doubt that ancient India made considerable advances in the knowledge of psychical phenomena. In the department of medicine, too, the nineteenth century might learn something from Sanskrit doctors; and I believe that Indian materia medica and surgery as taught by Charaka and Susruta might be profitably studied by Western professors of the healing art.

In logic and philosophy, Sanskrit can hold her own with her Western rivals. In spite of its defects Indian logic has a system of terminology that is almost unequalled for its precision of expression. It may be interesting to note that Mill's theories of connotation and co-existence of attributes are distinctly set forth and are carried out to their utmost logical developments in Kanada's system. Professor Max Muller says: "I should like to see Brahmans themselves take up the gauntlet and defend their logic against European critics......The European style is to them not sufficiently precise. The use of an abstract instead of a concrete term is enough to disgust a Brahman. Besides, he wants to see all results put forward in short and clear language and to have all objections carefully weighed and refuted. Thales or Empedocles may be criticised in the schools with impunity, but Kanada and Gautama may still find champions in India, if not in Europe." With regard to philosophy Spinoza and Berkeley, Kant and Hegel have their counterparts in the Indian schools, where their theories have been worked out with a fulness of detail and rigorousness of logic that are marvels of polemical skill. Indian philosophy has not been wanting in admirers on the continent. Schopenhauer, a great German thinker, said that the Upanishads were the solace of his life and would be his consolation at his death.



In poetry also, Sanskrit possesses works that can take their place by some of the choicest productions of English poets. For charm of diction and richness of imagery, if not in other respects, Kalidasa is not inferior to Shakespeare. Much that is fanciful and wild often finds a place in Indian poetry; yet it will be conceded that Sanskrit poetry contains some of the chastest and most beautiful thoughts that poet's mind has ever conceived.

Thus in logic and philosophy, in poetry and psychical science, Sanskrit literature possesses more than mere archæological interest. The advance made in these several departments of study gives Sanskrit a value and status independent of its hoary antiquity and makes it worthy of the careful attention of those who would study these branches of knowledge.

Fifthly, in our present keen struggle for material advancement we are apt to forget that our life in this world is more or less a preparation for a future and better life, and, as Professor Max Muller points out in his *India, What it can teach us*, it is desirable, that a study of the ancient Hindu writings, which emphasise this point, should now and then remind us of this aspect of life.

I have till now referred to the inducements that Sanskrit holds out to the general reader. I shall next advert to an aspect

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

of the language that is of special interest to the Hindu. A knowledge of Sanskrit is indispensable for an intelligent study of our religious and social institutions, the motives that gave birth to them, and the encrustations that in the course of ages have grown round them and sapped their vitality. Many observances that now obtain among us seem to have no sanction in the earliest laws laid down for our guidance. Many rules once based on the principle of utility have lost sight of the spirit that brought them into existence, and only effete forms now remain to which we cling with all the bigotry that is begotten of ignorance. We make light of the principles to inculcate which myths and legends were called into being, and adhere to the fabulous illustrations with all the tenacity of religious fervour. Even in the Brahmanas and Upanishads we meet with a number of legends, fanciful derivations of words, and inducements in the shape of rewards and punishments known as *Arthavada*, all brought in for the express purpose of illustrating and emphasising certain rules called *Vidhis*. This practice grew to enormous proportions in the Puranas where the principles inculcated have been almost lost sight of in the abundance of legends that has nearly smothered them out of existence. It is needless here to trace the gradual decline of the Indian nation. Reform is urgently needed in many of our social institutions; but with regard to the methods that are being adopted to bring about these reforms there are differences of opinion. Some reformers would proceed on entirely radical lines, ignoring the intense conservatism of the people and their blind veneration for everything of the past. These are not likely to succeed in their efforts; for reform, to be lasting, to grow and bear fruit, must take root in the villages, which are all strongholds of orthodoxy. A few radical measures adopted by an extreme section of reformers in the metropolis and other large towns only serve to weaken the cause of reform by estranging the people and alienating their sympathies. Fortunately for the cause of reform there are, I believe, surer though slower methods. Some of the most urgent reforms would only mean the resuscitation of our ancient practices. At any rate many of them would not be antagonistic to the spirit of our ancient writings.

(*to be continued.*)

## ॥ श्रीराममहिमा ॥

[ पूर्वप्रकाशितात्परम् । ]

सा दिने दिने दिनारंभदलितपद्माभिराभपद्मिनीव पृथुपेशलपुण्यसुषमा कुसुमेषोर्नवनवोदयजननी कोमलगात्री वचसा हसितपिकसुन्दरी मनसा विहितजगदुदया महसातिविधूतमन्मथरमणी मङ्गलमङ्गलाखिलमनोमणिशृङ्खला ववृधे । पुमधिगमसुलभां पुण्यतारुण्यामालोक्य तदनुरूपवरसम्पादनदुस्साधतां मत्वा स्वकुलाराधनप्राप्तं अभेद्यं त्रिपुरारिधनुः यो भङ्क्ता सएव जामाता भवेदिति मत्वा भुवनतलं घोषयामास । तदा कौशिकसमानीतस्सरामानुजो दाशरथिः यथाशुल्कप्रथं तत्प्रभज्य पित्रनुमते तां पर्यणैषीत् । ततः श्रीरामसहधर्मिणी सीता सकलजनमाता गतायोध्यां मानुषभोगान् द्वादश समाः भुञ्जाना भर्त्रभिमता श्वशुरशुश्रूषणपरा जगदीशसुतेन श्रीरामेण लोकावनतत्परा बभूव । ततः सहसा समुदितमत्याहितं श्रीरामविवासनरूपं श्रुत्वा तदनुगमनैकसङ्गतमनाः अग्रतस्ते गमिष्यामि मृद्नन्ती कुशकण्टकान् । इति मनस्विन्येव पूर्वमेव प्रयता भूत्वा तमनुवव्राज वृजिनमन्तरेण । ततस्सा चित्रकूटमधिगता पत्या तत्र विहृत्य हर्म्यइव दण्डकारण्यं गाहमाने सति तस्मिन् लक्ष्मणाग्रजे वैरं विना हिंसा मास्त्विति स्मारयामास । ततः ते क्रमेण पञ्चवटीमध्यवात्सुः । एकदा ततः परं श्रीरामरामानुजविरहितां सीतया केवलं सजनां तां स्थलीं रावणः परमहंसभूमिकः एत्य आतिथेय्यास्तस्याः सकलातिथिसत्कारं भैक्षादिकं जहारच तां तदा हन्त सदुरात्मा हृत्वा च तां वैहायसेन रथेन लङ्कामानिनाय। महार्हालङ्कारादिदानैरनुनिनाय तदनुग्रहणे ततो निर्बद्धाऽपि सा तृणाय मेने तं । भर्त्सितापि तर्जिताऽपि अशोकवनिकायां बहुपरुषराक्षसीभिः तच्छन्दानुवर्तने श्रीरामादन्यं सव्येनापि पदानस्पृशेयं कदाचनेति धिक्चकार । दासोहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः इति परदेवतापरभक्त्युज्वलहनूमन्तमपि सहागमं प्रार्थितवन्तं कलत्रवति

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

सन्देहः त्वय्यपि स्यादसंशयम् । इति स्वरसतो नानुमेने । दशकण्ठकण्टकोन्मूलनानन्तरं लोकापवादभीरोः श्रीराघवर्षभस्य सीतां प्रति वह्निप्रवेशानुमतौ जातायां नजुगुप्सां बभूव सा तदादेशं अनुरुध्य गाढमवागाढ वह्निं तत्र तदुदिता बहिः उद्बभासे । प्रापच परिपूर्णां राज्यश्रियं अयोध्यागतेन पट्टाभिषिक्तेन संराजा श्रीरामविराजासह । एवं जनकनन्दिनी राज्यलक्ष्मीरिव रूपिणी रूपौदार्यगुणैरन-रतकल्याणैः भद्रासनासीनं श्रीरामभद्रमनुविदधती परमपावनीभिः पातिव्रत्याह्लादनित्यानवद्यचन्द्रिकाभिः सर्वजगत्तलं सौम्यालोकं अकार्षीत् । रजकाटिकोदीरितदुर्वार्तां लोकापवादभीरुः श्रीरामचन्द्रो नममर्ष । मुमोचातएव प्रेयसीं तां अन्तर्वत्नीमपि अन्तरात्मावदातामपि अन्यगृहवासापवादद्वषितां तां वनलालसां वनानयनापदेशतो मुमोच कानने मृदुमनोविदारणे मुनिजनैकतोषणे मन्दभाग्यैकशरणे । सा किल असूत तत्र वाल्मीक्याश्रमे कुशलवनामानौ व-गुणभूमानौ विलसितनर्माणौ विदितनृपलक्ष्माणौ। तौतु दिनंदिनं श्रिया समेधमानौ भिया विहीनौ धिया सुपूर्णौ निभृतारोग्यौ निगूढभाग्यौ सर्वश्लाघ्यौ अवर्धिषाताम् । ततः कालेनोचितेन गच्छता तौ वल्मीकभुवा महर्षिणा विहितकर्माणौ अभूताम् । अपीपठच्च तौ श्रीरामचरितमभिरामं भुव्यविरामप्रचारणाय । तावतिविपुलशारीरस्वरसम्पन्नौ अशीर्णपद्यधारणौ अयोध्यां प्रति उदीर्णगमनौ राजभवनमासेदतुः राजानमानन्दयामासतुश्च । अभजेतां च सत्कारं व्यभजेतां च श्रीरामायणामृतं सर्वजनतायै । एवं सति श्रीरामायणमुनिवदनारविन्दनिर्मलप्रशंसासंबोधितमनाः श्रीरामोप्यत्र उन्मनाः तां पुनरपि परिजग्राह यद्यपि लोकप्रवादनिर्वापणाय वह्निमवीविशत् । ततस्सा भूसुता अधुनातनेन कालेन निर्वर्तितसकलानघपत्नीधर्मा प्रदर्शितपातिव्रत्या परिपूर्णकृतप्राणपतिधर्मा लोपितरक्षोधर्मा कृतकृत्या भुवमवजगाहे । सीतोपज्ञमेवास्माकं भूलोकवर्तिनां आहोस्विदन्येषां वा पातिव्रत्यमित्येकः परमोधर्मः सर्वजनोपकारकः लोकानुग्रहपूरकः सकलसौख्यकारकः सम्पदुपायधारकः सङ्कलितचित्तमोदकः दीनजनदैन्यतारकः लोकक्षोभहारकः संकुलसङ्करपरिहारकः दुर्गतिपरिहासकः सकलजनभासको वर्वर्तीति दृढतरं अत्र प्रवक्तुं शक्यते क्षमेतिच वस्त्वपि त-



स्या एवेह विललास । महारण्यपर्यटनशीलं श्रीराममितस्ततोनुरक्तं हार्दमनुव्रजन्त्याः सहमानायाश्चाधिलङ्कं राक्षसीतर्जनशतानि आस्वादयन्त्या वन्याहारमपरिचयेऽपि तत्कालचित्ताराधनचणप्रोत्साहनशतेऽपि विशन्त्या आशुशुक्षाणिं पत्युः पुरश्चाखिलजनानामकलङ्कतायामपि निवसन्त्याअपि चित्रकूटारण्यं राजमहिषींत्वेऽपि पुनरपि दयैव सा सीतारूपेण उदियायेति सुवचं यत् विना वैरं नरौद्रमाचरणीयमिति भर्तारं स्मारयामास यच्च परमव्यथाकारिणीः राक्षसीः अद्यास्मज्जये हन्मीति उद्युञ्जानं श्रीरामदूतं आञ्जनेयं नकश्चिन्नापराध्यतीति निवर्तयामास । एवं हि श्रीरामसीतादिव्यदांपत्येन अस्माकं भूजनुषां निरद्यहृद्यदम्पतिकृत्यं कृषतो नास्ति दुर्भिक्षं इति कृषिकृषीवलकृत्यंचानघं श्रिया विभुर्विष्णुरिवामरेश्वरः इति परमात्मात्मकृत्यं परमंच रामदिवाकरो रक्षोमयं तोयं उपशोषं नयिष्यति पद्भ्यां यान्तु प्लवङ्गमाः यदि वारावणस्वयं इत्यादिभिः वीरदांपत्यञ्च स्फुटनिरूढमूलं वोधितं चाकशीतितमाम् ॥

सर्वं मङ्गलमार्यराममहसे भूमीसुतायै सदा
तद्भक्तेपि जने तदेकशरणे श्रीवेणुगोपायच ।
प्रष्टॄ तच्चरितस्य सारवचसा कर्त्रेच तेषामिह
प्रीत्यै तद्रघुरामदैवतमणेः एतत्प्रलेखायच ॥
नाहं किञ्चन नूतनं व्यरचयं किन्त्वार्यसूक्ते मुहुः
संयोज्य व्यदधामितस्तत इतो नानाप्रकारागिरः ।
सारव्यक्तिविनाभवेऽपि रचने वस्त्वर्हतासारतः
कादम्बं रसमप्यतीव रसिकः संपीय तोतुष्यताम् ॥
श्रीरामं मनसेतवन्तमनिशं यं श्रीनृसिंहाह्वयः
रङ्गेशं वरतट्टवंशलसितः श्रीबालविद्याप्रथम् ।
राजम्मेतिच पाकमार्यविलसच्छ्रीशैलवंशात्मजा
प्रासूताऽपि तदीयवाचि लसति श्रीरामधर्मोदयः ॥

---

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

# ॥ आनन्दवल्लीशतकम् ॥

## देवीस्तुतिः (आनन्दवल्लीति नाम तस्याः)

आनन्दवल्ली वरहाग्रहारे या भक्तवात्सल्यवती चकास्ति ।
सा मेऽस्ति माता च पिता च सैव बन्धुश्च सर्वः कुलदैवतं च ॥ १ ॥

आनन्दवल्यभिधया वरहाग्रहारे या राजते करुणया खिल भक्तमुक्त्यै ।
तामप्रमेयचरितां कलये शरण्यां सर्वेष्टदां कविकुलेड्यमहानुभावां ॥ २ ॥

कल्पभूरुहोपमेयनारिकेलवाटिकाराजमानहेमशृङ्गसङ्गतालयस्थिता ।
आश्रितार्तिभञ्जनैकतानमानसाऽन्वहं भ्राजते ममाशुभौघदारणे पटीयसी ॥३॥

मौक्तिकमालापरिगतकण्ठी सौक्तिकलीलाजितकलकण्ठी ।
धूर्जटिचेतोहरणसमर्था यच्छतु सा मे सरभसमर्थान् ॥ ४ ॥

भारतीश्रीधृतस्वीयहस्ताम्बुजा पार्श्वयोरुल्लसद्धेमभूषान्विता ।
चण्डमुण्डासुरप्राणसंहारिणी संसृतेस्तारिणी सा भवत्वम्बिका ॥ ५ ॥

शशाङ्कमण्डलोल्लसन्मुखाम्बुजां कृपानिधिं ।
मृगाङ्कचूडवल्लभां खगाङ्कसोदरीं भजे ॥ ६ ॥

चम्पककोशाकारसुनासा सम्पदुदारा कोमलकेशी ।
किम्पचमर्त्यप्रेमसमेता लिम्पतु गौरी दिव्यदशा मां ॥ ७ ॥

अयि जननि नितान्तं प्रेमदृष्ट्या सकृन्मां शिशिरय भवदावज्वालदन्दह्यमानं ।
इह खलु तव हानिः कापि नास्ति त्वदीया श्रितजनपरिरक्षादीक्षिता यत् प्रवृत्तिः॥

पार्वणेन्दुरुचिराननशोभे चार्मणाक्षजनदूरपदाब्जे ।
कर्मणामिह निवासगृहं मां शर्मणाशु परितोषय देवि ॥ ९ ॥

सारसासनमुखामरवन्द्ये सारसाक्षि वरसारसयाने ।
सारसम्पदुदयप्रदहस्ते सारसाक्षसहजेऽव सदा माम् ॥ १० ॥

योगिजनचित्तगृहनित्यकृतवासे भोगिजनभक्तिविषयातिगचरित्रे ।
भोगिवरभूषनिजभर्तृहृदये त्वं भोगसुखदानमतिरिन्दुवदनासि ॥ ११ ॥



अनिमिषवारवधूकरसारससुक्तसुरद्रुमपुष्परसा
स्वदनपिचण्डिलभृङ्गरवानुरणन्मणिनूपुरपादयुगा ।
सनकमृकण्डुसुतादिगतापरपुङ्गवसंस्तुतदिव्यगुणा
भवदयिता मम काङ्क्षितसिद्धिमिहातनुतां कुलदैवमुमा ॥१२॥

चण्डमहासुरसिन्धुरसिंही पण्डितमानसखेलनहंसी ।
नन्दिसनन्दनसंनुतपादाऽनन्दलता मामवतु भवानी ॥ १३ ॥

सर्गस्थित्यवसाननिदानं सर्वशरण्याः श्रुतिवेद्या
संसारार्णवमग्नमनुष्योद्धारणकर्मदयोपेता ।
तेजोधिक्कृतसन्मणिदीप्तिः स्वाश्रितवाञ्छितकल्पद्रुः
कुर्यान्द्वङ्कलसिन्दुकलापाऽनन्दलता मे शुभदृष्ट्या ॥१४॥

इन्दूपमानवदनामिन्द्रोपलनीलदिव्यभूषाङ्गीम् ।
चन्द्रकलाधरभार्या मानन्दलतां भजामि शरणैषी ॥ १५ ॥

वाणीकान्तादिमसुमनोगर्हितपदाम्भोरुहयुग्मां
मार्कण्डेयप्रमुखमहामुनिगणसेव्यां लयहीनां ।
नागाधीशाभरणवधूं सुरनरसंत्राद्दतरूपां
गौरीं देवीं श्रितसदयां हृदि कलयामो वयमन्ते ॥ १६ ॥

अरालपक्ष्माक्षियुगां कृशाङ्गीं मरालयानां महनीयशीलां ।
करालशस्त्रासुरकालरात्रिं धरालकांतां कलये मृडानीं ॥ १७ ॥

जलधर किमियं ते मूढता येन देव्याः
कचसमइति मत्वा भ्राजसे व्योममध्ये ।
शशधर न भवानप्यम्बिकायामुखाब्जं
तुलयितुमिह शक्त स्त्वं कलङ्की क्षयी यत् ॥ १८ ॥

महेशचित्तं प्रसभं हरन्तीं मदारुणापाङ्गविवर्तिनेत्रां ।
मदेभकुम्भोपमवृत्तपीनवक्षोजयुग्मां कलये भवानीं ॥ १९ ॥

शङ्करकामिनि किं करवै तव किङ्करता मुपयामि भवा-
तङ्ककलङ्कसुपङ्किलधीरहमङ्कितकुङ्कमफालतटे ।

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

केोपभयङ्करभास्करनन्दनकिङ्करहुङ्कृतिदृष्टिविधौ
सङ्कुचिताकृतिमम्बसुखाकुरु पङ्कजसन्निभहस्ततले ॥ २० ॥
चलदलदलतुल्यतुन्दशोभां कलरणितातुलरत्ननूपुरांघ्रिं ।
वलभिदुपलनीलदिव्यगात्रीं चलदरुणांशुकशोभिनीं भजे तां ॥ २१ ॥
वरार्थदानातिचणस्वपाणिं वस्वोकसारेशसखस्य भार्यां ।
वसिष्ठमुख्यर्षिजनै स्समग्रैर्वन्द्यां सदानन्दलतां भजेतां ॥ २२ ॥
गिरिशमानसतोषणकारिणी हरिशशाङ्कविभावसुवीक्षणा ।
कुलिशपाणिमुखामरवन्दिता कलिशतानि निरस्यतु मे सदा ॥ २३ ॥
आनन्ददायिन्यमराधिपेन नित्यंस्तुते निर्हृतकल्मषौघे ।
आनन्दवल्लि त्व ममेयपापै राबाध्यमानान् परिपालयास्मान् ॥ २४ ॥
प्रमिताक्षरा गिरि गिरीशवधूः शमिताश्रितौघसकलाघततिः ।
यमितासुरेन्द्रकुलगर्वभरा नमितामरेन्द्रवनिताऽवतुमां ॥ २५ ॥
वरसुषमामधुपूरमनोज्ञं सुररमणीनयनालिनिपीतं ।
तवमुखतामरसं गिरिजे मे हृदयतटाकविकासि चकास्तु ॥ २६ ॥
राकाशशांकप्रतिमानवक्त्रां राजीवबंध्वब्जकृशानुनेत्रां ।
राजत्कुसुम्भारुणादिव्यवस्त्रां रम्याकृतिं तां कलये भवानीं ॥ २७ ॥
सारवती करुणा भवतात् माररिपोर्दयिते मयि ते ।
तारकसूदनमातरयेऽपारभवानलतप्ततनौ ॥ २८ ॥
लाक्षारसद्योतितपादपद्मां लावण्यवारान्निधिदिव्यगात्रीं ।
लालाटिकाभावृतसर्वलोकां लास्यागमप्रीतिमुमां प्रपद्ये ॥ २९ ॥
खञ्जनखगसमनयनयुगयुता रञ्जितगिरिशहृदनुगुणहृदया ।
पुञ्जितबुधजनमहितगुणगणा स्वञ्जनयुतदृगभयमिह कुरुतात् ॥ ३० ॥

---

श्रीरामोविजयतेतमां

## ॥ धन्यःबुद्धसंलापः ॥

——:*:——

**धन्यः**—ममान्नं पक्कमास्ते । गावश्च दुग्धाः सन्ति । सह्यापगातटोपकण्ठे सहचरैस्साकं निवसामि । सपटलंच मे गृहम् । समिद्धश्चानलः । तद्द्यौः वृष्यताम् यदीष्यते ॥

**बुद्धः**—क्रोधमुक्तोस्मि आग्रहवर्जितश्च । एकामेव रात्रिं महीतरोपान्तमधिवसामि । मद्गृहन्तु विपटलम् । अनलश्च मम निर्वाणः । तद्द्यौः वृष्यतां यदीष्यते ।

**धन्यः**—नदृश्यन्ते दंशाः यवससमृद्धक्षेत्रेषु चरन्ति धेनवः । सहेरंस्तावर्षधाराः ॥ तद्द्यौः वृष्यतां यदीष्यते ।

**बुद्धः**—किमप्युडुपं मया सनिर्मितमास्ते । तीर्णश्चास्मि प्रवाहमतिक्रम्य पारमयां । उडुपेन नास्ति फलमितः परम् । तद्द्यौः वृष्यतां यदीष्यते ।

**धन्यः**—मम गृहिणी मामनुरुध्यते । नच स्वैरिणी चिरादारभ्य सा मयासह वसन्त्यास्ते । मनोहारिणीच । नतां प्रति दोषलेशमपि श्रृणोमि । तद्द्यौः वृष्यतां यदीष्यते ।

**बुद्धः**—मम मनस्तु मामनुरुद्ध्यते । विषयविमुक्तंच । चिरादारभ्य तत् संवर्धितम् वशीकृतंचास्ति । नाहं पश्यामि मयि दोषलेशमपीतऊर्ध्वं । तद्द्यौः वृष्यतां यदीष्यते ।

**धन्यः**—स्वार्जितेनैव जीवामि । मदपत्यानि मत्परित आसते निरामयानि । नकमपि दोषं श्रृणोमि तेषु तद्द्यौः वृष्यतां यदीष्यते ।

**बुद्धः**—नकस्याऽपि सेवकोस्मि यदृच्छालाभसंतुष्टो जगतीमटामि नकमपि सेवे । तद्द्यौः वृष्यतां यदीष्यते ।

**धन्यः**—ममासते गावश्च वत्साः वत्सगर्भाश्च सुरभयो वत्सागर्भाश्च सन्ति गोराजो गोवृषोऽपि ममास्ते । तद-द्यौः वृष्यतां यदीष्यते ।

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

**बुद्धः**—ममतु न सन्ति गावः वत्साश्च । नचाविहृदयाः सुरभयः वत्सैरपिच वत्साभिः । नचापि मे गोराजो गोवृषः । तद्द्यौः वृष्यतां यदीष्यते ।

**धन्यः**—शङ्कवः सुनिखाताः भवन्ति दुष्कम्पाश्च । योक्त्राणिच मुंजैरचितानि विद्यन्ते । तानि अभिनवानि दृढनिर्मितानिच । नतानि दोग्ध्र्यो भेत्तुं प्रभवन्ति । तद्द्यौः वृष्यतां यदीष्यते ।

**बुद्धः**—गोबृन्दारकवत् बन्धनच्छिदं गलूचीलतामण्डलं बहिरापतन् स्तंभेरमइव पुनरपि जठरं न विशेयं । तद्द्यौः वृष्यतां यदीष्यते ।

तदनन्तरं सहसैव धारासंपाता अन्तरिक्षान्निपेतुः । तेन सागरसागरमेखले संपूर्णे बभूवतुः । अथो आसारसंकुलं आकाशमुदीक्ष्य धन्यो वदति "भोप्रज्ञादृष्टे भगवद्दर्शनादनल्पलाभो लब्धः । शरणं भजामस्त्वां भो महामुने नाथो भव नः । दंपती आवां तव दासौ भवेव । सुगतसन्निधौ यद्यावां पवित्रवृत्ती भवेव जन्ममरणे विजयेवहि तेन दुःखध्वंसं भजेवहि इत्याकलय्य कृषीवलः सदारः भगवन्तं शरणमयासीत् । शरण्यः स भगवान् दीनदयालुः तं परिगृह्य" उपाधिमतामेव दुःखं अत उपाधिर्नस्पृहणीयः इत्युपदिश्य तं सं ररक्ष ॥

---

# ॥ स्वारोचिषचरित्रम् ॥

---

आसीदार्यावर्त्ते पुरमेकं वारुणास्पदन्नाम । भेजे यत् किल प्रतिष्ठान्निकषा वारुणान्नदीं । न्यवसदस्मिन् कोपि द्विजवरः । स खलु नियमाध्ययनगृहीतसाङ्गनिगमो वेदिता तदर्थानां श्रद्दधानस्सुतरां प्रयोक्ता श्रौतकर्मणां प्रशान्तस्तितिक्षुस्सत्यवाग्विनीतस्समयमतिवाहयतिस्म शास्त्रीयैरेव निखिलम् । तस्य च सन्ततसन्तन्यमानगृह्यकर्मणो न बभूव क्षणमात्रमपि सुधावस्थानम् । एकस्तस्य मनसि पर्यवर्त्तत सदैव मनोरथः । पश्येयमहं कदानु विविधानपि देशान् । विशेषेण गिरिवनाश्रमसरस्सरित्प्रभृतीनिति । अथ कदाचिदस्य वैश्वदेवावसरे प्रतिपालयतस्सम्यगतिथीनाजगाम गृहानग्रजन्मा कोऽपि मन्त्रौषधसिद्धः कृत्स्नामपि पर्यटन्वसुधां यदृच्छया । सच तेन सत्कृतः कृताभ्यवहारस्सह गृहपतिना सुखमासाञ्चक्रे कथाः कथयन्विविधदेशाश्रयाः । अथ गृहपतिः पप्रच्छ तम् कुतूहलात् । ब्रह्मन्ननु वयस्ते नातिक्रामति तरुणतां कथं पुनरल्पीयसैव कालेन दृष्टवानसि सर्वामपि सर्वंसहां नविना बहून्वत्सरान् संभावितदर्शनाः सर्वेपि पर्यन्ता विपुला विपुलायाः । अत्र समुत्पन्नमुपपन्नं संशयमर्हस्यपाकर्तुमिति । सच प्राह तमतिथिर्गृहपतिं । सत्यमतिविस्तीर्णा सेयमर्णवांबरा नाल्पेन कालेन शक्यदर्शनाः कतिपयेप्युद्देशा जगत्याः । परन्तु ममास्ति मन्त्रौषधसम्भृतः प्रभावस्तादृशः । यादृशोस्ति योगसिद्धानां । तेनच पूर्वाह्णेन योजनशतं गतस्सन्नपराह्णेन प्रतिनिवर्त्य गृहानुपगन्तुं प्रभवामि इति। सतदाकर्ण्य वचनमतिविस्मितस्तं बहुमन्वानो मनस्येवमकरोत् । अहो महानुभावोयं द्विजवरः । यस्यासावनितरसाधारणी शक्तिर्मन्त्रौषधसंभृता इदानीं चिरान्मे लब्धविषया भविष्यति देशदिदृक्षा। मन्ये मयासावर्थ्यमानो न खलु न संपादयेदर्थितम् । इति विचिन्त्य प्राह तं गृहपतिः ब्रह्मन्मम हि बहोः कालान्मनसि विपरिवर्त्तते सततमेव

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

कौतुकं। भविष्यन्ति कदानु खलु जगत्या विविधाः प्रदेशाः दृशोर्मे गोचरे । येषु नानाश्चर्यदर्शनाश्श्रूयन्ते गिरिवनादयः । तत्रापि विशेषेण तुहिनाचलदिदृक्षाभराक्रान्तं मे मानसं। तत् करोतु मयि तथानुग्रहं भवान् यथा दिनस्यार्द्धेन विलोक्य प्रालेयाचलं प्रतिनिवृत्तस्सायमग्निकार्यहेतोः प्राप्स्याम्यावसथं परिहार्योह्यवहितैराश्रमिभिः क्रियालोपः इति । सतथेति प्रतिजज्ञे सिद्धिबलात् ब्राह्मणः । अपरेद्युरुषसि हुताग्नेः पादयोरस्य चकार सिद्धौषधानुलेपनं । जजापच तस्यासावौषधानुलिप्तञ्चरणतलम् । अथ तत्प्रभावाद्यथासंकल्पमगात्तुहिनगिरेः कमपि रम्यमुद्देशं । सच तत्र रमणीयतरप्रस्रवणशीकरशिशिरानिलडोळायितमञ्जरीर्वनलताः मदवशविविधविहगभृङ्गरवस्पृहणीयान् फलकुसुमपल्लवाकुलितान् अनोकहान् मरालकुलशोभिपुळिना नळिनीः पश्यन्नवितृप्तेन चक्षुषा सञ्चचारतुहिनगिरिप्रदेशेषु । अथ विलीयमानतुहिनसंसर्गधौते चरणानुलेपने सविप्रश्च्युतसिद्धशक्तिस्सञ्चचार मन्थरया निजया गत्या । ततश्च सविलोक्य निजगतिमान्द्यमवाप चिन्तामतीव दुरन्तां । अहो खलु मया नसाध्विदमनुष्ठितम् यदत्र मया विविधदेशदर्शनकौतुकाक्षिप्तहृदयतया विस्मृतचरणानुलेपेन द्रुततुहिनशिलासु विहितः चंक्रमः । कष्टन्निरवशेषं प्रमृष्टस्सिद्धौषधलेपः । यत्प्रभावादतिदवीयस्यपि देशे निविष्टन्नेदीयांसमज्ञासिषमावसथं। कतमेनवा दिग्विभागेन कतरेणवा पथा गन्तव्यो निजदेश इति न विज्ञायते खल्वेतदपि। न भवति हि गोचरे दृशोर्मर्त्यधर्मा कश्चिदपि गिरावस्मिन् यस्य सकाशाज्जानीयां पन्थानं देशस्य दिशंवा । अहो मे ब्राह्मणचापलं । येन नित्यनैमित्तिकानामन्तरायभूते कर्मणामस्मिन्नस्मि प्रवासे निपातितः हन्त संप्रति भगवानपि कर्मसाक्षी पश्चिमामवतरति दिशं नभसः कतिपयघटिकावसानमेव पश्याम्यहमहः परिचरणञ्च सान्ध्यं प्रतिपालयिष्यन्ति नूनं ममावसथ्या वह्नयः । न खलु विहाय वैश्वानरपरिचर्यां क्षणमप्युत्सहे क्वापि मुधाहमवस्थातुं तत् किं करोमि मन्दभाग्यः । मम खलु जीवितादपि प्रियतरमग्निहोत्रमेकमेव । इति बहुविधचिन्ताकुलितमनास्सतत्र सञ्चचार गिरिसानौ ।



अत्रान्तरे निवसन्ती तस्मिन्नेव गिरिवने सुरलोकसुन्दरी वरूथिनी नाम ददर्श तं परमाप्सरा द्विजवरं। विलोकितमात्रश्च सरूपेण वयसा तेजसाच जहार तस्या हृदयं। तमसौ विलोकयन्ती देशे विविक्तरमणीये मनसिजविवशा सविलासं शनैराजगाम तस्य नेदीयांसमुद्देशं । सतु तामद्भुतदर्शनामालोक्य पप्रच्छ सबहुमानं । भद्रे कासि किमर्थमस्मिन् गिरिवने निवसस्येकाकिनी । यद्यहमर्हश्श्रोतुन्तदावेदयितुमर्हति भवती इति। सैवमुक्ता प्रोवाच तमुत्तमाङ्गना महाभाग श्रूयतां सन्तिहि सुरसद्मन्यप्सरसो नाम कन्यकाः । याः किल सुकृतिनामुपभोगहेतोस्सृष्टाः स्वयम्भुवा । तासामन्यतमामवगच्छतु महाभागो वरूथिनीन्नाम । अहमस्मिन्नस्मि गिरिवरे विहितनिवासा रमणीयतया गिरेरस्य न तृप्तास्मि निवासानुवृत्तौ । महाभागं पुनः कथमहमवगच्छामि । केनवा हेतुनात्रोपगतं । न खलु समाजेषु दिविषदां गन्धर्वाणां वा कदाचिदपि दृष्टचरो महाभागः । अभूमिश्च भूमिरेषा मानवानां । अमानवसुलभश्चैषरूपातिशयो महाभागस्य । नैतादृशमाभिरूप्यमृते महाभागात् कुसुमशराद्वान्यत्र सम्भाव्यते पुंसि कुत्रापि । तन्मे विवित्सामपाकरोतु महभाग स्वजन्मचरितकथनेनेति । सतयोदीरितस्सप्रणयया सतामाह वरूथिनीं । भद्रे वयमार्यावर्त्ते निवसामो वारुणास्पदे नगरे विविधदेशदिदृक्षाक्षिप्तहृदयाश्च दिने वयमस्मिन् केनचित् सिद्धेन मन्त्रौषधसंस्तुतचरणाः प्राप्तास्स्मस्सङ्कल्पितमिमन्देशम् । इहच तुहिनद्रवधौतचरणानुलेपा मन्दगतयो निजमावसथमधिजिगमिषवो न जानीमः पन्थानं दिशंवा । सायमग्निपरिचर्यायै त्वरते हृदयन्न स्वगृहानवाप्तुं प्रतीक्षन्ते नः पहिचरणमग्निशरणे यदग्नयः । तदस्मिन्नर्थे भवती नस्साहाय्यमर्हत्याचरितुमिति । वचनमस्य समाकर्ण्य तमाबभाषे चारुभाषिणी । महाभागदर्शनात् प्रभृति भवता परवानयं जनश्शरीरस्य न प्रभवति हृदयस्यच तच्चरणपरिचरणप्रणयिनमनुगृह्णातु जनमिमं परिग्रहेण महाभागः। जानामि सांप्रतमनुकूलं मे दैवं । यन्मे विधातुर्न्निर्माणकौशलमीदृशं गोचरे दृशोः । यद्यपि मुधैव मे समतीता कालमियन्तं तारुण्यदशा । तथापि संप्रत्येवास्मि सुजातानामग्रगण्या सर्वासाञ्च तासामप्सरसां मुधैव क-

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

र्णान्तायते नयने । यासां सुरतरुपरिचरणमेव बहुमन्यमानानां वञ्चितमा-
सीज्जन्म भवद्दर्शनसुखेन । तत् प्रसीदतु महाभागो जनमिमं परिचरणाय स्वी-
कर्त्तुम् । इतिमधुरमाभाषमाणामालोक्य तामाह सपुनर्द्विजवरः । भद्रे नतादृ-
शावयं । सम्भावयति यादृशानस्मान् भवती । त्वमसि यदर्थमर्थितास्माभिः
नतत्रभवतीं पश्यामो वयं व्याप्रियमाणां । ननु प्रसक्तामधिकृत्य क्रियालो-
पनिवृत्तिमर्थिता साहाय्यहेतोरत्रभवती । न ततोन्यदस्ति जगति नः प्रियं
किमपि । यत्तु लोकयोरुभयोर्विरुद्धमभिसन्धत्ते भवती । नतद्युक्तरूपमस्माकं भ-
वत्यावा । तिष्ठतु नाम दूरे लोकद्वयविरोधः । प्रथममिदमेव तावद्विमृशतु भवती ।

न्नात्मन्यपिलुप्तविधिः प्रतिषिद्धरुचिः पुमान् समाश्वसिति ।
सचरेत्सतां समीपे कथन्नुदस्युस्सलोप्त्र इव ॥

इत्युक्वा जोषंभावमास्थिते तस्मिन् पुनरधिकामेव चकार सा स्पृहां ।
अलङ्कारोहि धार्मिकता सौन्दर्यस्य । पुनरपि सा तमाबद्धांजली स्मि-
तार्द्रमुखी प्रोवाच । आर्य यदितावन्नमामङ्गीकरोति भवान् तदा नशक्नोम्ये-
व प्राणितुं । तथाहि मामयमनङ्गः परिभवति भवदाकृतिदर्शनपरवशां । त-
थाच स्प्रक्ष्यत्येव स्त्रीवधसम्भृतमेनस्तत्रभवन्तं । पश्यतु भवानात्मनो ममच
मतयोर्गुणदोषौ । स्वमते किल मदुपरमादधर्मावाप्तिर्जीवितप्रदानभवस्य ध-
र्मस्यानवाप्तिश्च । मन्मतानुष्ठानेत्वधर्मास्पर्शो धर्मोपचयश्च । अपिच क-
र्मभिराम्नायविहितैरग्निहोत्रादिभिर्नाकपृष्ठावाप्तौ यत्सुखन्तदायतते पुनरमरसु-
न्दरीष्वेव । जिह्रेमि नन्वात्मनोगुणान् ख्यापयितुं । अवश्यवक्तव्यतया
वक्ष्यामि तावदिदं । न खलु नाकिनीषु विशिष्यते मत्तोन्या काचिदपि ।
नचास्मात् गिरेर्नाकलोके कोप्यस्ति विशेषः । तदिहैव स्वर्गसुखावाप्तिर्य-
स्य सशरीरस्यैव मन्मतानुवृत्तौ । यदपि निजनिलयावाप्तावानुकूल्यमधिकृत्य
सन्दिष्टाऽस्म्यहमार्येण तत्रापि मामाज्ञानुवर्त्तिनीमवगच्छत्वार्यः । परन्तु कञ्चित्
कालमिहावयोर्भवतु सुखसंवासः । ततः परं भविष्यति यथाभिलषितं । इ-
त्यभिधाय सस्पृहमीक्षाञ्चक्रे तन्मुखममरसुन्दरी । सोपि द्विजवरस्तस्याहृदय-
ग्वगत्य सायमग्निकार्यप्रत्यूहमुद्वीक्ष्य नेदियसीं तां गच्छ दूरादसती इत्यवमेने मे-



नकासखीं । सा तु विषण्णमनाः मनागपि पस्पन्द नतत्सविधात् । रागोहि नाम
यूनामनायसन्निगलं । तेन नियन्त्रिता नपदात् पदमपि प्रभवन्ति चलितुमपि यु-
वानः । अथ समहानुभावः क्रियाहानिमेव प्रसक्तां विचिन्तयन्नाध्यगच्छदिति-
कर्तव्यताम् । ततश्च विविधचिन्तासन्तापितान्तरात्मनश्च तस्य बभूव मनसि स-
ङ्कल्पः अहमुपस्थास्ये भगवन्तं चित्रभानुं यत्प्रसादादासादयेयमनेत्वसादएव नि-
जसदनं इति निश्चित्य गार्हपत्यमस्तावीत्तल्लिङ्गैरेव मन्त्रैः । दध्यौ च तं स्वशरीरे
नाभिरुपरिष्टाद्वितस्तिदेशे हृदयारविन्दकोशे विष्वगार्चिषमात्मतनुमापादत-
लमभिपतन्तं भगवन्तं वैश्वानरं । ततस्तुंतोसौ मन्त्रैरयातयामैःध्यातश्च निर्व्य-
ळीकेन मनसा सन्निदधे शरीरे तस्य सर्वभूतान्तरस्सभगवानुषर्बुधः । अदृ-
श्यत विभावसुना समधिष्ठितमस्य तेजोमयं शरीरं । अपश्यंश्च सर्वभूतानि
ज्वालामालिनन्तमेव वीतिहोत्रं द्विजवरम् । आविष्टश्च सतेन भगवता शक्ति-
मानभवदिष्टमवाप्तुन्देशं । दैवीञ्च शक्तिमात्मन्यनुसन्दधानो जगाम गत्या
दिव्यया मुहूर्त्तेन स्वमावसथम् । सापि गच्छन्तमादृष्टिप्रसरादमुमवलोकयंती
तिरोहितेस्मिन् प्रमुषितेन विमूढहृदया निपपात भुवि जीवितनिरपेक्षा व्यल-
पच्च सोन्मादेव सा बहुविधम् । आर्य ननु भवाननतिक्रान्तसुजनमर्यादोपि
कथमितरवत् भक्तजनन्त्यजति त्यजतुवा भवान् । न कदापि जनोयं त्यक्ष्य-
ति भवच्चरणसंगि रजः । यदेतत् गमनसमये भवदीयमासीद्रूपं । न खलु
तद्विमुञ्चति मे चाक्षुषं सन्निकर्षं । अथवाऽयं कामिजनस्य स्वोभावः यदस-
न्निकृष्टेपि सन्निकृष्टवत्सङ्कल्पः इति । इत्यादीनश्रृणोदस्याः कलिर्नाम विलापान्
गन्धर्वः यः पुरा साभिलाषः एनामन्ववर्त्तत बहुधा । अगृहीतानुनयायाम-
स्यामनिवृत्ताभिलाषएव न्यवसत् गिरौ तस्मिन् । सच तथाविधामवलोक्य
तामाचिन्तयन्मनसि । अहो गरीयानस्याः क्वचित् पुरुषे प्रेमावेशः । मन्ये
तमेवाहं सुजन्मानं यत्कृते ताम्यति मृदितमृणालीलतैरियमङ्गैः । यद्येवं म-
य्यनुरागमाबध्नीयादियम् । स्यादेव सफलं मे जन्म सहैव यौवनेनेति । हन्तै-
षा दृष्टिप्रदानेनापि नाभिनन्दति मामिति । ततः प्रभावादधिकृत्य सर्वमुदन्तं
पुनश्चिन्तितवान् अहो विचित्रमिदन्जगति ॥ श्लो ॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

यां कामये नसा मां कामयते यश्च सा नतां सोपि ।
इति विषमरागहेतुर्वामः कामोस्ति किं कुर्मः ॥
यस्यामनुरक्तमनागणये नतिरस्क्रियान्तया विहिताम् ।
अनुरक्ता सान्यस्मिन्ननादरन्तस्य सत्क्रियां मनुते ॥

तर्कये पुनरिदमेकमात्माभिलषितनिर्वहणे साधनं यदस्याहृदयहरस्य रू-
पमेव प्रभावादास्थाय विलोभयन्नेनामासादयेयमिति । यद्यपि लज्जाकरमन-
र्हञ्चैतदस्मादृशां यदन्यभूमिकाग्रहणं । यदपि च्छलेन विलोभनमस्याः ।
यच्च परानुरक्तायास्सङ्गमेन निवृत्तिर्श्चेति । तथापि नैनामनवाप्य शक्नुया-
मात्मानन्धारयितुमिति निश्चिन्वानस्तस्यैव रूपञ्जग्राह । स्वैरमिव सञ्चचार
च तस्यागोचरे दृशोः । अथ सा दुरादेव तमुद्वीक्ष्य तूलराजिरिव प्रचण्डम-
रुता नुन्ना मदनेन समीपमभ्याययावस्य हंसगामिनी । गच्छन्तीच मनस्येव-
मकरोत् दिष्ट्याऽसौ पुनरपि मे दृष्टिपथमवतीर्णः । कथमयमनुरज्येत मयि
द्विजतरुणः । न खल्वनुनयादृते कमपि पश्याम्यस्य संवननोपायं तन्नेदीय-
सी भूत्वा तावदनुनेष्ये जनमिमं हृदयहरं । अहो कामिजनस्यातृप्तिप्रका-
रः । यदियन्तं समयं तिरोहितस्यास्य दर्शनमात्रे मनो ममासीदुत्सुकं ।
दृष्टेऽस्मिन् संप्रति सल्लापसंस्पर्शादिषु बध्नात्याशामिति विचिन्तयन्त्येव समी-
पगता सा प्राह कपटद्विजं । आर्य अपि स्वागतमत्रभवतः मम सह हृदयेन
दृशावनुयाते सुन्दरं महाभागं । अज्ञासिषमपि नेदं कालमियन्तं यदस्मिन्न-
न्वमनाः । अद्य खलु सचेतनास्मि सन्निधानादार्यस्य तदनुगृण्हातु मामार्यो दृ-
ष्टिप्रदानेनानुरक्तां । अहं खलु कञ्चित् कालमार्यस्य चरणपरिचरणेन कृता
र्था भूत्वा पश्चादार्यस्याभिमतदेशे प्रापणेस्मि कृतनिश्चये सति । सानुनय-
माबद्धाञ्जलिकुड्मळमाभाषमाणान्तामाह सगन्धर्वः । भद्रे यदेतदुद्दिश्य भव-
ती भाषते । तत् किल मे भविष्यति क्रियालोपाय । लुप्तक्रियस्य हि द्वि-
जस्य दूरीभवति श्रेयः । आम्नायाश्च भवन्ति मुधागृहीताः । इत्येकस्मिन्
पक्षे क्षतिर्महति । अपरस्मिंश्च स्वयमनुरक्तान्त्यजतो महानधर्मसमुद्भवः ।



इदमद्य युक्तरूपं कर्तुमित्यत्र मुह्यत्यस्माकं हृदयं तत् भवतीमेव धर्मसङ्कटप्रशम-
नहेतोः पृच्छाम्युपायं । अनुतिष्ठन्तश्च यन्नस्पृशेत् पुनरधर्मः इति इत्यधर्मभीरु-
तामाकारचेष्टादिभिरभिनयन्तं सानुरागं सहर्षञ्च प्राह तं परमाप्सराः । दि-
ष्ट्या मामेव धर्मसंशयस्य निर्णेत्रीम्मन्यते महाभागः । अहमेव छेत्स्यामि
प्रकृतधर्मसंशयं यदिदं क्रियालोपकृतं न्यूनत्वन्नतत् किमपि अनुरक्तायाः
प्राणत्राणजनितस्य पुरतो धर्मस्य । महीयान् खलु देहिनां सन्त्राणजन्मा ध-
र्मसमुदयः । तदयमेव मदुपन्यस्तस्साधीयान् पक्षः । यस्मिन् तादात्विकं सु-
खमायत्याञ्चेति । सतस्या वचसोवसाने प्रोवाच वाचमव्यक्ताम् । किं कुर्मः
क्रियाहानिर्भविष्यत्येव । सोद्वापि तां कार्यमेव प्रणयिन्यास्ते चित्ताराधनमस्मा-
भिः परन्त्वेकेन पुनस्समयेनावयोरस्तु सङ्गतं यत्संश्लेषदशासु नावलोकनी
या वयमत्रभवत्येति । सा तथेत्यभ्युपगम्य रेमे रम्येषु सह तेन गिरिसा-
नुषु । संश्लेषेषु सा निमीलितनयना सस्मार द्विजवरस्य तदेव रूपं । यत्तदा
भगवता समधिष्ठितमासीत्तस्य बृहद्भानुना । अथ समतिक्रान्ते समये द-
धार सा गर्भं । ततस्सोपि गन्धर्वस्तामालोक्य गर्भिणीमनुमान्य तामनुम-
तश्च तया जगामेष्टन्देशं कालेच सा प्रासूत सुतन्तादृशं । यादृश-
मस्मार्षीदाग्नेयन्तस्यरूपं द्विजवरस्य । चक्रुश्च नाम तस्य तत्रत्या महा-
मुनयः । यदस्य सुष्ठु प्रकाशते रोचिस्तदसौ सुरोचिर्नाम्ना भविष्यतीति ।
सोपि ववृधे गिरौ तस्मिन् सुधांशुरिव पूर्वपक्षे । अथ सतत्र वसन् उपनी-
तश्च मुनिभिरध्यैष्ट वेदान् साङ्गान् कृतश्रमश्च धनुषि सतारुण्यमस्पृशत्सुरो-
चिः । कदाचिदसौ विचचार रमणीये गिरितटे शुश्राव च त्रायस्वेति गिरमाम्रे-
डितां बालिकायाः । अनुपदमेव कामपि भयविह्वलामापतन्तीं ददर्श रुचिरां
कन्यां । सा तं प्रसमीक्ष्य रक्ष मां रक्षसा महाभाग निपीड्यमानामनुधावते-
ति प्राह भयविक्लबाक्षरं । तच्छ्रुत्वा सतामाह सुरोचिः । बाले माभैषीः कात्वं
किन्निमित्तञ्च भवतीमनुधावति राक्षसः । ब्रूहि श्रुत्वा प्रतिविधास्यामइति ।
तमाह सा सुभ्रूः । अस्ति महाभाग विद्याधरइन्दीवराक्षो नाम । तस्य म [illegible]
नातु महाभागस्तनयाम्मनोरमान्नाम । अभूताञ्च सख्यौ मे प्राणसमे । तयोरेका

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

विभावरी नाम अपराच कलावती नाम्ना । साहं सहैव ताभ्यामगमं कैलासगिरिं । कश्चिदत्र कृशीयान् दृष्टोस्माभिस्तापसः । तञ्चातिकृशमालोक्य बालिश्यादहसं स्त्रीस्वभावाञ्च । सतु हसन्तीं मामालोक्य क्षुब्धमनाश्शशाप महातपाः । यस्मादवज्ञाय मामसि हसितवती तस्मादपहरिष्यति त्वां राक्षसइति । ततस्सख्यौ मे मुनिन्तमतर्जयतां । प्राहतुश्चेदं ब्रह्मन्नैतत्तपसश्श्रुतस्य वा सदृशं यदेतदमर्षवशंवदत्वन्नाम । अक्षान्त्या हि तपसो महानुपस्थितोव्ययः क्षान्तिरेव हि ब्राह्मण्यं क्रोधसंयमनमेव महत्तरन्तपः तदेवममर्षवशंवदेन भवता तदुभयन्नानुवर्त्तितम् । नूनममर्षेणैव शुष्का ते तनुर्न्नतपसा । इति । तयोर्वचनावसाने शशाप सख्यावपि सरोषात् एका कुष्ठेनापराच क्षयेण भवत्वभिभूतेति । अथ तथैव गदाभिभूते तावद्भूतां मे सख्यौ मामपि महदेतद्रक्षो जिघृक्षु पश्चादनुधावति अस्यच दिनानि त्रीण्यासन् मामनुधावतो रक्षसः नासौ विमुञ्चति पृष्ठं । वनेचास्मिन्नितस्ततोधावन्त्या नक्तन्दिवं नमे कश्चिदपि शरणमशरणायाः । आसीन्मे मातामहश्चित्रायुधो नाम योसावग्रणीर्विद्याधराणां । तेनच सरहस्यस्सर्वोप्यस्त्रग्रामस्समधीतः । तेनच मम पित्रे पुनरमुनापि मह्यमासीदुपदिष्टः । गृण्हातु मत्तस्सर्वमस्त्रग्रामं महाभागः । श्रूयतेच पृष्ठतो भैरवं नदतोस्य रक्षसो नादस्सुमहान् इति । तामत्याकुलं वदन्तीं पर्यवस्थाप्य समुपस्पृश्य सलिलं जग्राह सतस्यास्सकाशादखिलमप्यस्त्रपारायणम् । अत्रान्तरे समुपेत्य ताञ्जगृहे सराक्षसः प्राहच साट्टहासं । एहि मे क्षुधातुरस्य वक्त्रकुहरं । नसोस्ति कश्चिज्जगति । योहि मयोपसृष्टामाहारसमये त्रास्यते त्वां । इति वदन्नेव जग्राह गले तां सराक्षसः । सातु त्रायस्वेति मुहुश्चुक्रोश मनोरमा करुणतरं । सुरोचिरप्यचिन्तयन्मनसि गृह्णातु नामैनामसौ राक्षसः इति । प्राहच साट्टहाहं अस्तु सत्यवचास्समुनिरिति । गृहीतमात्रायामेव तस्यां चण्डास्त्रन्नाम सदृशोर्विन्यस्य ताभ्यामपश्यदेनन्निर्न्निमेषाभ्यां । सपुनर्महास्त्रतेजसा दह्यमानो निपपात सुरोचिषश्चरणयोः । प्रणतेच शाम्यत्वस्त्रमिति मुहुस्त्वरमाणः प्राह सुरोचिः । सहि समुदाचारः क्षत्रस्य यदरेरपि प्रह्वस्य परित्राणन्नाम ।

(क्रमशः)





The early marriage of males, the innumerable sub-divisions in the various castes, the prohibition of inter-marriages in the same caste, of inter-dining, and of sea-voyages, idol worship in its grossest forms, the propitiation of our village imps—all these are the creations of a later and not wiser age. The best way to convince our people of these things is to send into their midst educated men who, by their rational orthodoxy and real knowledge of Sanskrit could inspire people with confidence in their words. These reformers should not go among the people with the weight of their official or social status; for then the villagers would be apt to admit that whatever they might say was right, while cherishing the conviction that whatever they said was wrong. But they must go among the people as one of them, patiently point out to them deviations from the original precepts and give their words time to take root in their minds. Thus only can any permanent reform be effected. One such reformer for every village—his native village by preference—might do in a decade what hundreds of reformers cannot effect in a lifetime by the rash steps they take or by their contributions to newspapers and magazines, which rarely reach down to the masses. And for this purpose we need a number of educated men in our midst, who have drunk deep at the fountain head of Sanskrit.

Again, the religious ceremonies we have to perform and do perform are invariably associated with the recitation of certain texts in Sanskrit. In our daily prayers and periodical *Sradhas* in our marriage rites and funeral ceremonies, we have to go through certain formulæ couched in this unknown tongue. These are meant to be sincere words proceeding from the fulness of the heart of the *Yajamana* or performer. Divorced from sense, they are gibberish to us, and the ceremonies connected with them are unmeaning farces. And yet under a vague sense of something we owe to our society we do go through all this farce. Thrice a day and also on all special occasions we give the lie to our conviction of the futility of such meaningless observances, and, moral cowards that we are, we meekly bend our necks to the yoke which priestly superstition imposes on us. Such things ought not to be. These rites,

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

ill understood by our priestly guides and only tolerated by us out of deference to society, prove interesting when properly understood, and appear to have been based on excellent motives—motives which have met with the warm approval of Christian scholars like Professor Max Muller. Our adherence to these usages for centuries requires that we should at least examine their worth before we dismiss them as the unmeaning relics of a bygone and priest-ridden age.

I have thus adverted to a few facts which point to the desirability of cultivating a knowledge of Sanskrit. But it may be argued that we need not take the trouble of learning a highly complex language while the contents of its literature are accessible to us in translations and publications, which reveal to us all that is worth knowing. No doubt such works are likely to do immense good, and our cordial thanks are due to orientalists for their efforts in these directions; but there are, in my view certain drawbacks in the methods these scholars have employed and in the results they have arrived at, and in remedying these defects, a knowledge of Sanskrit will be of great help.

In the first place, there is a marked tendency in the writings of many Western orientalists to discredit our claims to a very high antiquity. From accounts of the commercial relations between India and Asia Minor alluded to in the Old Testament, and from the data furnished by astronomical references in certain postvedic works they have fixed the date of the entry of the Aryans into India as not earlier than 2000 B. C. This date, though of pretty remote antiquity, does not take us up even to the time of Krishna, from whose death, as the *Vishnu Purana* tells us, is reckoned the commencement of the *Kaliyuga*; and it thus conflicts with all our preconceived notions of Indian antiquity. This is not necessarily a very serious matter. We must be prepared to accept truth even at the expense of a rude shock to our long cherished beliefs. But when conjectures based on insufficient data are brought forward for our acceptance, we shall do well to examine the evidence on which the hypothesis have been framed before we renounce in favour of them all our traditional beliefs. The question of early Hindu



chronology is still a field for hypothesis alone; and yet nothing is more noteworthy than the assurance with which many European scholars accept unsettled dates as settled, or the way in which these doctors differ from one another in their views and theories.

Secondly, Western scholars seem equally inclined to deny any originality to us. If any of our ancient writings contain thoughts that coincide with those of other nations which have also a claim to antiquity then it appears to be a foregone conclusion with some of these *savants* that India must have been the borrower. This tendency is noticeable in the writings of Professor Weber—one of the pioneers in the field of oriental research. The story of Rama's adventures has some points in common with the Iliad of Homer. The *Ramayana* must therefore have been copied from Homer. The two ancient nations that wrote dramas were the Hindus and the Greeks. The Hindus must have got the idea from the Greeks. The *Bhaghavad Gita* has passages and expressions that have, or can be made to have, some striking points of coincidence with a few verses in the New Testament. The inference is that the author of the *Gita* must have been acquainted with the new Testament. Scholars are struck by many points of resemblance in the Greek and the Indian systems of logic and philosophy. The originality must have belonged to the Greeks. A knowledge of the constellations and the first principles of astronomy is found to have existed in various ancient countries such as India, China, and Chaldea. The Indians must have got these things from China, or from Chaldea if not from China. Scholars like Dr. Bühler would say that the very word *Nakshatra* betrays a Chaldean origin.

But when it comes to the question of evidence many of these scholars are often constrained to admit that the evidence available points only to a probability—a euphemistic way of saying that there is no evidence worth the name. Sometimes conjectures are hazarded on the strength of mere possibility. One is almost tempted to say that it seems a point with some of these scholars to accept the legitimacy of any theory that will absolve India of all claims to originality or antiquity. Hindu

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

scholars like Professor R. G. Bhandarkar and the Hon'ble Mr. Justice K. T. Telang—alas! how few such has India to boast of—have sought to combat these opinions with an array of facts and a vigour of logic that are convincing to our uninitiated minds; but Western scholars fail to see any cogency in the arguments advanced. Broad-minded scholars like Professor Max Muller have borne testimony to this unsympathetic attitude in many Western writers. Sturdy champions of the cause of ancient India are few and far between, and it behoves us, the children of the soil, to carry this cause to a successful issue or at any rate to prevent the possibility of an *ex parte* judgment.

Thirdly, Rama and Krishna, Sita and Droupadi—heroes and heroines who have by their noble deeds and utterances attained to an exalted rank in the Hindu pantheon—are resolved by these scholars unto myths and allegories,—unsubstantial creations of a poet's fancy; and the Hindus who have for centuries paid their tribute of adoration and worship at the altars of these divinities now awake to find their labour wasted on aerial nothings.

Fourthly, many of these scholars, brought up as they are n alien faiths and methods of thought, lack that sympathy that is indispensable for a true appreciation of our religious principles and poetic conceptions. Thoughts and conceits that we admire and enjoy seem to them forced and unnatural. Situations that we regard as poetical seem to them the reverse of graceful. Indian music, which throws us into raptures, is to them bedlam let loose. Religious festivities endeared to us by some of the happiest associations of our lives strike them as superstitious practices. No wonder then that many of them fail to catch the spirit of things really good in our ancient writings. Their views of things Indian are thus likely to be one-sided and may not be safely relied on as our sole guides.

Far be it from me, however, to decry the invaluable services of Western orientalists. Sir William Jones and Colebrooke, Wilson and Sir Monier Williams, Weber and Lassen, Roth and Max Muller have done wonderful service to Sanskrit.



For their life-long and almost single-minded devotion to Sanskrit, for the works they have brought to light, and for the light they have shed on obscure periods of ancient India they deserve all praise. Much has been done by the combined and well-directed efforts of learned societies in Europe and India. Periodicals safely devoted to the discussion of oriental subjects are published. Oriental congresses patronized by the sovereigns of Europe are held and the results of patient researches brought together. In India an enlightened Government has instituted a separate department for the deciphering of inscriptions and coins and has made arrangements for the redemption of rare manuscripts from the ravages of white ants. Surely it is time that we too should bestir ourselves and contribute our humble mite for the cause of our sacred literature. Let us disabuse ourselves of the idea that we cannot do much. Sanskrit was once the language of our country. In our everyday talk we use about as many Sanskrit words as vernacular. We have greater facilities than Europeans for a study of Sanskrit. We are better fitted for the task by reason of our inherited aptitude for the language. If Europeans who have never seen the birthplace of Sanskrit, who may have never heard the tongue spoken, can do so much with their second-hand and often imperfect knowledge of the language, it stands to reason that we could turn out some solid work if only we would apply ourselves earnestly to it. Let us also bear in mind that our pandits are so many living encyclopædias, and that they have at their disposal a mass of valuable but undigested materials which need but to be touched with the magic wand of scientific criticism to transmute them into their weight in gold. Let us then gird up our loins and prove ourselves worthy sons of our ancient land.

*Chiristian College, Magazine,—* B. V. KAMESVARA AIYAR.

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

## NEWS AND NOTES.

*The late Dr. Peter Peterson*:—Dr. Peter Peterson after short illness passed away at his residence Rampart Row at Seven O'clock on Monday morning 28th of August. Born in 1847 in the Shetland Islands he received his early education at the High School Edinborough whence he proceeded to the Edinburgh University where he graduated. Gaining a scholarship he continued his studies at Belliol College Oxford, then under the regime of the great Dr. Jovet. There he devoted his attention chiefly to his favorite pursuit, the study of Oriental literature, and was held in considerable repute as a Sanskrit scholar. His career at Oxford was a brilliant one and he graduated a second time taking his Bachelor of Arts Degree at that University as well as at Edinburgh. From Oxford Dr. Peterson proceeded to Bombay and in 1873, accepted an appointment under the Bombay Educational Department as Professor of Oriental Languages at the Elphinstone College. For a brief period too, in 1875—76, Dr. Peterson was at the Deccan College Puna in the capacity of Professor of Oriental Languages. The strong bent of his mind towards Oriental Languages and Literature resulted in a series of books on the Sanskrit Classics of acknowledged accuracy and originality. For this task he was peculiarly qualified as in addition to wide learning he possessed a luminous and tranchent literary style. Amongst the best known of his sanskrit annotations are an Edition of the celebrated fables Hitopadesa, A hand book to the study of the Rig Veda, and a book upon the Hymns of the Rig Veda, whilst he also edited portions of the Ramayana, Bana's Kadambari and other Sanskrit Classics. Dr. Peterson was further constantly employed byGovernment in the search for Sanskrit manuscripts in Guzerat, Kathiawar, and amongst the great Jain collections at Jessalmir, Rajputana. This was a work he carried out *Con amore*, as will be seen from his interesting accounts of his hunts for manuscripts contributed from time to time to the journal of the Bombay branch of the Royal Asiatic Society. Of this Society he was an active member and contributed frequently to its discussions and to its journal. When Mr. H. Birdwood retired in 1895, Dr. Peterson succeeded him as President—a post to which he was eminently fitted as being the most distinguished Sanskrit scholar in Bombay. In 1886 he represented the Bombay Government at the sixth International Oriental Congress which was held at Leyden. As an orientalist of high repute his counsel was naturally sought by the principal European Servants who visited India and to whom he invariably extended his generous hospitality. Dr. Peterson was a man of broad views and wide sympathies. He had a warm regard for the people of the country in which he spent so many busy years and ever betrayed a keen and active interest in the welfare of the students at the College with which he was so intimately associated. Dr. Peterson had recently been nominated for the Sanskrit Professorship lately held by Sir Monier Williams the election for which is to take place in November. The Royal Asiatic Society's Library was closed out of respect to the deceased on Monday—*The Bombay Educational Record.*

---

In his introduction to the vedic mythology Vol. II Alfred Hillibrandt defends and justifies his views with regard to vedic mythology. Briefly he is of opinion that vedic mythology can only be studied in the veda itself and that all attempts to explain by reference to Classical Sanskrit and Pali or to Anthropology must be subordinate to this method. As he points out the origin and development of many of the vedic gods are due to factors of purely local origin and where such is the case the seeking for explanations or analogies from other sources is more than likely to lead one astray. With the methods of those scholars who regard mythology as a "disease of Language" and seek in Etymology a solution of the problems of myth origins, the author has still less sympathy being himself of opinion that Etmology is a poor guide in such matters. Having laid down his principles of investigation the author devotes the following chapters of the Volume to a detailed study of the Ushas, Agni,

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

and Rudra myths and seeks to throw light on some of the more enigmatical traits in the characters of these divinities as conceived by the Veda. His conclusions on some points differ from those arrived at other scholars while the careful and accurate scholarship evinced throughout the work goes far to justify a belief in their soundness—*The Indian Journal of Education.*

A correspondant to The Times tells us that a profound impression was produced in the Oriental Congress by a letter from Professor Max Muller. In pathetic but dignified terms the venerable scholar bade farewell to the Congress on the ground that his illness precluded any hope that he would again take part in its proceedings. He spoke of the approaching completion of the translation of the sacred Books of the East" and presented a copy of that magnificent series to the Congress as a testimony of his good will and of the encouragement and help which he had during many years received from its members. "The Communication," we are told "was received with a deep emotion; for, the amiable personality of Professor Max Muller, the wide range of his scholarship, and his rare combination of genius with learning have given him a unique place among the Orientalists of Europe."

---

Great Britain seems to have been well represented at the Congress. Its general President Count Di Guherratis who under the King of Italy as patron organized the word of the session, is intimately acquainted with India by personal travel and has taken care that Indian interests should be strongly represented in the directing body. The President of Sections include Sir Charles Lyall delegate of the Government of India; Sir William Hunter delegate of the University of Oxford; Sir Raymond West and other distinguished scholars on behalf of the Royal Asiatic Society, Colonel Temple, Mr. Coil Bendall and Mr. Pinchers of the British Museum.

*London Educational Times.*

---

# ॥ स्वारोचिषचरित्रम् ॥

( पूर्वप्रकाशितात्परम् । )

---

निपतिते राक्षसशरीरे प्राप स्वमेव दिव्यं वपुर्गान्धर्वं । ततस्सप्रकृतिमापन्नः प्राह कृताञ्जलिस्सुरोचिषं महात्मन् भवता खलु मोचितोऽस्मि मुनिशापात् नास्ति मे त्वया समः कोप्युपकर्त्ता । अहं किल विद्याधराधिपतेः पुत्रोस्मि मह्लनाभस्य नाम च मे पित्राकृतमिन्दीवराक्षइति । इयञ्च मे तनया मनोरमा नाम । शापवशादवाप्तराक्षसभावस्स्वसुतामेव बिभक्षयिषुरन्वधावं। महता खल्वस्त्रेण समे दग्धो राक्षसभांवः । तदिमामुपकारिणे तनयान्ददामि तुभ्यं भवामि कृतकृत्यश्च । अथ पप्रच्छ सुरोचिरेनं शापप्राप्तिप्रकारं । सोब्रूत तत्प्रक्रियां । अस्ति महातपामुनिर्ब्रह्ममित्रो नाम सकिल कृच्छ्रेप्यायुर्वेदे प्राप निष्ठामनितरसाधारणीम् । तस्माच्च बहवो मुनयस्तञ्जगृहुः । सहि वेदस्त्रयोदशाधिकारश्चतुर्व्युहश्चाष्टधा भिन्नश्च अहमपि तञ्जिघृक्षुरुपसन्नोस्मि महामुनिम् । सच मामवधीरितवान् । यदा बहुवासावर्त्थितोपि नकरोति मयि कृपां तदा महत्यासक्त्या व्यचिन्तयं मनसि । कथंकारमिदमस्मात् चिकित्साशास्त्रमवाप्नुयां । नखल्वभिनन्दति मामयं मुनिवरः भवत्वधीयानेषु मुनिष्वन्तर्हितएव गृह्णीयामस्मादिमां विद्यां अस्तिहि मे विद्याधरस्य विद्या तिरस्करणी नाम इति निश्चित्य तिरोहितः प्रभावादग्रहीषं विद्यामधीयानैस्सह छात्रैः । अथ कतिपयैरेव मासैरधिगते कृत्स्नेपि वेदे बभूव मे सुमहान् हर्षः येन प्राहसमन्तर्हितएव स्फुटतरम् । सतु महामुनिस्समधिगत्य मदीयमुदन्तमाह कुपितः । अहो गन्धर्व विचित्रन्ते जगति चरितं । विद्याहि नाम विविदिषुभिर्गृह्यते कृतपरिचरणैरजिह्मैश्च ।

गुरुपरिचरणैः क्लेशादार्जितमभ्यासपालितं ज्ञानम् ।
शिष्याय ददति गुरवस्तेषु च्छलिनस्तु राक्षसा एव ॥

यस्मादन्तर्हितेन प्रतारयता मामायुर्वेदस्त्वयाभ्यस्तस्तद्भव राक्षसएव नि-

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

घृणः। विद्यापि ते नकल्पेत फलायेति शप्त्वा तूष्णीमासीत्। अथाहमस्य चरणयोर्न्निपत्य व्यज्ञापयं । भगवन्नावज्ञा मे कदाचिदपि भगवति । विद्यालुब्धस्य मम यदिदमन्तर्द्धाय विज्ञानार्जनन्तत् क्षन्तुमर्हति भगवान् । न खलु पुत्रेषु शिष्येषुवा पश्यन्त्यन्तरं गुरवः । तत् प्रसीदतु मे भगवान्निवर्तनाय शापस्येति । स तच्छ्रुत्वा करुणार्द्रमनाः प्राह पुनरपि मां नमे वाचो भविता विसंवादः । परं आसन्नेभ्योदिनेभ्यः स्थास्यति ते राक्षसत्वं । ततो महास्त्रतेजसा दह्यमानन्तदपयास्यति मदनुग्रहात् । ततः परं भवान् प्रतिपत्स्यते प्रकृतिं विद्यापि फलाय कल्पिष्यते तस्य । दास्यति यस्मै तां भवान् । इति वचनावसान एव विस्मृतनिजचरित्रस्सन्नगां पुरुषादतां । इमाञ्च प्रियसुताञ्चिखादिषुरस्मि राक्षसात् भावात् । अहञ्च मोचितश्शापादायुष्मतः । सुताच्च मे परिरक्षितासीत् कल्याणिना । तदिमां सह चिकित्साविद्यया परिगृह्णातु महाभागः । इत्यभिदधति विद्याधरे भयनिमीलितलोचना मनोरमापि उन्मीलितवती विशाले लोचने । उन्मीलितनयनाच्च विकसितनळिनेव कमालिनी ससाध्वसैव व्यलोकयत् पितरम् । प्रत्यभिजानतीच त्यक्तभया प्रहृष्टाच्च प्राह मनागिव लज्जमाना पितरं । तात दिष्ट्यासि मुक्तो राक्षसभावात् दिष्ट्याच राक्षस्यो दंष्ट्रा नममांगेषु मज्जिताः दिष्ट्या मे सावशेषत्वादायुषस्संगतिरासीन्महाभागेन । यदिदमिदानीमधिकृत्य मे पाणिग्रहणमुपन्यस्तन्तातेन तत् किल युक्तं कृतोपकारः प्रत्युपक्रियतइति । युक्ततरञ्च मम जीवितप्रदायिनोस्य परिचरणं यदाहमपश्यम्महाभागं तदैव रमते सहैव मनसा दृष्टिः । व्यलोकयञ्च मयि स्निग्धामस्य दृष्टिम् । तथाच ।

स्निग्धां पुंसो दृष्टिं स्निग्धं स्त्रीवीक्षितं प्रतीच्छतिचेत् ।
सत्यनुरूपत्वे यूनोर्जगति जितं सङ्गतेन खल्वनयोः ॥

किन्तु ममैव कृते सख्यौ शप्ते मुनिना संप्राप्ते रुग्णतां । तयोश्च सत्योर्दुःखितयोः कथमहमेकाकिनी भोक्ष्ये पत्यासह भोगान् । न खलु पुंसामपि चित्तमीदृशे विषये भजेन्निर्घृणताम् । किं पुनरबलायाइत्युक्ते प्राह तां सुरोचिः सुतनु नास्मिन्नर्थे भवत्या भविता सन्तापः । अहमस्मि सख्योरोग-



चिकित्सायाः कर्ता दित्सति खलु मह्यन्तातस्समग्रमायुर्वेदमिति सुरोचिः प्रतिजज्ञे । ततस्तस्याः पाणिमसावग्रहीत्समयेन प्रीतः प्रीतायाः ।

सख्योरपनीतरुजोः प्रियसङ्गजया सहैव निर्वृत्या ।
भूयात्समसमयन्नौ संगो हेतुस्सुखस्येति ॥

ततस्तत्र कञ्चित् कालं जग्राह गन्धर्वादायुर्वेदं । गृहीतविद्ये सुरोचिषि समुपाघ्राय शिरसि सुतामनया जामात्राच समनुज्ञातो जगाम निजनिलयं इन्दीवराक्षः । सुरोचिरपि सह मनोरमया जगाम तमुद्देशम् । यत्र सख्यावतिष्ठतां गदेनाभिभूते । ततो दुःखिते विलोक्य मनोरमा प्राप महत्तरन्दुःखं । प्रकृष्यते हि शारीरादपि मानसन्दुःखम् । ताश्च परस्परं संभूय समानदुःखतां सखीनां दर्शयामासुर्न्निजचरितैस्सुरोचिषः । अथ सुरोचिरगदैरपाहरत्तयोः प्रसक्ते रुजे । अपाकृते तु रोगे पुनर्न्नवीकृततारुण्ये भृशमासेचनकं रूपमवापतुरिमे । ततः प्राह विभावरी सुरोचिषम् । महाभाग महत्तराद्विमोचितास्मि रोगात् भवताखल्वहं । तदात्मानन्दास्यामि परमोपकारिणे तुभ्यम् । सख्याः किल भर्त्ता भर्त्तैव भवति धर्मतः स्वात्मनोपि । मम सर्वसत्वरुतज्ञानमस्ति पितुस्सकाशाल्लब्धं । यत् किल योगिभिः पदानामभिधेयानां प्रत्ययानाञ्च विभागे कृतसंयमैरेव शक्यमवाप्तुम् । तदेव सुशकेन लब्धमुपायेनान्येन मया तदपि गृह्यतां सख्याः प्रियेण । अथ कलावती प्राह तं सखीपतिं । आसीन्मुनिः कुमारब्रह्मजारी पारोनाम। तस्य तपस्यतो रमणीये गिरिवनाश्रमे प्रादुरासीन्मधुमासः । तदा किल पुंस्कोकिलालापमधुरे विकसितमधुमालतीकुसुमनिकरपरिमळपरिभ्रमद्भ्रमरझंकृतिभरिते आजगाम पुंजिकस्थली नाम परमाप्सरास्तस्य सविधं । विचचार सा विद्युल्लतेव दृश्यादृश्या कुसुमापचयापदेशेन । सतां विविक्ते विलोकयन्नुन्मादितोभूत् कामेन । समुत्पन्नाहन्तयोरभवं संगमे। प्रसूयच मामसौ विसृज्य वने निर्घृणा गता लोकममराणां माञ्चानुदिनमात्मनः कलाकान्तिभिराप्यायितवानमृतांशुः । जग्राह च मां बालिकामेव गन्धर्ववरः । सच मे नाम चकार कलावतीति । यदहमाप्यायितास्मि कलाकान्तिभिश्शीतभानोः । क्रमेण मे तनुमस्पृशत्तारुण्यं) तरुणीञ्च मामभ्यर्त्थितवानभ्येत्य पितरं दुर्जयोनाम कोपि दानवः । तञ्च ममा-

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

ननुरूपम्मत्वा अवधीरयति स्म मे तातः कुपितश्च सदानवः पितरम्मे गंधर्वं जघान युधि ममैकशरणभूतं ततो मे दुःखिताया मनस्यभून्महान्निर्वेदः। यदाजन्मनः स्वजनविधुरास्मि मंदपुण्या । संप्रति ममैकशरणभूतस्तातोपि मदर्त्थे तत्याज जीवितं । तन्मे किमशरणाया जीवितेनेति तनुत्यागकृतनिश्चयाम्मामाह भगवती साक्षाद्दाक्षायणी। वत्से मास्म त्वमेवमध्यवस्स्यस्साहसन्तव महानुभावोहि भविष्यति भर्त्ता सुरोचिः । तमासाद्य भर्त्तारमाप्स्यसि मुदमतिमहतीं । तत् भवन्तमेव वृणेहं भर्त्तारं। नखलु भाषितमीश्वर्या भविष्यत्यन्यथा । ननु सुभग साधारणं नस्सखीनां सुखन्दुःखञ्च । सुखैकहेतुनापि खलु पत्या भवितव्यं साधारणेन। विद्या काचिदस्ति मे गौरीप्रसादलब्धा पद्मिनी नाम । यया खल्वावर्जितास्सर्वे निधयस्समाहरन्ति भोग्यजातमाशंसितं । तदिमाम्मे तनुमिमाञ्च विद्यां सहैव गृण्हातु प्रियतमस्सख्याः । श्रुत्वा सतयोर्वचनमीक्षाञ्चक्रे मनोरमाया वदनं । सापि प्राह सुरोचिषं । आर्यपुत्र जन्मनः प्रभृति शरीरं हृदयं जीवितमिति सर्वमविभक्तमासीन्नस्सखीनां । सखलु जीवितेश्वरेपि नियमोनार्हति व्यभिचरितुं । नततोन्यत् स्पृहणीयमस्ति प्रियसखीनां । यदाजननादाविलयमेकत्र सहासिका । यदेकस्मिन्नेव पुंसि समो भावबन्धः । यदप्येकस्मादेव भोगावाप्तिरेकदैव समेति। नूनमस्माभिराराधितस्सम्यगेव विधाता । यदस्माकमीदृशमभिमुखं सुखं ।

अस्माकमेकमनसामेकत्र प्राग्भवे तपोवृत्तं ।
निश्चेतुं खलु शक्यं सर्वासां भोगसाम्यलिङ्गेन ॥

सुरोचिरपि तद्वचनमाकर्ण्य मनस्येवमकरोत् । अहो सुतनोरुपन्यासशुद्धिः । अहो महती सखीप्रीतिः । अद्भुतमस्या मनसो नैर्मल्यं । यदसूयानिधौ सापत्येऽस्याअसूयाविरहः। आश्चर्यतमश्चास्माकं भागधेयपरिणामः। यदुत्तमाङ्गनानामितरेतरमनुरक्तानामनुरागविषयत्वमात्मनः । यदप्यचिन्तितमेव दुर्लभविद्यागम इति । ततस्तयोरपि पाणी जगृहे सहर्षानुरागमभिवीक्षितस्तिर्यङ्मनोरमया । ततस्समासाद्य ताभ्यां विद्याद्वयन्ताभिस्सह बुभुजे दिव्यान् भोगानपि भोगान् । तथाहि । पद्मिनी नाम या खलु विद्या तया



संपादितमासीत् दिव्यास्तरणशय्यासनव्यजनभाजनभोजनपेयभक्ष्यरसायनादयः । प्रासादोपवनवापीसरःप्रभृतयस्स्रग्भूषणवसनगन्धाश्चेति ।

तासु सदृशानुरागस्सोभवदस्मिन् समानुरागास्ताः ।
अनुकूलाश्च परस्परमश्रद्धेयं परन्तु तज्जगताम् ॥

एवमनेकहायनपरिमितं समयं सताभिस्सममवितृप्तएव सिषेवे विषयान् नखलु क्वापि तासांवा तस्यवा प्रतिहतिरासीदीहायाः ॥

नव इव तासां सोभूदासन्नस्यापि तायथा नूत्नाः ।
विषयास्वादस्तेषामभूतपूर्व इव यौवनेन समम् ॥

अथ कदाचिदसौ सह दयिताभिरध्यतिष्ठत्सरसस्सरसस्तीरम् तत्र च विजहार मधुमासकुसुमितमाकन्दमालतीरुचिरे विदलितारविन्दमकरन्दगन्धगन्धवहस्पृहणीये सुखमासाञ्चक्रे सह प्रियाभिस्सुरोचिः । तमालोक्य ताभिस्सह विहरन्तं स्थिता सरसि तस्मिन् जगाद कापि चक्रवाकी हंसीं। धन्योयं युवा। यएषयुवतिभिस्सह समानुरागाभिस्सदृशानुरागो विहरति हरति च भोगिनामन्तःकरणं । एताश्च धन्याः । याः किल परस्परमनुकूलाएव क्रीडन्ति सह कान्तेन रसातिरेकात्। विचित्रोयञ्जीवलोकः। यस्मिन्नसम्भावितमपि सम्भाव्यते क्वचिदधिकरणे । नास्तिहि स्त्रीणां सापत्यादन्यत् सन्तापकारणं। तदेवासान्दृश्यते सुखहेतुतयेति वचनमाक्षिप्य तत् हंसी प्राह चक्रवाकीं । यदेतदस्य धन्यत्वञ्ज्ञानास्यासाञ्च नतत्र दर्शनमवेमि ते साधीयः । आपातरमणीयेन नन्वासाञ्चरितेन त्वमसि विप्रलब्धा । यथाखल्वेकस्यां बहूनामुपहास्यो भवति भावबन्धः । तथैव हि बह्वीनामप्येकस्मिन् प्रवृत्तः प्रेमावेशः । नासामास्मिन् भवितुमर्हति अनुरागस्समतया । नापि भवितव्यमस्य प्रीत्या सर्वासु साधारण्या । अस्तिचाभाणकः लोकोभिन्नरुचिरिति । दाक्षिणाः खलु पुरुषाः विदधत्येकस्यामान्तरं भावम् । अपरस्याञ्च वीक्षणस्मितादिभिरभिनयन्ति रसं । अन्यस्यामपि संस्पर्शनादिना दर्शयन्त्यपेक्षामसतीम्। तदसावपि दक्षिणएव प्रयत्नेन गुरुणा समाराधयति चित्तमासाम् । सदैव सन्निहितानां समक्षमासामस्य प्रत्येकं प्रेमचेष्टिते-

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

ष्वप्रमाद्यतो महता खलु मविन्यमवधानेन। अनवहितेन मनसा विचेष्टमानो न खल्वपराधेन भवेदसंस्पृष्टः । अपिचास्य मानुषजातेः पश्यन्त्योः परयोरेकया सह संश्लेषमनुभवतो धिगनपत्रपतां। धिक्च तस्यास्संश्लिष्टायाः। अनितरसाधारणात् खल्वतृतीयसाक्षिकादेव प्रणयादुदेति संश्लिष्टयोरसातिशयः। अस्यतु साधारणप्रणयत्वे कथमुत्पद्येत रसोत्कर्षः । विचार्यमाणेतु केवलमेतासु विद्याभिः कृतस्य दासस्येव स्वामिषु परिचर्याविडम्बनमेव कामोपचारः । धन्योसौ मे पतिः कलहंसः । यस्यैकस्यामेव मयि प्रीतिरनन्यसाधारणी अहमेवास्मि धन्या । यस्यामे पत्यावसपत्न्याः प्रीतिरसदृशी । न कदाप्यावयोः प्रेमावेशस्य कलामप्यस्यवा पुनरासां वा प्रणयोर्हत्यनुकर्त्तुमिति। श्रुत्वासौ सर्वसत्वरुतवेदी सुरोचिस्तद्वचनं सत्यमेव मेने पुनरवमेनेच स्वगार्हस्थ्यं । अकरोच्चैवं मनसि ।

अनुपाचितग्रासानां वृत्तिन्तात्कालिकीमुपाश्रयतां ।
असदृशसदृशप्रेम्णे दांपत्यायैव पक्षिणां स्पृहये ॥

यदिदं प्रागज्ञासिषमनवद्यं मदीयं गार्हस्थ्यं । तदिदानीं विचार्यमाणं प्रतिभाति लज्जावहमेवेति मन्वानोपि नाकरोद्रागे शैथिल्यं । अथ गते कस्मिंश्चित्समये तस्य कदाचिन्मृगयाञ्चरतो जगाम कश्चिन्मृगो दृशोर्गोचरतां । सच तरुणपीव्नामङ्गानां संहननोपपन्नश्च। तञ्च दर्शनीयं घ्रायंघ्रायमनेकास्समनुसस्रुर्हरिण्यः । प्राह समृगस्साभिलाषमनुवर्त्तमाना हरिणीः । आः किमेवं व्यवसितं भवतीभिरलज्जाभिः ननु नैसर्गिकमाभरणं स्त्रीणां लज्जावत्वं । निर्लज्जमनेकाभिरनुसृतमनुचिन्त्यात्मानं जिह्रेमि स्वात्मनोपि सकाशात् । किमुत परस्मात् । नखल्वहं सुरोचिः । यस्त्रपामपहाय विहरति बह्वीभिस्सह समसमयं । तदलमायासयित्वात्मानं गच्छत दूरात् ।

सरुचिं सुरोचिषान्यं मृगयत मृग्यो मृगन्त्रपाविधुरम् ।
धर्मपरावयमेते केवलमेकत्र बद्धभावास्स्मः ॥

किञ्च बह्वीषु प्रसक्तस्य हि तदावर्जनाय नपर्याप्तः कालः कृत्स्नोपि । क्वनु तस्य धर्माचरणावकाश इति। विलोक्य मृगमवधीरयन्तमात्मानं समेने



पतितमिव सुरोचिः । ततः स्वनिलयमासाद्य निर्वेदकथाः प्रावर्त्तयत्सुरोचिः। तन्तथाविधमालोक्य महिष्यस्संभूय भूयसा समुद्यमेन समुदपादयन्नस्य निर्वेदे निर्वेदं । पुनरपि यथापुरं सरेमे सहताभिर्बहून्वर्षगणान् । अथ प्रासूत मनोरमा तनयं । ततो विभावरी ततः कलावती च । तेषाञ्चकार नामानि क्रमात् सुरोचिः विजयो मेरुनन्दनः प्रभास इति । तेच पित्रा कृतोपनयनाः कृतविद्याश्च भेजिरे निवासहेतोः पित्रोपपादितानि स्थानानि । चक्रुश्च ते तत्र राज्यं। अथ कदाचिन्मृगयामटन् कमपि लक्षीकृत्य वराहं सन्दन्धे धनुषि शरं सुरोचिः । अत्रान्तरे कापि हरिणी पुरस्तादस्य समभिपत्य प्राह तमतिनिर्विण्णाकृतिः । मामुञ्च शरमिममस्मिन् भूदार भूदारे अनेनैव जहि मामनभिमतजीवितामिति। हरिणाङ्गनायास्तस्या वचनमाकर्ण्य पप्रच्छ तां सुरोचिः। हरिणि किन्नु ते कारणं शरीरजिहासायाः । नते शरीरे पश्यामि कामपि रुजां । यत्प्रपुष्टावयवसंहनना विशिष्यसे भृशामितराभ्यो मृगीभ्यः । इति सा पुनः प्राह तं । यस्मिन्नस्मि निकाममहमनुरक्ता सकिल बह्वीष्वितरासु निबद्धानुरागो नाभिनन्दति मां। किमितोप्यस्ति परं निर्वेदनिमित्तं । पश्यतु भवान् ।

अपि सुभगन्न यदि वपुः कल्पेत प्रेयसस्सुखाय दृशोः ।
किन्तेन कथय सुदृशस्सहस्रधा स्फुटतु तद्धि दैवहतमिति ॥

ततस्तामाह विहसन् सुरोचिः कौतुकात् । हरिणि कस्मिन्नासि त्वमनुरक्ता यस्त्वामनभिनन्दन्नन्यास्वासक्तः । अहो तव मानुष्याइव वाक्च व्यवसितञ्च । नखलु जात्यनुसारिणीन्तर्कयामस्त्वां भावभाषादिभिः इति । तेनोक्ते प्राह सा हरिणी । सुभग त्वय्येव ममास्ति सुमहान् भावबन्धः । त्वमेव मां नाभिनन्दसि खल्वन्यासक्तेन मनसा इति । सविस्मितः प्राह तां । कथन्नु मृग्या सह मानुषाणामस्माकं घटेत घटना । यत्सर्वथा स्पृशति नोपपत्तिं विजातीययोः स्त्रीपुंसव्यवहार इति। सा तेनोक्ता पुनरभाषत सुरोचिषं। यदिते सुभग मयि सानुक्रोशं हृदयं । तर्हि केवलं परिष्वजस्व मां । एतावताहं प्राप्स्यामि कृतार्थतां । यदितु नैतावदपि व्यवस्यासि विधातुं ततो

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

जानीहि मां परित्यक्तजीवितामिति । सप्रणयं वदन्तीं हरिणीं को दोषः परिष्वङ्गे मृग्याः । तुष्यतु नामैषा मयि सानुरागेति परिषस्वजे सुरोचिः । स्पृष्टमात्राच साव्यवर्तत दिव्यरूपा तरुणी । तान्तथारमणीयामङ्गनामालोक्य विस्मितश्चानुरक्तश्च सबहुमानं पप्रच्छ सुरोचिः । सुन्दरि का त्वं कथंमृगी सती सञ्जातासि वराङ्गना । कथय वृत्तं सर्वं हरसि मे हृदयं सौन्दर्येण भावबन्धेनचेति । सा तस्य वचस्समाकर्ण्य सबहुमानं प्रोवाच । मञ्जुभाषिणि अहं किल देवतास्मि वनस्यास्य सर्वस्य । अहमस्मि देवैरभ्यर्थिता । त्वमस्य देवि सुरोचिषस्सकाशात् अवाप्तुमर्हसि तनयं । यस्सर्वामपि पालयिष्यति महीं अनेकैः क्रतुभिस्तर्पयिष्यति देवान् । सच परित्राता साधूनां विनेताचाविनीतानां स्थापयिताच भविष्यति धर्मस्येति । तदस्मि त्वामुपगतेति । सतच्छ्रुत्वा हर्षमधिकं लेभे । सतयासह विजहार विपिनलतानिकुञ्जेषु कञ्चित् कालं सुरोचिः ।

सुरकार्ये यतमाना सुरोचिषं प्राप्य सा भृशं मुदिता ।
कार्ये सतां प्रवृत्तिः स्वात्मनएवेति निश्चिकाय हृदि ॥

अथ सा प्रासूत सुतमप्रतिमं । तदा किल दिव्यान्यद्भुतानिच माङ्गळिकानि प्रादुरासन्निमित्तानि । वपुरनुकूलास्सुरभयश्च मरुतः । पपात दिवः कुसुमासारः । वारिदाश्च भेरीमृदङ्गादिकमनुचक्रुरातोद्यं स्तनितैः । अथ तस्य पिता नाम चकार द्युतिमानित्यन्वर्थं जगुश्च मुनयस्सुरोचिरपत्यतया स्वारोचिष इति संज्ञान्तरञ्च । सच गृहीताखिलविद्यस्सुराणां स्पृहणीयचरितः प्राप जगति जगतीपतितां । एवं सति सन्तानेन राजन्वति भूवलये सकदाचित्सुरोचिस्सह कान्ताभिर्विजहार काननेषु तीरेषु च सरसां । तत्र क्वचन विहरन् राजहंसः प्रियां प्राह राजहंसीं । अयि कियन्तं कालं भोगाशापिशाची त्वान्नाटयिष्यति । अलमतः परं भोगाभिलाषैः । एषसंह्रियतामात्मा विषयास्वादात् । संप्रति निवृत्तं मे हृदयं विषयरसात् । नाहं सुरोचिरिव निनीषामि सर्वमायुरिन्द्रियप्रीत्यैव । नन्ववस्थानुगुणान्येव तानि तानि निमित्तानि सुखानां भवन्ति भविनां । तथाहि शैशवे पांसुलोष्टप्रभृतयस्सुखयान्ति



तोकान् । तारुण्ये पुनस्स्रक्चन्दनवनितादयः । स्थविरानपि विषयविरतिसाधुसंगादयः । तएव खलु धीराः । ये पुनस्सत्सु विषयेषु सत्याञ्च भोगशक्तावुदासते पुरुषाः । यदेतदपगतभोगशक्तिभिस्त्यज्यन्ते भोगाइति । तद्धि विडंबनमेव । यतस्त्यज्यन्ते तएव भोगैः । तदितः परं परिहृतभोगस्सन्नार्जयिष्ये पारलौकिकं किमपि धनमिति । ततस्सा तं प्राह हंसी ॥ कोनाम नाथ जगति भोगस्यासमयः । ननु जगति सारं शरीरिणां भोगएव । असांप्रतं खल्विन्द्रियाय वा विषयाय वा सत्यां शक्तावभोगादपराद्धुं । स्वभाववादेच तेषामिन्द्रियाणां विषयाणाञ्च परस्परमनुबन्धो भवति स्वाभाविकः । स्वभावोहीन्द्रियगोचरीभावो विषयाणां विषयग्रहणञ्चेन्द्रियाणां । नखलु तेषामनुबन्धादृते भोगोनामान्यः कश्चिदस्ति । एवं सति नैसर्गिकं भोगं कोनाम शक्नुयात् परिहर्तुं । यदप्याहितशक्तयश्शक्त्यपगमेपि रसायनादिभिरुपभुञ्जते विषयान् । तदप्यावश्यकतां ज्ञापयति विषयोपभोगस्य ॥ तथाच ।

कोनाम सोस्ति लोके भोक्तुं यो नाभिलषति विषयरसान् ।
अपि सन्त्यजतां भोगान् समधिकभोगेच्छया हि सत्यागः ॥

किंच । घटमानस्सुखसिद्ध्यै गणयति नो नान्तरीयकन्दुःखं ।
हन्त ! महिमा सुखानान्दुःखानि यदीहयासुखायन्ते ॥

कर्मवादेपि कर्मणां फलोन्नेयानां सिद्धिरेव । यदा भोगेष्वायतते निश्चिनुमएव साम्राज्यं तदा भोगानां । अपिच कर्मणान्निमित्तनैमित्तिकभावेन प्रवहतामसंभावितएव वितर्क्यते विच्छेदः । यत्सति निमित्ते नैमित्तिकानुदयइति नशक्यमुद्भावयितुं । अविच्छेदश्च तेषामनुमापयति भोगाविच्छेदं । यदपि प्रसंख्यानादात्यन्तिको विलयः कर्मणामिति तदप्यनुभवप्रतिक्षिप्तं । यतो विद्वांसो नदृष्टाः खल्वभोक्तारः । भोगश्च नविना कर्माणीति तेषामपि सद्भावएव नन्वस्तिकर्मणां । प्रसंख्यानेन भवन्ति दग्धानि सर्वकर्माणि । शिष्यते परमेकं भोक्तुं विदुषः प्रारब्धमिति । तथासत्यविदुषोपि प्रारब्धमात्रपरिशेषवादे कः प्रतीकारः । किंच यदि भोगदर्शनाद्विदुषामस्ति तत्प्रसवोपयोगिकर्म सर्वमेव खल्वतिरिक्तं प्रसंख्यानाग्निः करोति भस्मसा-

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

दिति तदेतदसाक्षिकमश्रद्धेयमेव। तथाच प्रारब्धकर्म दग्धुं ज्ञानमशक्तन्ततोन्यकर्माणि कथमिव दहेत् अदृष्टं कल्प्यं यद्दृष्टमनुरुद्धय । यदि पुनरिहैव जन्मनि विदुषान्नभवेत् फलानुभवस्तदा पश्चादपि देहभेदात् सनभवेदिति शक्यमाश्वसितुं । येन हि ज्ञानेन निवर्त्तिष्यते कर्म। तदेव विदुषान्नशक्नोति कुतो भोगेन सह कर्म प्रतिबन्धुं । आम्नायस्य क्रियार्त्थतया क्रियायाश्च भोगमनुत्पाद्य विलयासंभवादपि निश्चिनुमो भोगमाम्नायवदेवोपादेयं । किंच । अनादावस्मिन् संसारे नोत्प्रेक्ष्यते कश्चिदप्यकर्ता भूत्वा पुनरपि कर्मणां कर्त्तेति । तथासति भवेत् कर्तृताया नन्वाकस्मिकता । अनादितायाञ्च कर्मस्रोतसां कर्म स्वाभाविकमेव। कर्मात्मनां तत्फलञ्च भोगस्स्वाभाविकएव । नखलु स्वभावस्सहस्रेणापि साधनानां शक्योन्यथाकर्तुं । तथाच ।

जन्तुरनादेः कालात् कर्ता भोक्ता च तर्क्यते लिंगैः ।
भावी तथैव पश्चान्नस्वोभावो मनाग्विपर्य्येति ॥

किंच । यदेतत्सुखं यदपि दुःखमिति । तच्च तच्चानुभूयमानमुत्पादयति मनसि रागमुत्कटं पुनर्द्वेषं वा । तौ च रागद्वेषौ सुखदुःखयोस्तत्साधनयोश्च संप्राप्य समुदाचरणमुदारौ भवतः । क्लेशान्तरेण विच्छिद्येते वा । नकदाचिदप्यप्रसूय संस्कारमाप्नुतो विरतिम् । एवं रागद्वेषसंस्कारवशात् क्षुभितान्तःकरणः चेष्टते मनसा वाचा कर्मणा वा पुमान् । तथाच तया चेष्टया निग्रहानुग्रहरूपया प्राप्नुतो धर्माधर्मावुदयं । ताभ्याञ्च सुखदुःखे ततश्च रागद्वेषावित्यश्रान्तमेतत्संसृतिचक्रापरिवर्त्तनम् । ततोपि न भोगस्य विरतिरिति । ईश्वरवादेपि यदेतदीश्वरस्सर्वेषां शरीरादिकं सृजतीति तत् कस्य हेतोः । कर्मात्मनां भोगापवर्गहेतोः ईश्वरस्सृजति शरीरादिकमिति पक्षोपि नालम्बते विचारचारुतां । तत्रच निमित्तगवेषणेन कारुण्यादन्यत् निमित्तं भगवतः । कारुण्येन प्रवर्त्तमानस्स्रष्टावसम्भिन्नमेव जनयेद्दुःखेन जगत् दृश्यतेच विश्वन्दुःखप्रचुरं । किञ्च यदि कश्चिदस्ति जगतः कर्त्ता सच सर्ववित् सर्वशक्तिरिति । न खलु वयं जानीमस्तादृशं कमपि। नहि सर्वज्ञस्सर्वशक्तिरहमस्मीति तस्यैव वचनं युज्यते



प्रमाणीकर्तुं । यदश्रद्धेयार्त्थानि भवन्ति वचनान्यात्मोत्कर्षवादिनां । नापि कश्चिदीदृशं पुरुषं साक्षात्कुर्वन्नस्माभिर्दृष्टः । नह्यनध्यक्षितसर्वज्ञानादिधर्मा कश्चिद्धर्मिमात्रसाक्षात्कारेण भवितुमर्हति सर्वज्ञानादिमतस्साक्षात् कर्त्ता । तदवश्यं पश्यन्नेव ज्ञानशक्ती सह धर्मिणा भजत्यस्य द्रष्टेति व्यपदेशं। न तस्यापि स्वज्ञानादेरुपदेशे भवति विस्रम्भः। अकृत्स्नविदातु कृत्स्नविदो न कथमपि प्रत्यायनमुपपन्नं। मानाम तादृशः पुमानस्तु कश्चिदपि सर्वज्ञस्य साक्षात्कर्त्ता। आम्नायाः पुनरपौरुषेयास्तादृशे पुंसि भवेयुरेव मानं न खलु पुरुषदोषाः केपि तत्र सम्भवेयुरिति वाक्यन्नाम विना वक्तारन्न कथञ्चिदपि प्रभवत्युदेतुं। यद्यनपेक्ष्य प्रयोक्तारं वाक्यन्नाम किमपि सम्भावितं स्यात् । स्यादेव तर्हि विनैव प्रमाणमस्तु कस्यचित्सार्वज्ञ्यं । प्रमेयं हि सार्वज्ञं तच्च प्रमाणमपेक्षतएवेति निरूपणे रचनात्मकं पञ्चवाक्यं रचयितारमपेक्षतएवेति कुतो न निरूप्यते। यदपि शाखाभेदाः पुरुषनामभिर्विशेषिता इति तत् कस्य हेतोः । प्रवक्तारएवोपलक्षयन्ति शाखाभेदानिति । नास्मिन्नपि भवितुमर्हति विस्रम्भः परीक्षकाणां यतः पूर्वं प्रवक्तृपुरुषोदयात् प्रसज्येत तेषान्निरभिधानता । न खल्वनभिधानाः केपि दृष्टाः प्रबन्धाः । किञ्च वाक्यानि जगत्युत्पद्य विलीयन्त इति सार्वजनीनमिदं । एवं सत्याम्नायाश्शाश्वतिका इति व्यवस्थां को नाम श्रद्दध्यादाभिमानिकीम् । कथंकारमाम्नायानामभिप्रैति कश्चिन्नित्यताम् । यदि ततएव तस्य नित्यतामभिसंदध्यात् काममितरेषामप्यागमेषु तथोपदेशादेव भावयेन्नित्यताम् । अथ यदेतदुपबृंहणं ततएव नित्यतामाम्नायानामभिसन्धत्ते पुरुषः । यत्तत्र प्रतिपाद्यन्ते निगमा नित्याइति । उपबृंहणन्नाम तदर्थप्रकाशकं वचनम् । तच्च ततः प्राचीनतामेव निगमस्य प्रत्याययति। न कथमपि नित्यतां। मूलमूलिभावोहि ज्ञापयति तमेवार्थं । विदधति च श्रुतयः पुत्रेष्ट्यादीन् पुत्रादिफलान् व्यभिचरन्ति पुनः सम्यगनुष्ठिता अपि पुत्रेष्टिप्रभृतयः प्रायशः फलम् । व्याहतमपि क्वचित् क्वचित् श्रूयते श्रौतं वचनं पुनरुक्तञ्च चरितानि पुनस्सुरासुरमुनिप्रभृतीनामाख्यायिकात्मना श्रूयमाणान्याम्नायानामनादित्वमपसारयन्ति दूरात् । यद-

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

पि पक्षान्तरमाम्नायानामीश्वरएव कविरासीदिति तदप्यनुपपत्तिस्पर्शसंदूषितं । यतो योगो ज्ञानं तथा सांख्यं विद्याश्शिल्पादिकर्मचेति शिल्पादीनां वेदानाञ्च सति समाने कर्त्तरि विशिष्यन्ते हेतुना केन वेदाः । इदमपि नालम्बते विचारचारुताम् । यदेष पुरुषकारो नाम सतमनुगृह्णाति भगवानीश्वरइति । तत्र किमीश्वरस्सर्वानप्यनुगृह्णाति पुंयत्नान् नदृष्टोहि सर्वेषां फलेनाविनाभावः । येच तत्र व्यभिचरन्ति फलं तैर्भवितव्यमीश्वरानुग्रहविधुरैः । फलिनान्तु तदनुग्रहावश्यंभावइति सत्सु समानेषु पुरुषकारेषु कतिपयानेव भगवाननुगृह्णाति नेतरानिति कोनामात्र विशेषको हेतुः । यदेतत् पुरुषकारफलं तत्र प्राचीनमपेक्षमाणः कर्म करोति पुरुषकारानुग्रहमिति पक्षोपि नेदीयानेव कर्मैककारणवादस्य । यत् प्राचीनमेव कर्म शक्नुयात् फलं प्रसोतुं किमत्र कर्तव्यमीश्वरेण । अतीतमपेक्षते पुंयत्नं पुरुषकारस्सांप्रतिकः तत्रापि किमीश्वराभ्युपगमक्लेशेन । किंच नकिंचिदप्यपेक्षमाणश्चेदसौ फलमुत्पादयेत् संभाव्येत तदास्य निरंकुशमैश्वर्यं । तथात्वेच तस्य वैषम्यादिस्पर्शदोषः । सर्गादौच सर्वेषां शरीरादिकं साम्येन विदधानस्सन्नुदास्ते भगवान् प्रथमप्रवृत्तौ तदात्वेच स्वतन्त्राएव प्रवर्त्तन्तेतरां भूतात्मान इति स्वतन्त्रसमुद्यमसूतमनुसरन् दिष्टद्वितीयादिप्रवृत्तीरुपजनयतीश्वरः । नातः प्रसक्तिर्विषमतादेरिति । नैतद्युक्तं । यत्समानाः पुरुषाः विषमासु प्रवृत्तिषु कथंकारमवतरेयुः । नहि तत्र विषमतायाः किमपि शक्यमुपपादकं वर्णयितुं । प्राचीनश्चेत् संस्कारस्तदुपपादकस्तदा किमीश्वरेण । किंवा तस्य प्रथमप्रवृत्तावुपेक्षावर्णनप्रयासेन । प्राचीनकर्मस्थाने हि तादृशसंस्क्रियाभ्युपगमः । विचित्राश्च ते संस्काराः तैश्च प्रवृत्तिषु विचित्रासु सूयमानासु द्वितीयादिप्रवृत्तिष्विव शक्यमेव भगवता कारणत्वेनावस्थातुं । यदि नाम क्वचिदीश्वरस्येव जीवस्यापि स्वातन्त्र्यं कामं सएव भवतु सर्वत्र स्वतन्त्रः । किंच यदि कारणमेव सर्वेषु कार्येषु ब्रूयुरीश्वरं कर्मणामपि सएव क्षेत्रज्ञानां हेतुरिति वैषम्यादिना कथं न संस्पर्शः । तथाच । यदि कर्मानादित्वं कर्मणि कर्मैव हेतुरितिरीत्या तत्रापि कारणमसौ सर्वस्यादिर्यतो भगवान् ।

(क्रमशः)

# ॥ आनन्दवल्लीशतकम् ॥

( पूर्वप्रकाशितात्परम् । )

श्रेयो दद्यान्नित्यं मह्यं मेनापुत्री शर्वाणी
कौसुंभाङ्कं वस्त्रं दिव्यं बिभ्रद्रम्यालङ्कारैः ।
लीलाखेलं मन्दस्मेरं प्रेम्णा भक्तान् पश्यन्ती
दत्ते यैवाभीष्टं सर्वं भूदेवानामद्यापि ॥ ३१ ॥
श्रितजनाभयदानविचक्षणा श्रुतिशतोपनिषद्गतवैभवा ।
हतखलाशयसैरिभदानवा दिशतु मङ्गलमीशकृशोदरी ॥ ३२ ॥
अलिकतटलसदरुणनयनचलदग्नि
स्फुरणहुतकुसुमशरपुरदहनभार्या ।
मुरमथननलिनभवविबुधपतिमुख्या
मरविनुतनिजचरिततिरवतु देवी ॥ ३३ ॥
हंसीयाना मीनाक्षी भक्ताभीष्टं कुर्वाणा ।
बिम्बोष्ठी सा कैलासाहार्यावासा रक्षेन्मां ॥ ३४ ॥
वराहपुरवासिनी विनमदीप्सितापादिनी
वराभरणधारिणी विबुधराजसन्तोषिणी ।
विशिष्टजनपोषिणी विविधमाल्यसंशोभिनी
विधातृलिपिमार्जनी विजयतां गिरेर्नन्दिनी ॥ ३५ ॥
त्रिपुरमथनजाये फुल्लबन्धूककाये शमितदनुजमाये ध्वस्तसर्वान्तराये ।
भवजलनिधितोये मग्नमार्येऽप्रमेये शमितमहदपाये देवि मामुद्धराये ॥ ३६ ॥
अत्र देवि करुणा निधीयतां पुत्रवन्मयि जडान्तरात्मनि ।
यत्र कुत्र चलतोपि दीयतामम्ब भक्तिरचला मम त्वयि ॥ ३७ ॥
गिरिवरात्मजा गिरिशकामिनी करिमुखार्भका हरिहयेडिता ।
गिरि वसेत् सदा धुरि च मे मुदा जरिहरीत्वयं चरिकरीतु शं ॥ ३८ ॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

गिरिजा गिरि मे गिरिशाङ्कगता हरिणीनयना करिणीगमना ।
धरणीनिलया तरुणीविधया शरणं भवतात् भवतापजुषः ॥ ३९ ॥
चण्डमुण्डदनुजान्तकारिणी हिण्डमानजनतान्ध्यदारिणी ।
कुण्डलीन्द्रधरचित्तहारिणी खण्डयत्वघततिं सनातनी ॥ ४० ॥
शङ्करकान्ता भजदनुकूला किङ्करभावस्थितसुरसंघा ।
पङ्कजजातिप्रतिभटपादाऽतङ्कहरीस्याद्रङ्कहृदो मे ॥ ४१ ॥
भवती महती भवतो भवतीत्ययि तीव्रभवोद्भवभावभयात् ।
शरणागतमत्यरुणाङ्घ्रि घृणामसृणाक्षि गुणार्पणतो गणय ॥ ४२ ॥
ज्वलद्दीप्तिसद्रत्नभास्वत्कलापां स्खलन्मञ्जुमञ्जीरपादां दुरापां ।
चलन्मेखलाराजमानावलग्नां वलत्कुन्तलोल्लासिवक्त्रां भजेऽहं ॥ ४३ ॥
गौरी हरतात् पापं सकृपा शौरिप्रमुखैर्देवैर्विनुता ।
सौरिप्रहिता भृत्या अपि मे द्वारि प्रभवो नस्युर्भजनात् ॥ ४४ ॥
विषधरभूषमनःप्रियदा विषधरसन्निभवेणियुता ।
विषमशराभयकारिवपुः विषभयमस्यतु सा सुमुखी ॥ ४५ ॥
शैलसुताऽनन्दलता स्कन्दयुता मन्दगता ।
कुन्दरदाऽनन्ददाऽमन्दमघं धेत्सततम् ॥ ४६ ॥
हिमाचलापत्यमुमाभिधानकं समाश्रयेहं नियमान्वितो यतः ।
समापतेयुर्नममाग्रतोभटा यमाहितास्ते यमवैरिणीभयात् ॥ ४७ ॥
शारदचन्द्रमुखी करुणाढ्या पारदसन्निभदिव्यशरीरा ।
नारदमुख्यमहामुनिगीताऽपारदुरीहितमस्यतु गौरी ॥ ४८ ॥
मान्यहारवलया मदालसा मारतातसहजा महीयसी ।
मारवैरिदयिता महोक्षगा मान्द्यमाशु मृदुतां नयेन्मम ॥ ४९ ॥
मरन्दपानतुन्दिलालिबृन्दमञ्जुकेशिका ।
मन्दवाग्झरीं परैरनिन्दितां ददातु सा ॥ ५० ॥

(क्रमशः)

## ॥ मठाधिपतयः ॥

[ पूर्वप्रकाशितात्परम् । ]

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ।
स सन्यासीच योगीच ननिरग्निः नचाक्रियः ॥

इति कर्मफलसन्यासिनएव गृहस्था यद्यपि तएव श्लाघ्या ग्राह्या जगदुज्जीवनकर्मणि इत्याशंक्य श्रीरामानुजपरमहंसः चतुस्सप्तत्यै स्वपदाश्रितेभ्य अभिज्ञेभ्यः नानासौकर्यनिष्पादाय तादृशलोकदेशिकपदं प्रदायान्वग्रहीत् । तथाप्यतिकालक्रमेण गृहमेधिनस्ते चित्तक्षोभविरक्त्यार्जिकाभिः वृत्तिभीरिक्ता बभूवुः । अतएव नशक्यन्ते ते निर्भयमुपदेष्टुं पामरजनतां तच्छब्दानुवर्तिदशापन्नतया । तदानीं गुरुजनगौरवं मूलतो हतमिव तदुचितकार्यकरणाधीरमासीत् । ततः वेदान्तदेशिकतनूजा वरदार्यसूरयः कमपि विरक्तं स्वानुरक्तं सन्यासिनं अभीक्ष्य तेनैवाश्रमेण नैस्पृह्येण लोकोज्जीवनं निराबाधं प्रवर्तितमिति तमुपकरणैरखिलैरुपकल्प्यानितरापेक्षैस्स्वपदप्रत्यासन्नराजादिपुरुषकारेण मठेषु शांकरेष्विव अधिष्ठाप्य शिष्योपशिष्यनीत्या अखिला अपि लोका अवनीयाइति मठान् तत्रतत्र स्थापयामासुः । ततस्तोताद्यहोबिलयोश्च श्रीवरवरमुन्यादिवण्शठकोपस्वाम्युपज्ञं दक्षिणोत्तरकलापरिछिन्ने द्वे परमहंसाभिराजिते मठशाखे प्रववृताते । तेतु तदुपज्ञशिष्यविशिष्टाद्वैतितया भगवद्रामानुजसूक्तयतिधर्मसमुच्चयानुसारेण प्रव्रज्यामवलंबन्ते । कालक्रमेण ज्ञानेन वयसाच वार्धकं नापेक्षितमभूत् । कतिचन सुतकतिपयसुताः कत्यपि स्पृष्टशय्याः कतिचन नष्टशय्याः अतएव कथंचिद्विरक्ताश्च । साच प्रक्रिया बह्वनर्थमापादयति दृष्टान्ताश्चानेके जाग्रति । अन्येच दोषाः यथाप्रपंचितं । एवं गच्छता कालेन श्रीमदानन्दतीर्था हनूमदपरावताराइति विख्याता महा-

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

न्तः परमेश्वरे भक्तियोगप्रचिख्यापयिषया श्रीनरनारायणपदपङ्केरुहपरागपूते बदरिकाश्रमे अवश्यंभावेन द्वैतविधां सङ्कल्पयामासुः । सन्तेनुश्च । तेभ्य-आरभ्यच महती गुरुवरभूषिता श्रीमठपरम्परा समागताद्यापि शोभते । परमभक्तियोगपारम्येष्वपि तेषु द्वैतसिद्धान्तिषु क्वचन क्वचनैव हन्त कलिवासना विजरीहरीति । यथासमयं तेहि पंचमुद्रांकनपावनाः गार्हमेध्यात्परमेव प्रव्रजन्ति । कोपि विशेषोत्र तत्सोदरश्रीवैष्णवयत्यपेक्षया । एतेतु परिव्राजकाः शिष्येभ्यो दाक्षिणां गृह्णते वेतननियमेन । अन्यथा बहिष्कारादिभिर्दण्डयन्ति ॥

श्रीरामं मनसेतवन्तमानिशं यं श्रीनृसिंह्वाह्वयः

रंगेशं वरतट्टवंशलासितः श्रीवालविद्याप्रथम् ।

राजम्मेतिच पाक्कमार्यविलसच्छ्रीशैलवंशात्मजा

प्रासूतापि तदीयवाक्यसरणौ चर्चा मठस्वामिनाम् ॥

---

# THE GLORY OF SELF KNOWLEDGE.

Once when Yudhishtira was asked what he thought was the most wonderful thing on earth, he replied thus:—

अहन्यहनि भूतानि प्रविशन्ति यमालयम् ।
शेषाः स्थावरमिच्छन्ति किमाश्चर्यमितःपरम् ॥

"Day after day thousands of lives enter the abode of Death; and yet the rest hope for permanence and safty. What can be more strange than this?" That is indeed the dread fact. We experience the truth of it in our daily life. The day comes perhaps when some one whom we most tenderly loved, in whom all our thoughts and affections were centred and on whom we lavished all our joys and delight—when such an one is snatched away trom us and our dearest ties on earth are snapped asunder. A sore blow, a severe trial, that, for mortal man. The tower of our strength is shaken to its very foundation and all our hopes are scattered to the winds. Where we expected sunshine and happiness, we find gloom and misery untold staring us in the face. It is in these times of tribulation and distress that the heart of man goes out and travelling to regions 'infinitely beyond human ken' is touched with the overflowing kindness and sympathy of the gentle Ruler of the Universe. What a world of difference there is between the man, who with a heart sick with affliction and dismay finds solace in Him and makes himself thereby a beloved son of God, and him who in spite of every facility afforded to him persistently closes his eyes and ears against the voice of God within and without. Surely in the hey-day of our life and except under duress we hardly suspect the existence of the mighty Force which through a long series of births and deaths enables us severally to reach our final goal. Under duress perhaps the thought creeps in upon us unawares and when once that is withdrawn we soon make friends with old Harry again and never more think of the cloud that may ere long settle on our heads in thick darkness. We begin to throw ourselves neck and crop into 'this world and its

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

ties which warp us from the living truth behind.' We unhesitatingly sacrifice God and all that is divine in man or earth for the sake of a three penny worth of this world and so saving our life we lose it in the bargain. For what is a man profitted, if he shall gain the whole world, and lose his own soul? Or what shall a man give in exchange for his soul ?

The most precious part of man's nature then is his soul, that which lives and endures whilst all other things perish in the dust and life is valuable in so far that it enables us to free the soul from the bondage of Samsâra. And what is the nature of this same soul ? Says the Great Teacher—

नैनं छिन्दन्तिशस्त्राणि नैनं दहति पावकः ।
नचैनं क्लेदयन्त्यापो नशोषयति मारुतः ॥
अच्छेद्योयमदाह्योयमक्लेद्योऽशोष्य एव च ।
नित्यस्सर्वगतः स्थाणुरचलोयं सनातनः ॥
अव्यक्तोयमचिन्त्योयमविकार्योयमुच्यते ॥

"Swords pierce it not; nor does fire burn it. Water moistens it not nor does it wither away on the wind. It cannot be split; neither burnt. It cannot be dissolved, nor does it fade away. Eternal, all—pervading, firm and immovable, ancient, unknown and unknowable and changeless is this soul."

Yes : that is the soul. But when conditioned by Maya, it is ushered into the scene of this world and becoming subject to the laws of karma, witnesses the phenomena of birth and death. The highest ideal of man therefore is to liberate the soul from its thraldom and all his endeavours in life must be shaped accordingly. The best intellects of all climes and ages have held up this ideal before men as the be-all and end-all of human existence. At the head of this glorious band of world-movers stand the mighty minds of old who lived the life they preached and one of them was the sage Sadasiva. His lofty ideal has been clearly set forth in his *Atmavidya vilasah*. Every stanza of it mirrors forth the grand personality of the great Yogin. There is an ineffable charm and sweetness in the verse, coupled with a sincerity of purpose which seems directly to speak to our hearts. There he stands immersed in Heavenly love, plunged deep in ecstatic bliss, but not once forgetting



to indicate that all that was due to his mighty *Guru* Sri Paramasivendra Acharya. How noble and yet how humble! What a contrast to the scoffing spirit of irreverence engendered of a smattering of modern science and modern thought! Indeed shallow draughts intoxicate the brain. Reverence and humility and faith form the first step towards the realisation of the *summum bonum* of life; uninitiated into the mysteries of the science of the soul—or for that matter of any science—we must grope and be grovelling in the dark. Hence the Acharya is considered higher than even the Trimurtis and the Supreme spirit is the Great Teacher worshipped as Dakshinamurti. In words sweet and eloquent Sadasiva thus expresses his gratitude to his benefactor—

मायावशेनसुप्तोमध्येपश्यन्सहस्रशः स्वप्नान्
देशिकवचःप्रबुद्धो दीव्यत्यानन्दवारिधौ कोऽपि ॥
गुरुवरकरुणालहरीव्यतिकरभरशीतलस्वान्तः ।
रमते यतिवर एको निरुपमसुखसीमनि स्वैरम् ॥

'Enticed into sleep by Maya and harassed by a thousand dreams therein some unknown person (like myself) awakened (into consciousness of the self) by the words of his holy guru, sports in the ocean of bliss. His inner self cooled and tempered by close touch with a flood of grace from his noble preceptor, the flower of *Yatis* delights himself freely on the verge of supreme happiness.'

He was a noble soul—was Sadasiva. With a heart extending not merely to the lost sheep of Israel but looking upon all the things of the earth as equally fit to receive God's goodness and mercy, he set at naught all distinctions of caste and creed, high and low, and seemed to all appearance a mad man. Are not 'great wits sure to madness near allied'? Thus—

जात्यभिमानविहीनो जन्तुषु सर्वत्रपूर्णतां पश्यन् ।
गूढश्चराति यतीन्द्रो मूढवदखिलागमार्थतत्वज्ञः ॥

'Bereft of all pride of creed or colour and observing fulness and perfection in creation, the best of ascetics knowing the truth of all the sciences moves about unobserved like a madman.'

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

High was his ideal and he lived it. Unlike many who put on a piece of *Garna* cloth and so become privileged to belong to the sacred order, not in virtue of their innate perfection however, and who are ever ready at the slightest hint to *talk* volumes of something which they know not, nor their father knew nor even their great grand-father—unlike these, Sadasiva spoke not a word but often forgot himself in that being 'whichever lives and loves.' I do not mean to say one word ill of those that have taken the holy orders. Far be it from my heart and heaven pardon me if I had transgressed. But how often do we find yellow robes clothing mere loquacity instead of crowning the glorious empire of silence. The last stage of human perfection is to unlearn what we had learnt and hail the mighty kingdom of silence. So did our sage. He renounced all things which smell of this earth and 'far from the madding crowd's ignoble strife,' wandered forth a homeless mendicant. His heart was set on nothing but the supreme. Thus:—

निन्दति किमपि नयोगी नन्दति नैवापरं किमप्यन्तः ।
चन्दनशीतलहृदयः कन्दलितानन्दमन्तरस्स्वान्ते ॥
ननिषेधाति दोषधिया गुणबुद्ध्या वा न किंचिदाधत्ते ।
आविद्यकमखिलमिति ज्ञात्वोदास्ते यतिः कोऽपि ॥

'With a heart cool and gentle as sandal and a mind full of joy, the *yogí* despises nothing at heart nor delights in any other (than God). He does not look down upon a thing because he finds it injurious nor does he uphold that which is beneficial. He is equally indifferent to all things because he knows all is the product of Mâya.'

He was perfectly indifferent, so much so that he denied himself, as every ideal *yogi* does, all the comforts of life. He was indeed a living example of what another born of a different stock and in a different sphere taught in these words—"Therefore take no thought saying, What shall we eat? or what shall we drink? or wherewithal shall we be clothed? .........For your heavenly father knoweth that ye have need of all these things."



Nature ministered to his comforts and he had no further concern. This fair earth was his bed and the 'chartered' air was his fan, while the full-moon lit his path wherever he went. That was all his worldly wealth. This is how he describes himself.—

विपुलाशिलातलफलके विमलसारद्वारिपरिवृतोदारे ।
मन्दं मलयजपवनेवाति प्रस्वापितिकोऽपि यतिराजः ॥

'The noblest of the *yatis* reposes undisturbed on a broad slab on a hill side, gracefully bounded on all sides by a clear stream of waters, while the gentle winds from the south lull him to sleep."

But his sleep is not the sleep that we enjoy in common with the brutes of the earth and the fowls of the air. It is not 'tired Nature's restorer,' but it is the *yoganidra* in which all consciousness of 'me' and 'thou' fly away into thin air and the glorious self-existent Atman reigns supreme freed from all the trammels of *Samsâra* and in which the sun shines not nor the moon, nor the stars, nor even the flash of lightning. To him nought remains but the supreme bliss. Thus it is—

पश्यति किमपि न रूपं न वदाति न श्रृणोति किंचिदपिवचनम् ।
तिष्ठति निरुपमभूम्नि निष्ठामवलम्ब्यकाष्ठवद्योगी ॥

'The hermit sees no form. Neither does he speak nor hear sounds. Absorbed in meditation he remains firm as a block of wood in that incomparable state.'

---

## PITHY SLOKAS FROM SANSKRIT LITERATURE.

---

हर्तुर्याति न गोचरं किमपि शं पुष्णाति यत्सर्वदा
ह्यर्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नोतिवृद्धिं पराम् ।
कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्धर्धनं
येषां तान्प्रति मानमुज्झत नृपाः कस्तैस्सहः स्पर्धते ॥

In this dreary world, where all the joy that we hope for proves illusion, where all that we rely on for our comfort proves our bane, where discord and hate distract the face fashioned for love's own peace, what can the wise man do, but die of sheer despair in the hopeless search to find one tittle of that which is true, and constant, and of unalloyed bliss?

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

Hanker not after the empty lust of wealth or fame. They would deceive you, fond man! They would sustain you with illusive hopes, while you are toiling for them, but they are a will o' the wisp, meant to ensnare fools. They never have rest that seek these phantoms. Witness the fate of the giddy Napoleon. Or again grant you achieve both these, they are not secure. The cares of the keeping of them safe from the snatches of the covetous and the envious will swallow you up in a wilderness of worry and anxiety as they say "Care killed a cat".

अर्थमनर्थं भावयनित्यं नास्तिततः सुखलेशः सत्यम् ।
पुत्रादपि धनभाजां भीतिः सर्वत्रैषा विहितारीतिः ॥

Or again granted that you have peaceful enjoyment of wealth and fame, what a hog would you be without all those nobler qualites that make man man, and keep him from degenerating into a brute. The happiness of a hog, you know, consists of eternal sleep in a nasty bog. Such would be your lot if you place your whole trust in that lifeless thing called prosperity, styled "material" by wise men who know its true nature. All your nobler gifts deadened, you are little better than a machine, a moving corpse. Yet one step further, granted you mean to make a charitable use of your wealth, what then? Toil the whole of your life, you can barely amass wealth to relieve one indigent man. Even your goodness is doomed to disappointment if you place reliance on Plutus, and Plutus alone; you must stand by and see millions suffering, and yourself not able to move a ffnger to help them out of their trouble.

But if you mean to be truly a man, discard Vanity for your god, and worship Sarasvati.

There will you see the bliss that thieves cannot steal away from you. For that is a power inherent in you which is indestructible. It is a power to be gained by long worship, by absorbing love of the Ideal, and of those in whom it is perfect.

Those that seek wisdom go not to the task with clubs and muskets, but with true humility and love for the holy Guru that kindly offers to impart it to them. He that is wise has no enemies to fear, for all men love him and worship him.



No toils weary you on the way to this Supreme Goddess of all. This search feeds your truest craving. You art truly blessed when you are in earnest pursuit of Wisdom. You are never cast down, for every step towards the goal is paved with the bliss of a release from irksome ignorance. The soul of man is Sat, Chit, and Ananda. Wisdom, as you pursue it, makes you feel at each step a greater and greater depth of its bliss. Cramped up within the narrow compass of an ignorant mind, you felt like a mouse cooped up within a dirty hole. When you reach the goal you are indeed that one Peace and Reason which alone is the Truth.

Here indeed you find the true and only way to help the suffering world. There is in them all that latent fire, which now animates you, and urges you on to that great goal which lies before all men. The fire that burneth in you teaches by example but does not suffer any diminution in itself. Nay, rather does it augment itself, for it grows the more you entertain it. The wisdom of the holy Guru doth but confirm and expand itself into the infinite when he seeketh to elevate the willing sishya.

And this true Power, does it die the death of mortal things? Surely it is indestructible. It lasts unto you even after your present body leaveth you and goes into corruption. It will keep you alive even after this seemingly fatal catastrophe, it will work itself out, until verily the great goal is reached. Death cannot break off your noble Purpose. Work on undaunted. For Wisdom is eternal.

Therefore, Oh kings and rulers of the world! You that profess to seek the happiness of mankind, despise not those truly great men who have wisdom in them. They are not to be put down by brutal might. Wisdom is an undying growth, and it will live and flourish in spite of you. Seek to foster it and acquit yourself nobly of your holy task.

Bhartrihari was a great Yogin. His wisdom is a monument of Sanskrit Literature. The depth of his thought is scarcely equalled by any Western thinker. Emerson and Carlyle, if at all, seem to approach him. Yet there is in him a calmness, an unperturbed course of thought that in itself marks him out as a great philosopher. K. L. S.

*(to be continued)*.

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

## THE ADVAITA ASHRAMA—HIMALAYAS.

We have much pleasure in drawing the attention of our readers to the institute founded under the above designation. Its chief objects are thus clearly set forth :—

In whom is the Universe, Who is the Universe, Who is the Universe; in Whom is the Soul, Who is in the Soul, Who is the Soul of man; knowing Him—and therefore the Universe as our Self, alone extinguishes all fear, brings an end to misery and leads to Infinite Freedom. Wherever there has been expansion in love or progress in well-being, of individuals or numbers, it has been through the perception, realisation and the practicalisation of the Eternal Truth,—THE ONENESS OF ALL BEINGS. "Dependence is misery, Independence is happiness." The Advaita is the only system which gives unto man complete possession of himself, takes off all dependence and its associated superstitions, thus making us brave to suffer, brave to do, and in the long run attain to Absolute Freedom.

Hitherto it has not been possible to preach this Noble Truth entirely free from the settings of dualistic weakness; this alone we are convinced explains why it has not been more operative and useful to mankind at large.

To give this ONE TRUTH, a freer and fuller scope in elevating the lives of individuals and leavening the mass of mankind we found the Advaita Ashrama on the Himalayan heights, the land of its first expiration, with the fullest approval and under the guidance of the Swami Vivekananda.

Here it is hoped to keep Advaita free from all superstitions and weakening contaminations. Here will be taught and practised nothing but the Doctrine of Unity, pure and simple; and though with entire sympathy with all other systems, this Ashrama is dedicated to Advaita and Advaita alone.

The main lines along which the work is to be carried on are necessarily educational and consist of sending out trained teachers and issuing publications. Arrangements, therefore, are in course of progress for training Indian and European men and women side by side, for Advaita work in the East and the West. All men and women who believe in the uplifting power of the Advaita and are ready to make their lives one with the GREAT LIFE and to help others in doing so are invited to join the Ashrama and assist in the carrying out of its object in the manner best suited to each individual circumstances.

For further particulars and the rules of the Ashrama apply to the Secretary, Advaita Ashrama, Mayavati, Kumaon, Himalayas.

(MRS.) C. E. SEVIER.
J. H. SEVIER.
SWARUPANANDA.

# ॥ स्वारोचिषचरित्रम् ॥

[ पूर्वप्रकाशितात्परम् ]

किंच भगवता सृजता शरीरेन्द्रियविषयान् केनापि नभोक्तव्यमिति नयुक्तमभिसन्धातुं । तथाभिसन्धाने शक्तस्य भगवतः पश्यतः कथन्नु शक्नुयुः प्रसह्य ते विषयान् भोक्तुम् । संप्रतिपन्नञ्च बहुभिः प्रायो मुक्तात्मनां स्त्रीभिः क्रीडादिकं । यद्यपि केवलेनात्मनावस्थानमधिकृत्य पुंसां सभगवान् उपादिशच्छास्त्रमिति । तथावस्थानमात्मनामसंभावितमश्रद्धेयमेव । तथा संभावनायामपि नैतदाशास्यं भवितुमर्हति कस्यापि । अभिप्रैतिच सर्वोपि भवेयमहं सुखीति । नतु भूयासं सुखमेवेति तत्सुखात्मना यदेतदवस्थानं नतदाशास्यं भवितुमर्हति कस्यापि । ये पुनर्वस्तुतस्सुखात्मतामात्मनान्न संमन्यन्ते । तेषामात्मा दुःखमयोवास्यादुपेक्षणीयोवा । सुखंहि अनुकूलतया भासमानन्दृष्टं । स्वयमेवचेदयं सुखं स्यात् सकस्यानुकूलः । नकस्यापि । किंतु सुखमेवासाविति । तथासति स्यादस्य पारिभाषिकी सुखता । स्वात्मनएवासावनुकूलतया भासतइति । इदमपि स्वयमेव क्रियाच कर्त्ताच करणञ्च कर्मचेति घटते नविनाभ्युपगमं । तथाभ्युपगमश्च निदर्शनोनुपपन्नश्च । तामेवं भोगपक्षपातिनीमाह राजहंसः । एतत् खलु नास्तिकानां निश्चयमनुसरति केवलं विषयपराणां । यदेतत् पक्षत्रयेप्यपरिहार्यतामाह भोगस्य भवती । अत्रेदं विमृश्यतां यतमानाश्च भोक्तुमलब्ध्वैव विषयानप्रतिपद्य वा शक्तिं कतिकति नदृश्यन्ते मुधैव निरुद्धाः । कतिवा सत्सु विषयेषु करणानामभावादपि सत्यां शक्तौ वञ्चिता भोगैः । एवं सति शकने सति विषये सत्सु च करणेषु विरतिमासाद्य हन्त कियन्तस्सन्तस्सन्तोषं स्वात्मना भजन्त्यनुकूलं ॥ भोगेषु प्रथमं सुखानुभवमेव विमृशतु भवती । सकिल विषयेन्द्रियसंगजन्मा भृशमनुकूलश्चित्तविकारएव । तत्र बहुभिरेकस्मिन्नेव

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

विषये गृह्यमाणे दृष्टा खलु कस्यचिदुपेक्षात्मिका परस्यानुकूला प्रतिकूलान्यस्य विक्रिया मनसः । यदेकं स्त्रीपिण्डमवलोकयतस्समुत्पद्यते परिव्राजकस्य नितरामुपेक्षारूपश्चित्तपरिणामः । तामेव कामिनीं विलोकयतः कामिन स्समुदेति निकाममनुकूलश्चित्तपरिणामः । तामेव पश्यतां शुनां इदम्मे भक्ष्यमिति चित्तपरिणामः । एनामेव पश्यन्त्यास्सपत्न्याः प्रतिकूलश्चित्तपरिणामः । यदाहुः ।

परिव्राट्कामुकशुनामेकस्यां प्रमदातनौ ।
कुणपः कामिनी भक्ष्यमिति तिस्रो विकल्पनाः इति ॥

तत् भोगस्याप्यवस्थैव भवति विचारयतां । सहि भगवाननादिकर्मस्रोतोभिरुह्यमानं जगत् पश्यन्नुपदिशति ज्ञानधर्मादिकं कारुण्यात् । अधिकुर्वन्ति तत्र क्षेत्रज्ञाश्शुभकर्मणामुदये । नततोस्य वैषम्यन्नवा नैर्घृण्यमिति । यतस्सत्सु पुरुषकारेषु पुंसां स्वयमुदास्ते सर्वज्ञः । नखलु भगवति सर्वोपेक्षके वक्तुमर्हति कोपि वैषम्यं । नापि त्रिविधतापपरिभूतान्विलोक्य परमकृपावतश्शास्त्रप्रदस्य वा नैर्घृण्यं । एवं सति निर्व्यूढावेव भवतः विधिनिषेधौ । यदेषपुरुषकारः क्षेत्रज्ञानां । स्वतन्त्रोहि तत्र भवति पुरुषइति । स्वतन्त्रांश्च प्रवर्त्तमानान् प्रवर्त्तयितुन्निवर्त्तयितुञ्च शक्नोति विधिर्न्निषेधश्च । स्वकारणवशादयं प्रवर्त्तमानो निवर्त्तमानश्च नशक्यते शास्त्रेण नियन्तुं । नखलु सहस्रेणापि सम्यगुपदेशानां कारणवशात् प्रवृत्तो निवृत्तोवा शक्यो वारयितुं प्रवर्त्तयितुं वा । शास्त्रेण प्रवर्त्तिता निवर्त्तिताश्च शास्त्रविस्रंभादभ्यासपाटवाच्च स्वकारणे सत्यपि शास्त्रमनुसरन्ति । तदेतत्संस्कारप्राबल्यमित्युच्यते । प्रबलोहि संस्कारः प्रतिरुणद्धि प्राचीनं कर्म । प्राचीनञ्चेत् कर्म प्रबलं प्रतिरुणद्धि शास्त्रसंस्कारं । तत्सिद्धं पुरुषकारस्य वैषम्यादिनिर्वाहकत्वमिति नेश्वरे तत्प्रसंगः । केचित्तु विधिनिषेधौ प्रवर्त्तस्व निवर्त्तस्वेति नपुरुषं साक्षान्नियोजयतः । किन्तु बलवदनिष्टाननुबन्धीष्टसाधनतां तदभावञ्च ज्ञापयतः । ज्ञापिताभ्याञ्च ताभ्यां पुरुषः स्वयमेव प्रवर्त्तते निवर्त्तते वा । अस्मिन्नपि पक्षे नेश्वरस्य कोपि दोषः । करुणामयोहि भगवान्



ज्ञापयति पुंसां हितमहितञ्चेति किन्नाम सत्येवमीश्वरस्य स्वातन्त्र्यमिति । उच्यते । सएषभगवान् येषु कृपावान्स्तेषां कर्मसु नैश्श्रेयसमेव प्रथमं फलाय चोदयति । तत् तु क्रमेण ज्ञानादिकं प्रतिपादयति । शिष्टन्तु मुधा सुहृद्विषत्संक्रमणीयतयास्ते । तदेतदीश्वरस्य स्वातन्त्र्यमित्युच्यते । ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहमितिह्याह । वस्तुतस्सभगवान् स्वयमेव जीवान् साध्वसाधु कारयति । नापि भगवतो वैषम्यादिसंस्पर्शः । यतस्सुखदुःखे पर्यायेण प्राप्नोति सर्वोपि ॥ यदाहुः ॥ सुखस्यानन्तरन्दुःखन्दुःखस्यानन्तरं सुखमिति । एवं स्थिते कस्यैकान्तेन सुखं कस्य वा दुःखमिति सुखदुःखयोस्सर्वेषां पर्यायेण प्रवृत्तयोः कथमीश्वरे विषमत्वं । मास्म नाम विषमतास्तु भगवतः । नैर्घृण्यं पुनर्दुष्परिहरमिति । यतो दुःखितानवलोक्य जन्तूनुद्धरणे समर्थस्सन्नुपेक्षते निरनुक्रोशः । इति ॥ नित्यत्वादात्मनामेकरूपत्वाच्च नकापि तेषां क्षतिः । देहादीनाञ्च पुरातनापाये नवतरमुत्पद्यते इति विजानतोस्य न निर्घृणत्वं । यथैव बालो लाळयतः पितुस्तिरोधाने रोदिति भृशं । पुनः प्रकटीभावे प्रसीदति स्वैरं । न ततः पितुर्न्निरनुक्रोशता । यतस्तस्य पितुर्द्दृष्ट्या नबालः कामपि क्षतिमवाप्तवान् । एवमेव शरीरेन्द्रियविषयापगमे सदैकरूपो नित्यश्च भजति नकाञ्चन क्षतिं । शरीरादिकं पुनः पुरातनापाये नवीनमेव पुनस्तस्य संभवतीति मन्वानस्य नेश्वरस्य नैर्घृण्यं शक्यमुपपादयितुं । यद्वा अस्तु परमेश्वरस्य क्रीडनकानिव क्षेत्रज्ञान् सुखन्दुःखञ्चानुभावयतस्सर्वकारणता । नापि वैषम्यादिसंस्पर्शः । वैषम्यादिना खलु भवति पुरुषः पापसंस्पृष्टः । अकर्मवश्यस्य भगवतः कथंकारं पाप्मना संबन्धः । कथं वा पापसंसर्गात् नित्यमुक्तस्य दुःखानुभवः । शास्त्रातिलंघनं हि यदा ज्ञानिनोपि नावहति दोषं । तदा किमिव कुर्यादीश्वरे सदैव मुक्ते । शास्त्रंहि नाम शासितुर्न्निदेशरूपमेव । नवा शासिता भवति कस्याप्यनुशास्यः । किंच, क्षेत्रज्ञानां स्वभावएव कर्म भवत्यनादिवा ईश्वरस्यैवायं स्वभावो यदुच्चवचकर्माभिस्स्वकारितैर्जन्तून् सृजति पाति संहरतिचेति । न खलु स्वभाववादे किमपि दोषोद्भावनम् समञ्जसं । देवस्यैषस्वभावोयमाप्तकामस्य का स्पृहा ।

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

कर्मणाञ्जीवस्वभावत्वे जीवस्य स्मादनिर्मोक्ष इति । जीवाश्च त्रिविधैः कर्मभिराक्रान्ताः त्रिविधानि च कर्माणि सुखदुःखमोहफलानीति सुखफलानि सात्विकानि। कर्माणि तैश्च कृतैः फलं सात्विकमेवानुभवन्ति । सएषमोक्षोनाम । सच सात्विको भाव ईश्वरादेव ।

येचैव सात्विकाभावा राजसास्तामसाश्च ये ।
मत्तएवेति तान्विद्धि नत्वहन्तेषु ते मयि। इति स्मरणात् ॥

न च ज्ञानादेव मोक्षइत्यभ्युपगमविरोधः। सत्वस्य परिणामोहि ज्ञानं । तच्च सात्विकोभाव इति। किञ्च कर्मणस्स्वरूपमेव निरूप्यमाणं नव्यवतिष्ठते। नपरानुग्रहपीडारूपे पुण्यपापे। पुण्यस्यापि पश्वालम्भनादेः पापस्यापि कूपपूरणादेः पशुपीडाप्राणिमरणाभावहेतुतया पीडानुग्रहहेतुत्वात्। नापि वेदबोधितकर्त्तव्यताकं पुण्यमितरदपुण्यमिति । अभिचारादेरपि वेदबोधितकर्त्तव्यताकतया पुण्यत्वापत्तेः । वस्तुतस्तु स्वतन्त्रस्य भगवतः कर्मानुरूपफलप्रदत्वमिति युक्तं कर्मानुगुणञ्चेत् फलं प्रयच्छति किं ईश्वरस्य स्वातन्त्र्यमितिचेत् स्वतन्त्रोहि कर्त्ता कर्तृत्वञ्चेश्वरस्य परानपेक्षमिति तस्य स्वातन्त्र्यसिद्धिः । न च कर्मापेक्षफलप्रदत्वात् कर्त्रत्वमस्य परापेक्षमिति शंक्यं। यदिदं कर्मेति व्यवह्रियते । तत्किल परमेश्वरेणैव व्यवस्थापितं भवत्विदं पुण्यं भवत्विदं पापमिति। तथा च तत्रापि स्वातन्त्र्यमस्याविहतमिति। न खलु स्वाज्ञे स्वव्यवधायकमिति न्यायेन स्वव्यवस्थापितपुण्यपापानुगुणफलप्रदत्वमस्य न स्वातन्त्र्यं व्यपोहति। नापि वैषम्यादिकमीश्वरं स्पृशति। यतो वैषम्ये रागद्वेषौ प्रयोजकौ नेश्वरे सम्भवतः। रागद्वेषगन्धानभिज्ञस्य तस्य कथन्नु वैषम्यं ।, कथं वा नैर्घृण्यं घृणा खलु पर दुःखप्रहाणेच्छा । साच संसारिणश्चेतनानुद्धरिष्यामि ज्ञानधर्मोपदेशेनेति सङ्कल्पवतस्सिद्धैव। आसीदुत्तमोनाम* सुरुच्यामुत्तानपादान्नृपतिः। स किल महासत्वोऽप्रतिरथस्सामन्तसहस्रचूडामणिनिघृष्टपादपीठो रराज राजा। सच शत्रुमित्रोदासीनेषु समदृष्ट्या दण्डधरस्सर्वभूतानतीत्य बभौ-सहस्रकिरणइव साक्षात् । सच बभ्रोर्बहुळान्नाम तनयामुपयेमे महेन्द्रइव शचीं । तस्य सततमपि मनस्तस्यामवर्त्तत जाग्रतः स्वप्नावस्थस्य । सातु तन्नावैक्षत । न तस्य बहुमेने किमप्याचरितं । एवमनुकूलस्य प्रतिकूला मन्यतेस्म तेन कृतं सत्कारमेव परिभवम् । सच परिभवमपि तया विहितं महान्तमनुग्रहम् । अवमेनेच्च सा स्रजमलंक्रियाश्च तेन दत्ताः । अथ कदाचिन्मध्ये सामन्तानां वाद्यमानेषु वीणावेणुमृदङ्गेषु गायन्तीषु वारविलासिनीषु सुराभृङ्गारं ग्राहयामास क्षितिपतिस्तां बहुळां । सातु प्रेम्णा राज्ञा दत्तां सुरापात्रीन्नैव जग्राह मानिनी । सतया शीथुभाजनहस्तश्चुकोप तथावमतो राजा सामन्तानां पुरस्तात् । अथ द्वार्स्थमाहूय सन्दिदेश रोषपरवशां बिभ्रदाकृतिम् । दौवारिक दुष्टामेनामविचारितमरण्ये विहायागच्छ इति। सतु शासनमवनीपतेरनुतिष्ठन्नुवाच राज्ञो महिषीं । आज्ञापयति राज्ञीं परमेश्वरः। केनचित् कार्येण गन्तव्यमरण्यमिति। सापि तच्छ्रुत्वा महान्तमनुग्रहं मन्यमाना रथमारुराह वनगमनाय । अथ दौवारिकेण सुचिरं रुदित्वा परित्यक्ता सा विपिने तस्य राज्ञो मन्यमानाऽनवलोकनमेव परमभ्युदयं परिबभ्राम भृशमितस्ततो हंसगमना । राजा तु तां विहाय विपिने तदासक्तेन मनसा नान्यासु बबन्ध रतिं । केवलन्नक्तन्दिवं दह्यमानचेता नसुष्वाप रात्रीर्दुरन्ताः । अकरोच्च मनसि । अहो मयाऽसमीक्ष्यकारिणा त्यक्ता सा वने कथमिव भवित्री। ननु सा सुकुमारी राजपुत्रीच क्लेशानामनभिज्ञाच । किन्तु सा श्वापदानामभूत् भक्ष्यमतदर्हा । किंवा चारित्रमपारयन्ती पालयितुं व्याधैरात्मसात्कृता। किंवा राजपुत्री सा निसर्गादक्लेशार्हा कठोरवनवासक्लेशमशक्नुवन्ती सोढुं विजहावसून्। कष्टमतिनिष्ठुरमाचरितमकरुणेन मया । नपारये विकारमात्मनस्समुद्भिद्यमानन्निगूहितुं । विवृतानुशयञ्च मां मस्यन्ते तरलं मनसा पुनरवमंस्यन्ते नूनं प्रकृतयः । कष्टा खलु मे जीवितदशा संवृत्ता। यदहमनवद्यांगीन्तामपहाय विपिने भोक्तास्मि राजसुखानां । नविना तया मे राज्यसुखमनुकूलं प्रत्युत विपरीतमेव भात्यनुभूयमानमिति सन्ततचिन्ताक्रान्तमानसस्समतप्यत भृशं । अनिर्भिण्णांह्यन्तरात्मनि निगूढसुपपादयति व्यथान्दुःखं गम्भीरहृदयानां । स तथा सन्ततचिन्तासन्तप्यमानमानसोपि सावधानएव ररक्ष प्रजाः । लोकाराधनं खल्वात्मनिरपेक्षं स्वो धर्मो राज्ञां । अथ कदाचिदसावश्रृणोद्ब्रह्मण्यं । किमेतदिति

* इतःपरं उत्तमचरितमारभ्यते ।



Digitised by Ajit Gargeshwari For Karnataka Samskrita University

जिज्ञासमानो दौवारिकनिवेदितं प्रविशन्तं साक्षादिव विभावसुमपश्यत् कञ्चन द्विजवरं । सच समभाषत राजानं । राजन्नर्गलिते निशि निजगृहे सुप्तान्न पश्यामि पार्श्वगतां भार्यां । न खलु सा कदाचिदपि रात्रौ बहिर्गृहान् पदानि निदधाति भीरुस्वभावात् । राज्ञा खलु भागहरेण परिपालिता विस्रब्धं शेरते प्रजाः । न खलु राज्ञां कर्णान्तायतमपि नयनं विलोकयति सूक्ष्ममर्थतत्वं । त्रिकालदर्शिनी शरणं महीक्षितां प्रज्ञा । तया विहीनो नरपतिश्चक्षुष्मानप्यन्धएव खल्वदर्शनादर्थानां । प्रसुप्तोपि नरपतिर्जागर्त्ति सन्ततमेव नयेन चक्षुषा । यत्प्रभावाद्रात्रावप्यशङ्कितास्सर्वाः प्रजा नातिक्रामन्ति व्यवस्थां । सुखं स्वपन्ति प्रसवित्रोरिवोत्सङ्गे । एवं स्थिते कथङ्कारमृते राजापचारात्सुप्तयोर्दम्पत्योरेकापाह्रियेत कवाटे तथैवार्गलिते । तदानेतुमर्हति भवानन्विष्य मे भार्यामिति । स तथा तेन नियुक्तो नृपतिर्भार्यानयनाय नाशक्नोत् किमपि प्रतिवक्तुं । अथ विमृश्य प्राह राजा तं द्विजं । ब्रह्मन्न खलु भवतः प्रत्यभिजानाम्याकारशीलादिभिरहं भार्यां । कथं पुनरन्विष्यन्नधिगच्छामि तां केनवा लिङ्गेनेति । स पुनः प्राह तं द्विजवरः । कथयामि ते यथास्थितां मे ब्राह्मणीं । येन जानासि सम्यगेव तामितराभ्यो विविक्ततया । तथाहि । सा ।

अत्युच्चा ह्रस्वभुजा करालदृष्टिः कृशानना कटुवाक् ।
गुरुमध्या मध्यदशां स्पृशति नतस्यास्समौ समावयवौ ॥ इति ।

अथ तल्लक्षणश्रवणसञ्जातजुगुप्सो राजा तमाह द्विजवरं । ब्रह्मन्नन्वस्या रूपमप्रियं साकं शीलेन । तदलमनया गवेषणया । अन्यामेव कन्यां सुन्दरीमुद्वोढुमर्हसि सुशीलां । ददाम्येकामनेकांवा तादृशीं कन्यामिति । स तथा राज्ञा प्रलोभ्यमानस्समभाषत राजानं । राजन्नखलु सांप्रतमग्निसाक्षिकमुपयातायै द्रोग्धुं । शीलेन रूपेण वाप्युपपन्नामनुपपन्नामपि बिभृयादेव पतिर्भार्यां । भवति भार्यायां रक्षितायां प्रजा सुरक्षिता । आत्मा किलास्यां जायते पुत्रतया । सत्यं सा विकृतरूपा दुश्शीलाच । तथापि नाहन्तां परित्यक्तुमुत्सहे कथमपि । ननु पुरुषाननभिरूपानभिरूपान्नाति-



चरन्ति वरांगनाः । एवमेव नातिसन्धातव्याः पुरुषैरपि योषितः । इति तस्य-वचनमाकर्ण्य विमृश्यात्मचरितं राजा मनसि प्राप महतीं लज्जां । अथ सज्जं रथमारुरोह ब्राह्मणीगवेषणहेतोः । इतस्ततो गिरिवनाश्रमेषु विचिन्वन्नवाप महामुनेराश्रमं ब्रह्मलोकनिभं । सोवतीर्य रथात् पद्भ्यामेव जगाम महामुनेस्सविधं । सतु संभ्रमादुत्थाय मुनिस्स्वयमेव प्रादादासनं । अर्घ्यमर्घ्यमित्याम्रेडयता गुरुणा सन्दिष्टश्शिष्यः प्राह तं मुनिवरं । इदमर्घ्यं विचार्य देयं भगवतेति विज्ञापितश्शिष्येण समुनिस्समागतस्यातिरनामयप्रश्नेनैव समापयामास सत्क्रियां । अथापृच्छदर्घ्यानर्हतामात्मनो मन्यमानस्य राजा मुनेराशयं । सोब्रूत मुनिर्म्महीक्षितं । राजन्ननु त्वमुत्तानपादतनयोस्युत्तमोनाम । भवताच मुधैव राज्ञीं परित्यजता नसाध्वनुष्ठितं । नखलु तस्याश्चरितं परित्यागार्हं । वने विसृष्टायाश्च संवत्सरो वृत्तः । आश्रमधर्माननुतिष्ठता मुधा किल कालकला नीयते भवता । अप्रमाणयताञ्च धर्मं राजा विनेता भवति सम्यक् । राज्ञएव धर्मच्युतौ कोनाम तं विनेष्यति पुरुषः । अयन्तु मत्प्रसादात् भूतभवद्भाविवस्तुविज्ञानं प्राप मुनिः । मया पुनर्भवदागमनसंभ्रमेण विस्मृतामिदमाश्रमधर्मातिक्रमणं । विबोधयताच-मां सम्यगनेनोपपादितमिति । सच राजा पुरैव तस्याः परित्यागेन सन्तप्तो विशेषेण प्राप महान्तमवज्ञाजनितं सन्तापं । पुनरपि तं प्राह समुनिः । राजन् यदर्थमसि तपोवनमागतः तदपि ज्ञातमेव तपःप्रभावात् । ननु तस्य ब्राह्मणस्य पत्नीमन्वेष्टुं भवानुपागतः । सा किलोत्पलावर्त्तके वने सत्यशौचनाम्ना राक्षसन समानीता त्वयाच समासादयितुं शक्येति । सराजा मुनिना सन्दिष्टं प्राप तदेव वनमुत्पलावर्त्तकं । अथ तत्र वने विचिन्वता तेन फलं बैल्वं भक्षयन्ती दृष्टा काचित्तथारूपा । यथारूपामवदत्सब्राह्मणः । दृष्ट्वाच तां प्रहर्षमतुलं लेभे चक्षुरप्रियरूपामपि । ततस्सराजा पप्रच्छ द्विजवधूं । भद्रे कासि कुतएकाकिनी वने निवससि । यदिनाम चित्रस्य द्विजस्य त्वमसि भार्या । तदावेदयितुमर्हति भवतीति । तमाह सा ब्राह्मणी । महीपाल नन्वहं ब्राह्मणस्य यथोक्तनाम्नः पत्नी पुत्रीच विशालस्य । मामिदं रक्षो निशि निजगृहे सुप्ताङ्गृहे माया

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

बलात् । रक्षसोस्य भार्यायाः पुत्र्याः भगिन्याश्च भूयात्तथाविधो दशाविपरिणामः।
यादृशो मे निरालम्बायास्स्वजनविधुरायाः दुःखैकनिधेरिति । ततस्तां राक्ष-
समधिकृत्य पप्रच्छ द्विजपुत्रीं । भद्रे किं त्वयापहृतया फलं रक्षसः । नाहि-
त्वामसावत्तिवा चारित्रात् भ्रंशयति वा । नूनमयं निष्प्रयोजनं प्रवर्त्तमानो
नवितर्क्यते किमभिप्रायोसौ राक्षसः इति । अथ कोसौ किमभिधानः । क्वा नि-
वसति अहं किल भर्त्रा तव चित्राभिधानेन त्वामन्वेष्टुमुद्योजितोस्मि ब्रह्मते-
जोवष्टम्भात् दिष्ट्या दृष्टासि मया रक्षसाऽपहृता । माभैषीः । नूनमस्य कर्म-
णो विपाकमनुभविष्यति सराक्षसः । सा पुनः प्राह राजानं । राजन् स्वजन-
विनाकृतायामे किमभयोक्त्या । अस्ति वनेऽस्मिन् सराक्षसः । यदि शक्नोति
प्रविश्य तं पश्यतु भवान् । नासावत्ति मां राक्षसापशदः इति । अथ र-
थात् प्रस्कन्द्य सायुधः प्राप तमुद्देशम् । यत्रासौ राक्षसः प्रतिवसति सह
भृत्यैः राक्षसोपि दृष्टमात्रएव पार्त्थिवे जगाम महीं शिरसा । आहच सवि-
नयमाबद्धाञ्जलिकुड्मळमिदं । महाराज ममालयमागच्छता भवता मयि
महाननुग्रहो दर्शितः । वनमिदमिमे गृहाः सभृत्योहमिति सर्वमिदमायतते
महाराजे । शास्तासि विस्रब्धमर्हसि प्रशासितुमिति राजापि पप्रच्छ तं रा-
क्षसम् । भद्र केन वा प्रयोजनेन द्विजभार्यामस्यपहृतवान् । न खल्वियमुप-
भोगार्हा । नापीयमाहारहेतोरपहृता यदुपेक्षितास्ति सा विपिने इति । स-
प्राह पार्त्थिवं राक्षसः । महाराज सन्ति नोगृहेषु रमणीया रूपेणाप्रतिरूपा रा-
क्षस्यः न च तासु सतीषु रतिरन्यत्र भवति नः कथञ्चिदपि । न च वयं
पुरुषादाः । तन्नाहारहेतोरियमाहृता । वयं हि सुकृतभुजश्श्रौतेषु कर्मसु स्व-
भावञ्च मानुषाणां वयमश्नीमः प्रविश्यान्तरं सत्वं । चित्रोनाम पतिरस्या यज्ञेषु
नस्समुच्चाटनेहेतोरक्षोघ्नान् पठतिस्म मन्त्रान् । असकृदनेन निकृतानामस्माकं
काचिदुत्पन्ना समीक्षा । अपहृतायामस्यामस्याश्रमधर्मलोपो भवेत् । लुप्तधर्मेण प-
ठिताश्च मन्त्रा यातयामा भवेयुरिति । संप्रति तथा कर्त्तास्म्यहं । यथाज्ञापयति
महाराजः । सपुनः प्राहतं । राजा । भद्र रूपमस्याभवतु यथास्थितमेव
स्वभावस्तु विपरिवर्त्त्यतामस्या इति । अथ राक्षसः प्रविश्यान्तरमस्याः स्वभाव-



मभक्षयत् । येन सा तथा निष्ठुरा भूत्वा बभूव मृद्वी वत्सलाच सर्वेषु । अथेमां
प्रापय भर्तृगृहमिति सन्दिष्टस्समनयत्तां द्विजगृहं । पुनरागत्य राक्षसस्सवि-
नयमुवाच । अस्मि संपादितनियोगस्सोयं । स्मर्तव्योसौ समयेषु दासजन इति ।
तथेति समनुज्ञातश्च राज्ञा प्रायात् सपरिवारो राक्षसः । अथ निजनगरमवा-
प्य चित्रायाकथयच्चित्रं सर्वं । सतु द्विजवरस्तामासाद्य विपरिवृत्तस्वभा-
वामवाप वाचामभूमिमानन्दं । प्राहच पार्थिवं । महाराज त्रिवर्गस्य मूल-
मिमां पुनः प्रयच्छता नकिञ्चन नदत्तं । नन्विह परत्रच सहधर्ममाचरितुं सहैव
भोक्तुं भोगानुपपादितमनुकूलं साहाय्यकं । तदस्मि समये स्मर्त्तव्योहम्महा-
राजेनेति । राजापि प्राप निजामास्थानीं । तत्र मनसा सन्तापवता चकार
राजार्हाः क्रियाः । अथ संचिन्त्य राजा प्रायान्महामुनेस्तस्याश्रमपद । येन
सत्क्रियायामनर्हताभूदात्मनः प्रकाशिता । ततस्तस्य राज्ञो मनसि विप-
रिवर्त्तमानन्तमेवार्थमधिकृत्य प्राह समुनिः । राजन्नाश्रमधर्मानपहाय नक्ष-
णमपि वस्तव्यं धर्मपरेण । किं पुनर्द्धर्मपरीक्षकेण । येनार्घ्यार्हो भूत्वाऽसि
पूजायामनर्हतामापादितः । स्मरसि खलु तस्य ब्राह्मणस्य स्वाश्रमधर्मरक्षा-
याः । तद्यतस्व निजमाश्रममन्यूनमुपपादयितुमिति । महीपतिस्तु प्राह तं
सविनयम्महामुनिं । ननु भगवन् बहुळेव नान्यामे जनयति चक्षुःप्रीतिं ।
सापि क्रोधोपहतेन मया वने त्यक्ता । विपन्नावा खण्डितचारित्रावा नजाने
कान्नु दशां प्राप्तेति । पुनः प्राह समुनिस्तम्महीक्षितं । राजन् सा किल
त्यक्तमात्रा वने त्वया नागलोकन्नीताभून्नागेन सालपोतेन । तत्र चाविप्लुत-
चारित्रा वर्त्तते ते प्रिया बहुळेति । अथ महीपतिः प्रहृष्टः प्रियां कुशलिनी-
मखण्डितचारित्राञ्च श्रुत्वा तम्मुनिमनुज्ञाप्य निजमावसथमुपगतश्चित्रन्नाम
तमेव ब्राह्मणमाहूय प्राहेदं । ब्रह्मन्ननाश्रमिणा न खलु वस्तव्यमिति लोक-
शास्त्रवादः । तत् किं करोमि आश्रमधर्महेतोः इति । सोब्रूत राजानं ।
राजन्ननु ते विपिने त्यक्ता सा भार्या विपन्ना वा भविष्यति छिन्नचारित्रावा ।
तदन्यामेव कामपि कर्त्तुमर्हसि सहधर्मचारिणीमिति । सतु राजा प्रोवाच तं
ब्राह्मणं । ब्रह्मन्नस्ति सा कुशलिनी सुशीलाच । परन्तु चक्षुषोररतिर्महती
मयि तस्याः । किमस्ति तादृशः कश्चिदुपायः । येन चरितेन मयि तस्या-

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

रज्यत मनइति । विचार्य प्राह ब्राह्मणस्तं पार्थिवं । अस्त्युपायोनुरागस्य । या खलु मित्रविन्देष्टिर्नाम । तयातु चरितया द्वेषेपि प्रेमतामापद्यतइति । सतथोक्तो राजा संभारानाजहार मित्रविन्देष्टिहेतोः । सच वेदार्त्थवित् सप्तकृत्वश्चकार तामिष्टिं । यदाच साममन्यत प्रेमावेशपरवशां तदा राजानमुवाच द्विजवरः । भो महीपाल सुसाधितमिदं श्रौतं कर्म । येनावश्यं वश्यया तव तया भवितव्यमिति । ततस्ससस्मार तं राक्षसं । स्मृतमात्रएव सराक्षसः कृताञ्जलिस्सन्निदधे राज्ञः । सतं प्राह राक्षसं । भद्र नः प्रिया नागलोके निवसति गृहे सालपोतस्य । तामानेतुमर्हसीति । देव यथाज्ञापयसीति प्रायान्नागलोकमानिनायच तामविप्लुतचरितां । सा पुनर्विशालनयना प्रेम्णा नयनाभ्यामापिबन्तीव बद्धाञ्जलिपुटा प्रसीदतु ममार्यपुत्रइति पुनःपुनः प्राह भर्त्तारं । राजातु तान्तथा याचमानामालोक्य नन्वहं प्रसन्नएवास्मि भवत्यै । नखलु प्रसादविषयः प्रसाद्यते प्रभुजनेन । परन्तु ।

यत्तत्कोपावेशात् सुन्दरि विपिने मया परित्यक्ता ।
तत्क्षन्तुमर्थयेत्वामान्मसमां कः पुमान्वने जह्यात् ॥

इतिवदन्तं सा सविनयमाबभाषे

आपानभूमिगाया न साधु यन्मे बभूव चरितन्तत् ।
अपि सर्वैः पूर्वकृतैः क्षमतां भर्त्ता विमाननैस्साकं ॥

इति वदन्तीं भयेन कंपितांगीं सान्त्वयामास राजराजः । अमन्यत सर्वासामेव पात्रमाशिषामात्मानं ॥

अनुकूलया शुभांग्या नान्यमनास्सोपि विविधभोगानां ।
राजा रसज्ञतायामस्यास्संवादमाददे मानं ॥

अथ सा प्रणयेन प्राह भर्त्तारं । यद्यप्यार्यपुत्रस्य प्रिया इति भुज्यन्ते मया विषयाः । परं सख्यां मत्कृते संप्राप्तमूकभावायां क्लिश्यन्त्यां कथमिव मे विषयरसो भवेत्स्वादुः । इति प्रियायास्सवचोवसाने पप्रच्छ सखीमधिकृत्य सर्वमुदन्तं । अथ सा प्राह भर्त्तारं । आर्यपुत्रेण विपिने परित्यक्तामितस्ततो विसर्पन्तीञ्जग्राह नागपतिर्बलवान् । सच विविधैरुपायैर्यदामन्यत मां स्वयमासाद्यां । तदा मां प्रादात्स्वसुतायै नन्दायै शुभाचारायै । अथ कतिपयेषु दिवसेषु समतिक्रान्तेषु समामुद्दिश्य पप्रच्छ तां कथंभूता सा मानुषीति । नन्दा पुनर्मे सखीभावमापन्ना नोत्तरं किमपि पितुः प्रादात् शुभचरिता । असकृदेव निर्बध्यमानापि यदा नकिञ्चिदुवाच सा तदा शशापासौ ताम्मूकीभवेति । तदस्या मन्निमित्तो मूकीभावस्सकलसुखानामन्तरायभूतो मया कथमिव शक्यस्समुपेक्षितुमिति । ततस्सराजा चित्रन्नाम तमेव द्विजवरमाहूयाकथयदादितः प्रभृति वृत्तं वृत्तवत्यास्सख्याः । अथ सद्विजवरः सारस्वतीमिष्टिं पुनः पुनरभ्यस्तामकरोत् । ततो नागलोके प्रवृत्ता वाक् बभूव तस्यास्सख्याः । आकस्मिकप्रवृत्तवाङ्मयां नन्दामुपलभ्य त्रिकालज्ञः प्राह तत्र गर्गस्तां मुनिः । प्रभावोसौ सारस्वतीयायाः खल्विष्टेः । तत्रच सखी ते राज्ञी निमित्तमनिमित्तवत्सलायास्तवेति । सर्वमेव प्रावोचद्वृत्तं वृत्तज्ञः । अथ सानन्दा सा नन्दा सखीन्दिदृक्षुराजगाम राज्ञस्तत्पुरं । पुरेचान्तःपुरमविशत्सा नागवधूः । दृष्ट्वातु तामात्मसमां राज्ञी महति सिह्मासने निवेशितामर्हयामास विविधैरेव सत्कारैः । राज्याः प्रियसखीमागतामुपलभ्य राजा प्रमोदभरितस्सनगरे समघोषयत्सार्वजनीनमुत्सवं । तथा प्रवृत्ते नगरोत्सवे पार्त्थिवः प्राह प्रियां भार्यां । प्रिये कान्नु करोमि ते सख्याः प्रत्युपकारप्रक्रियां । नरत्नानि राज्यमात्मावा किमपि प्रत्युपकारे सख्याः । तदुच्यतामात्मनस्सदृशमुपकारस्य च । सातु सस्मिता समभाषत सखीसमक्षं राजानं । नन्वविगणय्य पितृस्नेहमनवेक्ष्यचात्मदुःखमुपकारे प्रवृत्ताया मे सख्याः प्रत्युपकर्त्तुमस्ति नकथञ्चिदप्यवकाशः । तदस्यामेव प्रत्युपक्रियाविधुरमास्तामुपकारइति । अथ सा नागांगना सिह्मासनमधिरूढा प्रावोचत् प्रियसखीं राजानञ्च । राजन् भविता युवयोस्तनयश्चक्रवर्त्ती सुयशाः । यस्याप्रतिहतं भविष्यत्याज्ञाचक्रं । युवयोरपि ये दिव्या येच मानुषास्सर्वेपि भोगास्संपद्यन्तामनन्तरायाः । इति वराननवरान् दत्वा नन्दा प्रायात् पाताळं । अथ बहुतिथे समतीते समये तयोस्तनयस्समुत्पेदे महानुभावः । तदा किल देवानामासीन्महानुत्सवः । अथ मुनयस्समेत्य तस्य उत्तमइति नाम चक्रुः । उत्तमत्वादुत्तमतनयत्वादुत्तम एवायमिति । ततस्सगृहीतसकलवेदो वेदांगवित् शस्त्रास्त्रसंप्रदायपारदृश्वा बभूव धर्मे निरतः । तत्र मनुत्वे निवेश्य देवास्सुखमवर्त्तन्त यज्ञभागभुजः ॥

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

# ॥ तामसचरित्रम् ॥

आसीत्सुराष्ट्रो नाम महानुभावो नृपतिः । सकिलात्रेर्महामुने-
राराधितादवाप परमायुस्साकमारोग्येण । अयञ्च क्रमादुपरतेषु दारबन्धुषु
भृत्यसचिवेषुच जगाम परमार्त्ति । सामन्ताश्च नवशे बभूवुरस्यासमसमयाः ।

आरोग्यमायुरपि वा न सुखाय यतो विना स्वबन्धुजनं ।
वसतश्शून्या पृथिवी दुःखन्तत्रच परोपजीवित्वं ॥

ततस्सकोशक्षये भृत्यवर्गविनाकृतस्सम्मर्दे निराकृतस्समनन्तरराष्ट्रपालेन
जगाम वनं । तत्रच वितस्तापुळिने विचार्य सुचिरममंस्त शरणमेकामेव
तपस्यां ।

दुर्गतिदूषितमनसामेकं परमाश्रुमुचितमार्याणां ।
भोगाभावे हेतुस्साक्षादेकन्तपो नाम ॥

ततः प्रकृष्टैस्तपस्समाधिभिराराधयामास हिरण्यगर्भं । अथ कदाचिद्रा-
त्रावकाण्डवर्षसमुद्भूतसलिलप्रवाहवाहिन्यां वितस्तावाहिन्यां निमग्नो नाप-
श्यत् किमपि तादात्विकमात्मरक्षाहेतोः । तत्र प्रवाहे निपतितां तरन्ती-
मुपलेभे सन्तमसे संस्पर्शेन रोहीं । तां सजग्राह पुच्छे निरालंबः परमवलंबं ॥

भूत्वा चतुरन्ताया भूमेरालंबनं नृपः पूर्वं ।
आलंबमिच्छति मृगीं कष्टा धातुर्गतिश्चित्रा ॥

क्रमेण सा प्रवाहे मन्दीभूते क्वचिद्रोधसि जंबाळिते शनैश्शनैरगच्छत्
पुच्छलग्नेन सह राज्ञा । सच तस्यास्स्पर्शाद्विक्रियामापन्नो नजहौ तस्याः पु-
च्छं । सातु राजानं विक्रियमाणमवगत्य प्राह मृगी । राजन् न तवाहमगम्या
भवानपि मयि निबद्धरागो विभात्यनुगच्छन् । परमेषलोलो गर्भस्थः प्रतिब-
ध्नाति आवयोस्संगममिति । श्रुत्वा सराजा विस्मितः प्राह तां रोहीं । कासि
त्वं मृगीतनुप्रातिच्छन्ना । किन्नु देवी । कथमन्यथा मृग्यास्सत्या मानुषव्यव-
हारसंभवः । कोसौ लोलो नाम । योयमावयोः प्रतिबध्नाति संगमं । नूनन्त्व
मसि मायामृगी नस्सन्निहितेति । तस्य वचनमाकर्ण्य सा समभाषत राजानं ।
अहं किल पूर्वजातौ भवतो महिषी नन्वहमुत्पलावती नाम । प्रागुपयमात्
पितुस्सद्मनि वयोनुरूपक्रीडाभिस्सह वयस्याभिरगामुपवनं । तत्र विहरन्तं
सह मृग्या कमप्यपश्यम्मृगं । सातु मृगी मया व्रतत्या ताडिता भीतापास-



रदतिदूरं । अथ सम्मृगः प्राह मानुषीं वाचं । यस्मादस्मत्समीहितस्याचरि-
तवती महान्तं प्रत्यूहं । तदवश्यम्मृगी भवितुमर्हसीति । तच्छ्रुत्वाहम्मन-
स्यकरवं । अहो नैषसाधारणो मृगः । अवश्यमनेन केनचिद्देवेन मुनिना
वा भवितव्यं । तथाह्यस्य मृगत्वविप्रतीपम्मानुषं वचनमिति । अथ तमहं
प्रश्रिता प्रावोचं मृगवेषं पुरुषं । आर्य मे क्षन्तुमर्हस्यजानत्याः बालिकायाः
प्राथमिकमिदं बालिश्यं । अबलासु किल पुरुषा दयेरन् इति । सोब्रूत पुन-
रपि मां । यदि त्वमसि मृग्यास्स्थाने वरोरु तदा निवर्त्यते शापः । अहं
किल मुनिरस्मि मृगरूपेण मृगीभिस्सह विहरन्नतृप्तोस्मि कामभोगेष्विति ।
अहमपि विमृश्यावोचम्महामुनिं । आर्य परवानयञ्जनः पित्रा । कथमेवं
सति स्वातन्त्र्यमास्थाय चरेयं । याचस्व मे पितरं । सते यदि दास्यति
यथोक्तमेतत् भविष्यति । नाधुना त्वमेवं वक्तुमर्हस्यतीत्य मर्यादां इति । स-
पुनः प्राह मां । मृगजातौ च वर्त्तमाना पौर्वभविकपतिसंस्पर्शलब्धगर्भा
प्रसोष्यसे पुत्रं राजराजं । सकिल सर्वेषामाधिपत्ये भविष्यति मनुत्वेच ।
ततस्ते मृगत्वाद्विमुक्तिरिति । सोयन्तव स्पर्शेन मे जातो लोलो नाम गर्भ-
इति । सराजा प्राप तदा महतीम्मुदं किञ्चिदिव वैमनस्यञ्च । साच प्रासूत
सुतमप्रतिमं । तदा किल निमित्तानि अन्वगृण्हन्नैमित्तिकन्तज्जननं । प्रसूयच
सा मृगत्वहेतुमतरत्सह कार्येण पाप्मानं । क्रमेणच सोपि ववृधे सालपोत-
इव महावने । तस्य च मुनयस्समेत्य नाम चक्रुस्तामसीमयम्मातरि योनिं
गतायामुत्पन्नस्तमसिच तामसो नामेति । उपनीतश्च पित्रा गृहीतवेदवेदाङ्गश्शा-
स्त्रास्त्रवित् बभूव धर्मपरः । ततः कदाचिदस्य विचिकित्साभूदात्मानं पित-
रञ्चाधिकृत्य । कोहं कश्चासौ कथञ्चाहमुत्पन्नः । नखलु विना स्त्रियमुत्पाद-
यन्ति केपि तनयान् ॥ तत्पृच्छामि वृत्तज्ञमेनमिति विचार्यापृच्छत् पितरं ।
तात कोहं कश्च त्वं कथंवाहमुदितइति । सोब्रूत तनयं । वत्स राजास्मि
सुराष्ट्रोनाम । सामन्तैरपहृते राज्ये तपसि निष्ठामवापम्महतीं । निशिच
वर्षति देवे प्रावहद्वितस्ता । ओघापहृतमात्मानपश्यं । काञ्चन रोहीञ्च प्र-
वाहे भिपतितां । ताञ्च पुच्छे गृहीत्वाऽहमस्तोषि । तस्याञ्च मम स्पर्शाज्जात-
स्त्वमासि । सा किल पूर्वभवे ममाग्रमहिषी बभूवोत्पलावती । शापदोषान्मृग-

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

त्वमगात् प्रसवावधीति । सतु सर्वमवगत्य पितुस्सकाशात् प्रायादम्य-मित्रममित्राजित् । अथाजुहाव तं राज्यहरं राजानं रणहेतोः । सोपि बाल-मेकमायुधमात्रसचिवमालोक्य सावज्ञमाह महीक्षित् । कोयन्दारकः कस्य वा किमर्थमस्मान्युयुत्सति । ननु समानोपकरणयोर्जन्यमिति क्षत्रजातिनि-यमः । कथं वानुपकरणमुपकरणवन्तो वयमभियामेति । सतथावज्ञातः प्रा-ह तं नरपतिं ।

आयुधमात्रसहायन्तनयम्मां विद्धि भोस्सुराष्ट्रस्य ।
कण्डूलगण्डमण्डलकरटिघटापाटनैकनिष्णातं ॥
वृद्धः प्रशान्तचित्तस्तातो मे यद्बलाद्विनिकृतोभूत् ।
तद्दर्शय मम पुरतश्शक्तश्चेदास्थितो महोत्सेकं । इति ॥

ततस्सरणभुवि ससैन्यमेव जिगाय तन्नरनाथं । तञ्च बद्ध्वा पितुस्तपस्य-तस्सकाशमानिनाय सतामसः । आनीतञ्च तन्तनयेन बद्धमवलोक्य सराजा मुदमवाप वाचामतीतमहिमानं ।

उत्सेकवतां पुंसामियदेव हि मोदहेतुरप्रतिमः ।
अगणितनिजमहिमानं शत्रुं बद्धं सुतेन यत् पश्येत् ॥

ततस्सहजकरुणार्द्रमनाः प्राह पिता पुत्रं सुराष्ट्रः । मुच्यतामयं राज्य-ञ्चाप्नोतु करदानसमयेनेति । अथ पितुरादेशाद्विसृज्य तमेकएव जिगाय सप्तद्वीपामपि महीं सतामसोमनुः । तञ्च देवा मनुत्वे समवस्थाप्य सुसुख-मवसन् हविर्भुजः ।

## ॥ चाक्षुषचरित्रम् ॥

आसीत् कश्चित् क्षत्रजातिर्द्धनिको नाम । तस्याभूत् प्रिया पारिभद्रेति । तस्मादस्यामभवत् शिशुर्जातिस्मरः । तञ्च माता पञ्चमे दिवसे समुल्लाप्य पुनः पुनः परिष्वजन्ती पुत्रस्नेहेन तस्थौ ।

उल्लापोन्मादवशात् जीव चिरं वत्स तात जातेति ।
परिषस्वजे मुहुस्तं मातुस्स्नेहस्सताहशो यस्मात् ॥



एवमतिस्नेहप्रकर्षपरवशामशंकितमसदृशञ्च किमपि समुल्लपन्तीं सबालः प्र-जहास ताम्मुहुर्मुहुः । सा तथा हसन्तमालोक्य भीता बभाषे पारिभद्रा वत्स कथमसि प्रगल्भइव प्रहसितः । अपि नः कुशलमावेदयासि प्रहासेन नूनम्मुहुर्मुहुः प्रहसन् कथयसीव कमपि भाविनं परिभवं । अथ तथोक्तानश-यएव सबालः प्राह मातरं । भद्रे भद्रमस्तु भवत्याः । एषा खलु मार्जारी मामत्तुकामा पश्यति प्रसूतिगृहे । इयञ्च जातहारिणी तिरस्करिण्या विद्य-यान्तर्हिताभिलषति मामपहर्त्तुं । भवतीच मयि स्नेहमाबध्नाति निकामं । उत्भिन्नप्रेमप्रकर्षसमुद्भवदानन्दसलिला कळं व्याहरन्ती भवती पुनरुन्मत्तेव । मार्जारी जातहारिणीच भवत्यासस्साधारणार्त्थे । ननु स्वार्त्थपराएव स-र्वाः नात्मनि किञ्चित् कर्त्तुं प्रयतन्ते नात्मनोपि । किंबहुना ।

अमुना देहेन पुनर्भोगं संप्रार्त्थयन्ति हिभवत्यः ।
सद्यः पलमभिलषतो मार्जारीजातहारिण्यौ ॥

भवती पुनः क्रमिकमर्त्थमागामिनम्मयि पश्यति । कोनु मे भवत्याश्च पुरा संबन्धः । किञ्जानासि मामसाविति । किन्तु जानामि त्वामहमियमसाविति । केवलमुदरनिवासादेव त्वमतिस्नेहेन माद्यसि । नाहमिममभिमन्ये सम्बन्धं । तथाहि ।

मुहुरागमिभिर्देहैस्सापायैर्म्मे यदा नसंसर्गः ।
तत्संबन्धवशात् किं भद्रे कुत्रापि जायतां सर्गः ॥
उदितैर्न्नभइव मेघैर्न्नळिनीदळमिव पृषद्भिरिव वारां ।
अहमस्मि निरनुबन्धो देहैश्शुद्धेस्ति मयि नकिञ्चिदपि ।

इति वदता तेन माता विप्रकृता प्राह सा । यदि न मया किमपि तव प्रयोजनं तदा ममापि नास्त्येव त्वया किमपि । ननु परिव्राजमेव त्वाम्मन्ये । तदेषा त्वामहं परित्यजामीत्युक्त्वा बहिर्जगाम सा सूतिकागृहात् । अथा-न्तर्द्धानगता जातहारिणी जडचरितं विशुद्धान्तःकरणमपजहार शिशुं । अप-हृतञ्च राज्ञो विक्रान्तस्य महिष्याहेमिन्याश्शयने विन्यस्य तमस्यास्सुतम-पाहरत् सा जातहारिणी । तमपि बोधनाम्नः कस्यचित् द्विजवरस्य गृहे

Digitised by Ajit Gargeshwari For Karnataka Samskrita University

96/283

निधाय तस्य शिशुमपि निर्दशनमभक्षयत्सा निर्घृणा । एवंहि सा शिशुं तृतीयं भक्षयति कठोरहृदया । ततस्सविक्रान्तोपि चक्रे नामानन्दइति । अथ शर-दामतिक्रान्ते परिवर्त्तने राजासावुपनिनाय तमानन्दं । उपनीतश्च तं गुरु-राह प्रथमं जननीं वन्दस्वेति । सच प्राह गुरुं । का पुनर्जननी वन्दनीया । किं वा जनयित्री । उत पोषकीति । सगुरुः प्राह तं । ननु कुमारं जननी तव जारुषात्मजा महिषी विक्रान्तस्य हेमिनी नाम । वन्दस्वैनां शास्त्रविधेः इति । सपुनः प्राह तं गुरुं । ननु मे जनयित्री धनमित्रस्य पत्नी क्षत्रजातेः पारिभद्रा नाम । हेमिन्यास्सुतश्च विशालग्रामवासिनो बोधस्य द्विजस्य सद्मनि निवसति । सचैत्रो नाम्नेति । अथ गुरुस्तच्छ्रुत्वा कथमेतदिति विचारयन्नाद्यगश्चत् कर्त्तव्यं । पप्रच्छ तमेवानन्दं । पुनरपि कथमेतद्वत्स संभवेत् संकटामिव नः प्रतिभात्यश्रद्धेयश्च । तेनोक्तस्सप्राह गुरुं । विशालग्रामादानीयताञ्चैत्रः । ततस्सर्वं स्फुटीभविष्यतीति । सचानिनाय विशालग्रामात् तं चैत्रं । तन्दृष्ट्वा संपृक्तमिव विक्रान्तहेमिनीप्रतिबिंबं सर्वेपि प्राहुः विक्रान्तस्यैवायन्तनयो हेमिन्याश्चेति । ततो धनमित्रमाहूय सभार्यं व्यलोकयत् । तयोरपि प्रतिकृतिमिवानन्दमालोक्य प्रसूतिगृहवृत्तान्तञ्चाकर्ण्य [illegible]र्वमेव तेनोक्तं श्रद्दधे सराजा । अथ तमानन्दमनुमेने सराजा वन[illegible]नाय ततो बोधं द्विजवरं बहुभिः कामैस्सन्तर्प्य चैत्रमेव राज्यार्हमकरोत् । आ-नन्दोपि समनुज्ञातो राज्ञा तपश्चचार वने सविशुद्धं । अथ भगवानननिधनः स्वयंभूस्तमामन्त्रयांबभूव वत्स चाक्षुषेति । यतस्सपूर्वजन्मनि चक्षुषस्स्वयंभुवो बभूव समुत्पन्नः । तन्तथामन्त्र्य प्राह पितामहः । वत्स किमर्थन्ते तपः । ननु विशुद्धएवास्यर्हश्च विमुक्तेः । परन्तु प्रारब्धवशान्मनुत्वे त्वया स्थातव्यं । ततो मोक्ष्यसे इति । नखलु रागद्वेषादिभिर्न्नभइव रजोभिः कलुषीक्रियते तव चित्तं । प्रसंख्यानादसंगमात्मानमनुपश्यतो नते दृष्टिरुपरुध्यते क्लेशैः । तद्वत्स मुक्तएवासि नते बन्धहेतवो भवन्ति शरीरेन्द्रियप्रचाराः इति । ततस्सभगवता निर्बध्यमानः प्राप मनुत्वं । उपयेमेच विदर्भराजसुतां सुशीलां । तस्यच बभूवुस्तनयाबलीयांसो धार्मिकाः । देवाश्चास्य मनुत्वमन्ववर्त्तन्त सुखिताः ॥

SRI CHAMARAJENDRA SANSKRIT COLLEC
LIBRARY
Class Y 14 Ac. No. 879
Author
Title Sanskrit Journal

SRI CHAMARAJENDRA SANSKRIT COLLE
LIBRARY
This book was loaned on the last date mentioned
and it is returnable within a fortnight therefrom
the loan is renewed.

1641-36 B P.

Digitised by Ajit Gargeshwari For Karnataka Samskrita University